कविसपर्याग्रन्थमाला - 1

सनातनस्य काव्यवैभवम्

प्रधानसम्पादकः
प्रो. ए.पी. सच्चिदानन्दः
कुलपतिः

सम्पादकः
प्रो. सदाशिवकुमारद्विवेदी
संस्कृतविभागः, का.हि.वि.वि,
वाराणसी-221005

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)
नवदेहली

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनलएरिया
जनकपुरी, नवदेहली-110058
ईपीएबीएक्स : 28524993, 28521994, 2854995
e-mail : rsksrp@yahoo.com
website : www.sanskrit.nic.in

ISBN : 978-93-82091-90-5

प्रथमसंस्करणम् : 2013

मूल्यम् : ₹ 216/-

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-९
E-mail - amarprintingpress@gmail.com

पुरोवाक्

विदन्त्येव विज्ञा यद् विश्वस्य ज्ञान–विज्ञान–विमर्शपरम्परासु अतिमहदवदानं वरीवर्ति भारतीयप्रज्ञायाः। अस्याः प्रज्ञायाः परमप्रकर्षं विभावयामः शास्त्राणां काव्यानां च परम्परासु। एताश्च शास्त्रकाव्यपरम्परा आवेदेभ्यः प्रसृता अद्यावधि विकासं यान्तीति न संशीतिः। एतासां परम्पराणामैतिह्यम् आविर्भावकालो विस्तारकालः समृद्धिकालश्चेति त्रिषु चरणेषु प्रसृतम्। विक्रमपूर्ववर्तिन्यः प्रथमा द्वित्राः पञ्च वा सहस्राब्द्य आविर्भावकालस्य सन्ति। अनन्तरं विक्रमात् परवर्तिनी प्रथमा सहस्राब्दी वरीवर्ति विस्तारकालः। तदनु परापतति समृद्धिकालः। अयं च कालोऽद्यावधि संस्कृतपरम्परायामनुवर्तते। अस्मिन् काले विक्रमात् परं द्वितीयायां सहस्राब्द्यां (११००–२००० खिस्ताब्दाः) किमपि मौलिकं चिन्तनं रचनाकर्म वा संस्कृते न सञ्जातमिति जल्पन्ति केचन तथाकथिता आधुनिकाः। अयं केवलं टीकानां काल इत्यपि ते आमनन्ति। वस्तुस्थितिस्तु अन्यैव। सत्यं नाना टीकाग्रन्था अस्मिन् सहस्राब्दे पण्डितैश्चिन्तकैर्विरचिता अद्यापि विरच्यन्ते च। एतादृशेषु टीकाकारेषु सन्ति अभिनवगुप्त–रामानुज–वल्लभाचार्यसदृक्षा महनीया महान्तो दार्शनिका विचारकाः, येषां टीकाः प्रकटीकुर्वन्ति सर्वथा नवोल्लासं सरस्वत्याः। अस्मिन् सहस्राब्दे नैके अभूवन् विपश्चिदपश्चिमा ये साहित्यशास्त्रे परिकल्पयन्ति स्म नवाः कोटीर्नूत्नानि वा लक्षणानि, लक्षयन्ति स्म नवविधाः, आविष्कुर्वन्ति स्म नवीनांश्च सिद्धान्तान्। एतादृशेष्वेव पण्डितेषु महामहोपाध्यायो रेवाप्रसादद्विवेदी सत्यमेव सारस्वतसाधनायाः कश्चन समुज्ज्वलो विग्रहोऽस्ति।

प्रख्योपाख्याप्रसरसुभगं सरस्वत्यास्तत्त्वं द्विधा प्रवर्तते – अविचारितरमणीयं विचारितसुस्थं चेति यायावरीयो राजशेखरो मनुते। अतिप्राचीनकालादद्यावधि द्वयोरपि अनयोर्मार्गयोः संस्कृतसाहित्यसरस्वती अनिर्बाधं प्रकृष्टं च प्रवहमाणा आस्ते। तत्र काव्यमार्गस्तु ललितमार्गः। तत्र रममाणा रसावेशवैशद्यसौन्दर्यनिधानभूताभिरुक्तिभिर्निजहृदि विकसन्तः सुकवयः प्रायः शास्त्रपद्धतिषु नैव कुर्वन्ति सञ्चारम्। अथ तर्ककर्कशे पथि गच्छन्तो बुद्धिवैभवं प्रकटयन्तः शास्त्रकाराः प्रायो भवन्ति ललितरम्यरचनाभ्यो विमुखाः। ते विरला एव भवन्ति ये यथा शास्त्रेषु प्रगल्भन्ते तथा काव्यानुशीलनवशाद् विशदीभूतमनोमुकुरा वर्णनीयतन्मयीभवनयोग्यतामपि प्रकटीकुर्युः। अथ तादृशास्तु दुर्लभा एव स्युः सुकृतिनः कृतिनो ये नवीनं शास्त्रप्रत्यग्रोन्मेषरम्यं च काव्यं समं योग्यतया विरचयन्ति। एतेष्वपि सर्वथा विरलास्ते सन्ति ये कमनीयकल्पनासंवलितेषु काव्येषु स्वोपज्ञेषु शास्त्राणां समृद्धिं स्वर्णे सुगन्धमिव समुत्पादयन्ति, अथवा स्वविरचितेषु शास्त्रेषु सन्निधापयन्ति काव्यलावण्यम्। सनातनोपाह्वो महामहोपाध्यायो रेवाप्रसादद्विवेदी आचार्यः कवितल्लजस्तादृश एव कृती कृतिकारः। अयं नवीनशास्त्रग्रन्थानां रचनाया यथा गम्भीरविचारमार्गे सञ्चरति तथैव नैकाभिः सुकविताभिरपि सरस्वतीं समाराधयति। न केवलमेतदेव, अनेन विरचितेषु शास्त्रग्रन्थेषु काव्यस्य चारुता, काव्येषु तथा चास्य भवति शास्त्राणां पारदर्शित्वम्। उचितमेव श्रीभोजराजेन श्रव्यकाव्यप्रबन्धेषु शास्त्रकाव्यं काव्यशास्त्रमपि च सन्निवेशितम्। उभयोरपि शास्त्रकाव्यकाव्यशास्त्रयोः समानी गतिरस्य सुकवे रेवाप्रसादस्य–

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले
काव्ये वा मयि संविधातरि समं लीलायते भारती

इति श्रीहर्षोक्तिमिवानुकुर्वतः, 'तर्केषु कर्कशधियो वयमेव नान्ये, काव्येषु कोमलधियो वयमेव नान्य' इति प्राचामुक्तिं चरितार्थयतो वा।

एतादृशस्य महापण्डितस्य महाकवेश्च सारस्वतसपर्या कविसपर्यानाम्नि कार्यक्रमे विहिताऽभूत् राष्ट्रियसंस्कृतसंस्थाने। महाकवेरस्य काव्येषु प्रतिपद्यमलङ्काराणां यादृशी अनुपमा छटा, तादृशमेव सौशब्द्यम्, यादृशं च सौशब्द्यं, तादृशमेवार्थगौरवं विलसति। एतादृशस्य महावाक्यायमानानां महाकाव्यानां काव्यानां च कविसपर्यामिषेण समीक्षणं व्यधायि कमलेशदत्तत्रिपाठि- राजेन्द्रमिश्र- रमेशकमारपाण्डेयप्रमुखैः पण्डितैरथ च महाकवेरस्य सुयोग्यसुपुत्रेण चिरञ्जीविना सदाशिवकुमारेण। स्वयमेव महाकविनाऽपि स्वकाव्यानां विशिष्य स्वप्रणीतमहाकाव्यानां निहितार्थो प्रकाशतामानायि। तदेतत्कविसपर्याग्रन्थमालायाः प्रथमपुष्पत्वेन प्रकाशयत् हर्षप्रकर्षमनुभवति राष्ट्रियसंस्कृतसंस्थानम्। ग्रन्थस्यास्य प्रकाशनार्थं कृतसङ्कल्पेभ्यःपूर्वकुलपतिमहोदयेभ्यः आचार्यराधावल्लभत्रिपाठि-महोदयेभ्यःप्रणतिततयो निवेद्यन्ते। ग्रन्थोऽयमाधुनिकसंस्कृत-साहित्याध्येतृणां विदुषामनुसन्धित्सूनां च महत उपकाराय भवेदिति दृढं विश्वसिति।

प्रो. ए.पी. सच्चिदानन्दः

प्र. कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

विषयानुक्रमणिका

मदीया आत्मकथा

प्रो. रेवाप्रदासद्विवेदी

प्राथमिकशिक्षायाः पञ्चमीं कक्षां यावदुत्तरामि तावदेव पितरौ मे कीर्त्तिशेषौ जातौ। अथ मातुलगृहमाश्रित्य राजकीयस्य काशीस्थितस्य संस्कृतमहाविद्यालयस्य साहित्यविषयां संपूर्णां मध्यमां प्रथमया श्रेण्या उदतरम्। तस्मिन्नेव च वर्षे काशीमीयिवान्। काशीं प्राप्तः प्रथम एव दिने समाचारपत्रप्रकाशितं परीक्षाफलं ददृशिवान्। गुरुचरणाः पं० महादेव–शास्त्रिणः काशीहिन्दूविश्वविद्यालयस्य संस्कृतमहाविद्यालये प्राचार्याः साहित्यविभागाध्यक्षाश्चासन्। ततस्तद्वचःप्रामाण्येन शास्त्रिकक्षायाः प्रथमे वर्षे प्रवेशं लब्धवान्, मध्यमाप्रमाणपत्रं तु नाद्यावध्यशाकि लब्धुम्। अङ्कपत्रमात्रमाश्रित्य शास्त्रिकक्षायां लब्धप्रवेशोऽहमभूवम् एकोनविंशस्य शतकस्य पञ्चमे दशके। त्रिवर्षीयां शास्त्रिकक्षां सर्वप्राथम्येनोत्तीर्णस्तत्रैव त्रिवर्षीय आचार्यपरीक्षापाठ्यक्रमे लब्धप्रवेशः १९५६यीशाब्देनाचार्यो–ऽप्यभूवम्। एकं वर्षं जयपुरं गत्वा पश्चात् काशीमेव निवृत्त्य साहित्याचार्यत्वेन कलासंकायस्य संस्कृतविभागस्य एम्.ए. कक्षां १९५७ वर्षारम्भे प्रविष्टः १९५७–५९वर्षाभ्याम् एम्.ए.(साहित्य) परीक्षामपि सर्वप्राथम्येनोदतरम्। अथ पीएच्.डी.–शोधकार्यार्थं लब्ध–स्वीकृतिर्यावत् कार्यमारभे तावद् रायपुरस्थे शासकीयदूधाधारि–श्रीवैष्णवसंस्कृतमहाविद्यालये साहित्यव्याख्यातृपदे नियुक्तिं लब्धवान् गृहीतवाँश्च कार्यभारं २१.११.१९५९दिवसे। तत आरम्भ्य यावत् पञ्च वर्षाणि कार्यं करोमि तावदेव पदोन्नतिं प्राप्य सहायकप्राध्यापकः संवृत्तः।

स्थानान्तरत: इन्दौरस्थं कलामहाविद्यालयं प्राप्य तत एव १९७०वर्षे काशीमागत: स्वकीयानां गुरुचरणानां रिक्ते पदे नियुक्तिं प्राप्य। प्रथमं पदं सहायकप्राध्यापकपदमासीत्। अत्र रीडरपदादुन्नतिं लब्ध्वा १९७२वर्ष एव प्रोफेसरपदायापि चयनसमित्या योग्यत्वेन संस्तुत:। पञ्च वर्षाणि यावत् प्रतीक्षां कृत्वा डॉक्टरश्रीमालिन: कुलपतिपदान्निवृत्तौ प्रोफेसरपदं लम्भित:। तेनैव पदेन १९९०जुलाईमासे सेवानिवृत्तिं लम्भित: साम्प्रतं यावत् सम्मानितप्रोफेसरत्वेन कार्यरत एव विद्ये। शासकीयायामेव सेवायां पीएच्.डी—ति प्रथम:, डी.लिट्'—इति च द्वितीय: शोधोपाधिर्लब्ध:।

१९९० वर्षे सेवानिवृत्तिं यावज्जनेनानेन विविधान् पाण्डुग्रन्थान् परिशील्य (१) कालिदाससाहित्यं परिवर्त्तनेभ्यो विमोचय्य मूलभूतं रूपं लम्भितम्, निवृत्तेन च सेवातो (२) नाट्यशास्त्रस्य त्रयोविंशत्यध्या—यात्मकं काव्यलक्षणभागं सम्यक् संपाद्य हिन्दीभाष्येणापि योजितम्। तदनन्तरं राघवनिगीर्णं (३) शृङ्गारप्रकाशमपि व्यवस्थितया रीत्या समपादयम्। त्रीणि महाकाव्यानि, एकविंशति खण्डकाव्यानि, द्वे नाटके, तिस्रश्च लघुकथा रचितवान्।

मम महाकाव्यानि

प्रो. रेवाप्रसादद्विवेदी

त्रीणि महाकाव्यानि मम—

१. **सीताचरितम्/उत्तरसीताचरितम्** १०सर्गैः ६९९पद्यैश्च युक्तम्।

२. **कुमारविजयम्** ११सर्गैः ९०२पद्यैः

३. **स्वातन्त्र्यसम्भवम्** ७५सर्गैः ६०६४ श्लोकैश्च युक्तम्।

आहत्य एषु ७६६५ श्लोका भवन्ति।

१. सीताचरितम् / उत्तरसीताचरितम्

सीताचरितमेव सम्प्रति षष्ठे संस्करणे तस्य पूर्वमेवोल्लिखितेन युक्ततरेण नामान्तरेण उत्तरसीताचरितमिति प्रसिद्धिमापितम्। अत्र सी.डी. देशमुखमहोदयैरुद्गीर्णम्— 'सीताचरितस्य सीता रघुवंशसीतात उदात्ततरास्ती'—ति। सुनीतिकुमारचटर्जीमहाशयैश्च लिखितं 'काव्येऽत्र कविना सीताया यच्चित्रं प्रस्तुतं तादृशमेव कदाचित् कवीन्द्रैः रवीन्द्रनाथैरपि कल्पितमासीत्। एतच्च प्रमोदाय नः' इति। पण्डितराजै राजेश्वरशास्त्रिभिरत्र शान्तो रसः साधितः। पञ्चमे संस्करणे वृद्धानामेषां वचनानीमानि भूमिकान्ते दत्तानि सन्ति।

छात्रावस्थायामेव मयाऽस्यारम्भिकाः पञ्च सर्गा आसन् विरचिताः। दशसर्गात्मकतां तु गतमिदं शासकीयायां सेवायां स्वयं विवासमनुभवता नरसिंहगढं गतेन। दशेमे सर्गा मूलरूपेण 'सागरिकया' प्रकाशिताः। तदिदमस्य प्रथमं मुद्रणम्। अनन्तरं स्वैरं प्रकाशितान्यस्य चत्वारि संस्करणानि तैस्तैर्विद्वद्भिः, तेषां विश्वविद्यालयानां पाठ्यक्रमे तदिदं निर्धार्य।

अथास्य विशेषाः — शास्त्रिकक्षायाः प्रथमे वर्षे पाठ्यक्रमे निर्धारितत्वेन जनेनानेनान्वशीलि भवभूतेरसदृशभाषया विरचितम् उत्तररामचरितं नाम सप्ताङ्कं नाटकम्। कालिदासेनेवाऽत्र सीता व्याजेनैव त्यक्ता। तत्र वने सीतायाश्चित्रम्— (उत्तररामचरिते)

करुणस्य मूर्त्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी'—ति

रघुवंशेऽपि कालिदास एवमेवावोचत्— (रघु. १४.४५)

प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव ।
स त्वं रथी तद्व्यपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम् ।।

इति।

अत्रच्छले सनातनस्य महानाक्रोशः। सोऽचिन्तयत् 'किमभविष्यद् यदि छलं नाश्रयिष्यते'—ति। सीतापि भगवती विदेहराजस्य अयोनिजा पुत्री। विदेहराजो जनको पुनस्तत्त्वविदां वरिष्ठो योगी च सुमहान्। तत्प्रभावः सीतायामपि नाभविष्यदिति असदृशमेव कल्पनम्। प्रजाजनेनोत्थापिते चरित्राशुद्धिप्रवादे यदि—

चरणेनापि सव्येन न स्पृशेयं निशाचरम् ।
रावणं किं पुनरहं कामयेयं निशाचरम् ।। इति,
अनादेशात् तु रामस्य तपसश्चानुशीलनात् ।
न त्वां कुर्मि दशग्रीव! भस्म भस्मार्हतेजसा ।।

इति च रामायणे स्वयं महर्षिणैवोद्गीतकीर्त्तिवचनाया वैदेह्या अस्या विषये प्रमाणभूतानि वचनानि दत्तानि तथापि जना यदनीदृशमुदगिरन्त सीताचरितकारस्तत्राटीकत— **'रघुपतिजनता न शिक्षितास्ती'**—ति (७.३५)।

सीताचरिते वैदेहीपरित्यागे छलस्य लेशोऽपि नाद्रियते। श्रुत्वा व्यथितो रामः संसदमामन्त्रयते। तत्र सन्त्युपस्थिताः सवसिष्ठाः मातरः,

भ्रातरश्च सर्वे। रामः पुनर्विषमां स्थितिं निवेद्य तूष्णीं तिष्ठति। सर्वेऽपि भ्रातरो विषण्णा दृश्यन्ते। मातरः सर्वा अपि वैक्लव्यमनुभवन्ति। क्षणेऽस्मिन् सीता स्वयमेव प्रस्तौति रामस्य अयोध्यायाश्च परित्यागम्। के वा तस्या अस्याः शब्दाः? (सीताचरिते)—

साऽब्रवीत्‘प्रतिहतेन चक्षुषा सर्वथा स्वतमसाऽत्र मानुषः,
वीक्षते पर—परिस्थितिं परं, वीक्षते न परधर्मदर्शने ।। ३.४।।
वीक्षते यदपि सूर्यबिम्बतः शैत्यमुद्भवति नैव जातुचित् ।
एवमेव न निशीथिनीपतेः क्वापि नश्यति तुषारशीतता ।। ३.५।।
किन्तु विश्वसिति दूषणं प्रमापूतमेव जनता स्वतः सदा ।
तोयजं भवति पङ्कजं हि तन्मानसे श्रयदपि प्रभां रवेः ।। ३.६।।

अथ निर्णयति—

विश्वसेदथ न वापि विश्वसेल्लोक एष विदुषे ततो न भीः।
स्वं प्रमाणयति कृत्यदर्शने सम्भवेन्न सुजनेऽन्यनेयता।। ३.७।।
विश्वदैवतमुपास्य कार्मणं यस्तु वाञ्छति चराचरप्रियम्।
तेन पादपनिभेन केवला पूज्यतेऽनुपहिता परार्थता।। ३.३०।।
यामि मातर इतः स्वतस्ततो यामि, यामि विपिनं न मे व्यथा।
कीर्त्तिकायमवितुं सुमानुषा मृत्युतोऽपि न हि जातु बिभ्यति।।३.३१।।

विचिकित्सितचेतसं लक्ष्मणं सीतैवाग्रजविधेयतामुपदिश्य शत्रुघ्नसमानीतं रथमारुरोह। लक्ष्मणश्च तत्र सारथिः। रथश्चचाल, चचाल नु शरीरतश्चैतन्यरसः। अग्रे कल्पितं कथानकम्। लक्ष्मणः सीतां पूर्वमूर्मिलादिभिर्भगिनीभिर्मेलयति। व्यथितास्ता गार्हस्थ्य एव दाढ्र्यमादिश्य स्वयमेवैकाकिनी वाल्मीकिपदं प्रति प्रतस्थे।

अथ अबलायाः परममबलात्वं दृश्यते गर्भिणीत्वे। सीतापि गर्भिण्येव। एकाकिनी सा किं कुत्र करिष्यतीति विषम उपन्यासेऽपि

सनातनस्योत्तरम्— 'भोगिनीनामियं भीः, न पुनः सिद्धयोगानां दिव्यदिव्यानां जननीनामि'ति। नागालैण्डयोषितामुदाहरणेनापि तथ्यमिदं कविः साधयति। तासु हि पर्वतमारोहन्त्यो गर्भिण्यः मध्येमार्गमेव प्रसविन्यश्चेत् शिशुं पाणौ निधाय पूरयन्त्येव, सुखेनैवारोहणम्। नास्ति तत्र प्रसवस्य काठिन्यं वेदना वा। सीतापि वाल्मीकेराश्रमे प्रवेशात् पूर्वमेव कुञ्जे पुत्रौ प्रसूते। प्रसवस्य तनीयस्यां वेदनायां वनश्रीर्म्लायति, प्रसवपूर्त्तौ च पुनर्हृष्यति। इदानीमागच्छति महर्षिर्वाल्मीकिः। कविरत्रापि स्त्रीणामबलात्वं परिजहार।

अस्मिन्नवसरे महर्षेः सीतां प्रति सीताचरिते यद् वचस्तत्रापि निध्येयम्—

पूजामेतां कविरपि महान् स प्रतीच्छ्य प्रसीद—
न्नन्तर्वाणीं बहिरुपगतामन्ववादीदितीव ।
पुत्रि! स्वस्ति, स्पृशतु चरणस्ते भुवं नः सुताभ्यां
राष्ट्रापत्तिं क्षपयितुमिमे निर्मिता आश्रमा नः ।।७.७०।।

अनुरोधमिममादेशं मन्यमाना सीता द्वाभ्यां वनदेवीभ्यां विधृतात्मजातद्वया वाल्मीकेः पदमाशिश्रिये। अथ षष्ठे सर्गे —

सुतयुगसहिता विदेहपुत्री प्रसवनिकारमुदस्यतः प्रवातात् ।
विपिनपरिसरान्मुनेः पदं सा पितुरिव धाम परं शनैरवापत् ।। ६.१ ।।

सीता आश्रमपदे पृषतचटुलिकासु स्मितमुखी दृश्यते। तेन स्मितेन रामजाया मुनेः स्वयमेव पवित्रमपि धाम पावयति स्म। अत्रापि पतिव्रतासत्तमायाः पवित्रताया माहात्म्यं मुखरमिवावालोक्यते। अत्र सनातनः कविः प्रकाशयति शाश्वतं विश्वजनीनं सत्यम्—

अशिथिलचरणा पुरो व्रजन्ती मनुजनुषां ननु चेतनेतिहासे ।
प्रणयपरवशे! पुरन्ध्रि! सत्यं त्वमिह परार्ध्यसमर्पणैकभावा ।। ६.६ ।।

कालिदास आश्रमकन्यकानां रूपं शुद्धान्तदुर्लभं पश्यति। सनातनोऽपि

शुक–मृग–शिशुशावकैः परीता
शतशतधेनुधना समृद्धसस्या ।
विगतविभवविक्रिया च यस्मिन्
मुनिजनता क्षितनागरा चकास्ति ।। ६.१२।।

आश्रमपदे प्रशास्तुर्नास्त्यावश्यकता। कथमिति सनातनस्योत्तरम्–

इदमभिमतमेतदस्ति हेयं' मतिरियमस्ति जने जनेऽवदाता।
नरपतिनिरपेक्षमत्र हन्त प्रचलति येन नृरूप एव मेधः।। ६.१५।।

कीदृशीयं व्याख्या नरमेध–शब्दस्य?

कविना स्वकीयं भवनं कुत्र स्थाप्यमिति प्रश्ने सनातनो ब्रूते– 'यस्मिन् समाधिनाशिताधि ऋषिकुलं भवति तत्रेति'।

गङ्गातमसयोस्तटमीदृशमेव–

अधितमसमथाधिगङ्गमस्मि–
न्नृषिकुलमस्ति समाधिनाशिताधि ।
क्व नु खलु कविना स्वधाम कार्य–
मिति मतिरत्र हि निश्चितिं प्रयाति ।। ६.२१।।

कुशलत्वस्य व्याकरणमत्रैव शिक्षयितुं शक्यम्–

इह निवसति भक्तिरष्टमूर्त्तौ
रविशशिदीक्षितपञ्चभूतमूर्त्तौ ।
'कुशल' इति यतश्च यत्र शब्दः
प्रतिमुनि हन्त सदान्वितार्थ एव ।। ६.२०।।

वाल्मीक्याश्रमे सीतयापि मुनिव्रतं गृहीतम्– (६.२३–२४)

कतिचन दिवसानथार्यलक्ष्मीर्जनकसुता पृथुकौ लघू अपेक्ष्य ।
मुनिजनविनिवारिता श्रमेभ्यः कथमपि कृच्छ्रगतेव सा निनाय ।।

तदनु कुशलवेतिसंज्ञया तन्मुनिजनभूमिसदृक्षया कवीन्द्रात् ।
तनययुगलमुत्प्रकाश्य सीता धृततरुचीरयुगा मुनित्वमापत् ।।

लब्धमुनिदीक्षा सीता समाजशिक्षाव्रतं पालयति, कुटीरोद्योग–लाभमपि शिक्षयति। निजानि कार्याणि सा स्वयमेव संपादयति, न दर्शयति सा तत्र मनागप्यालस्यम् (६.४०)। सीता भुवि शेते। भूमिस्पर्शे च राष्ट्रमातुः स्पर्शस्य सुखं प्रतिपद्यते (६.४२), पितुर्गृहे शिक्षितं योगसमाधिं सीता तत्र कवेः पदे प्रत्यहमनुभवति। तस्मिन् तस्या आत्मा पत्युः सुखं लभते। (६.४३) ग्रीष्मशैत्ययोरुष्णशीतौ स्पर्शौ सीता योगशक्त्या सुखं सहते (६.४४), योगशक्तिप्रभावादेव सीतायाः नाडीचक्रे सीताया एवाधिकार आसीत् (६.४५), तत्र हेतुर्यमनियम–योरभ्यासः। अस्याः स्तनयोः क्षीरस्य मात्रापि तावती बभूव यावत्या सुतयुगली पर्यतुष्यत्, पर्यपुषच्च देहधातून् (६.४६), एतावभूतां प्रतिनिधी इव रोदसीत्रिलोक्याः प्रकाशसहिष्णुत्वातिशयाभ्यां सूर्य–धरिण्योर्विधृताभ्याम्–(६.४७)

रविधरणिसुताऽऽत्मजात–युग्मं प्रतिनिदधाविव रोदसीत्रिलोक्याः ।
निरतिशय–महः–सहिष्णुभाव–द्वय–महितं जनुषः प्रभृत्यदोऽभूत् ।।

वत्सयोर्वृद्ध्या माता सीतेव महर्षिरपि तुतोष–

प्रतिदिनमभिवृद्धिमश्नुवाना विरतिमिव स्वमतिः सुतद्वयी सा ।
जनकदुहितुरन्तरात्मतत्त्वं प्रथमकवेरिव तोषयांबभूवे ।।६.५२।।

वृद्धिर्गुणेष्वदृश्यत न केवलं पिण्डमात्रे–

अवयवपरिवृद्धिरात्मजन्मद्वितय उवाह गुणाभिवृद्धिलक्ष्मीम् ।
इति जनकसुता बभूव तुष्टा, भवति न पिण्डविवृद्धिरेव वृद्धिः ।।६.५३।।

वत्साविमौ पितुरङ्कशय्यां न लभेते इति मातरं दुःखाकुरुतः–

हृदय उदयमाप रामपत्न्या अतितरवत्सलता तथा व्यथापि ।
पतिहृदि निजवत्समाप्य नारी भवति हि तृप्ततमा स्वमातृभावे ।।६.५९।।

इदमपि क्लेशायैवास्ति यद् मनुप्रभृतिभिः पालितायामपि भुवि जनमतिः पूर्णं नाप विकासम्—

इयमिह शुच एव हन्त वार्ता मनुसदृशैरपि राजभिर्धृतापि ।
नगर-जनपद-प्रजा विकास-मधिभरतावनि सर्वथा न लेभे ।। ६.६२ ।।

भारतीये शिक्षाक्षेत्रे सदसत्त्वे न गण्येते। सति सति सति असत्यपि सत्त्वमेवोपजायते सरिति पतितायां शिलायां शिवत्वमिव—(६.६९)

असति सति, लघौ पृथौ च वृत्तिर्न विषमतामिह भारते प्रयाति ।
सति सति सति, यद्, विरुद्धवृत्तिः सरिति शिलेव शिवत्वमेति कच्चित् ।।

माता सीता विशदात्मासीदतस्तत्पुत्रयोरपि प्रकाश एव विचकास। अथ सीता तयोरुपनयनं चिकीर्षति। सा महाकविं वाल्मीकिम् उपैति। आसीदसौ मन्त्रद्रष्टा कविश्च—

तदनु च विशदात्मा सात्मनो ज्योतिषा, स्वं
तनयमिथुनमेतद् बोधवह्नौ विशोध्य ।
पुरुष—फल—चतुष्के जागरूकौ विधातुं
निरचिनुत गुरुत्वे दृष्टवेदं कविं तम् ।। ६.७१ ।।

सप्तमे सर्गे भवन्ति ५७ पुष्पिताग्राः षट् च मालिन्यः। कथानकत्वेनाऽत्र पुत्रयोः शिक्षणाय सीताया प्रार्थना, तत्र मुनेः शिक्षादर्शनम्, उपनयनञ्च। अद्भुता भवन्त्यत्र विचाराः। वाल्मीकेराश्रमस्त्रिवेणीतटमेव त्रिवेणी च 'ऋषि—मुनि—कवि'—तायाः। तत्रात्मलाभमकुरुतां द्वावपि वत्सौ, यथा भोट—नोपालाभ्यामात्मलाभं कुरुते भारती भूः—

इति सुतयुगली सा, सा च तस्याः सवित्री
ऋषि-मुनि-कवि-ताढ्ये धाम्नि तत्रात्मलाभम् ।
अलभत हिमशैले भारतीया यथा भूः
सह निजतनयाभ्यां भोटनेपालकाभ्याम् ।। ७.६३ ।।

अथाष्टमः सर्गः। तत्र प्रथमः श्लोकः

प्रतिपादितपुत्रा सा कवये दिव्यचक्षुषे ।
बभावर्पितशब्दार्था प्रतिभेव सुमङ्गला ।। ८.१ ।।

अस्मिँल्लघीयसिच्छन्दसि या भावप्रौढिर्या चौचित्यमेदुरा पदयोजना तत्र सहृदयैर्देया दृष्टिः।

महर्षिणा अपराया एव विद्याया अभ्यासो न कारितः, पराया अप्यभ्यासोऽभ्यर्हिततां नीतस्तयोर्बालकयोः। अपराविद्यायामासीद् युद्धविद्यापि, भगवतः शङ्करस्य वाहनभूते नन्दिनि शृङ्गमपि भवत्येवेति—

तदनु नियमशुद्धौ तौ परां चापरां च
प्रतिपदमुपदिश्य प्राच्यविद्यां कवीन्द्रः ।
अगमयत् पटिष्ठामस्त्रविद्यां च दिव्यां
न हि भवति वृषात्मा धर्म उत्सृष्टशृङ्गः ।। ७.५९ ।।

सर्वाणि शास्त्राण्यपि भवन्ति 'अपरायां' समाहितानि।

बालयोरनयोर्दायित्वधूरासीत् तथा प्राप्तप्रसरा यथा विष्णोर्वक्षसि लक्ष्मीः—

अनुशासितचेतःसु तेषु दायित्वधूरभूत् ।
पर्याप्तप्रसरा लक्ष्मीर्यथा वक्षसि शार्ङ्गिणः ।। ८.११ ।।

अथ समावर्त्तनसंस्कारश्चिकीर्षितः। तदर्थं कविना स्वकीयं यद् रामायणकाव्यं तस्याभ्यासः कारितः।

अथोपस्थितं दृश्यते दृश्यान्तरम्।

रामो दिग्जयव्याजेन राष्ट्रस्य सर्वासामपि दिशामैक्यं संपादयितुं प्रारभते हयमेधम्। तत्र नेता लक्ष्मणपुत्रश्चन्द्रगुप्तः। सैनिकास्तत्र सहयुज्वानः। तेषां वीरवादाः प्रकम्पयन्ति दिशः। हय एष वाल्मीकिपदमप्याप। वीरवादैश्चुक्षुभाते सीतासुतौ। तौ हयस्य ग्रहणमेव सदृशमुत्तरममन्येताम्। आरभत घोरं तत्र युद्धम्।

एकत्र केवलौ द्वौ बालौ, अपरत्र च सैन्यसागरः। ततः प्रथमं युद्धं कारुण्यमसूत। पश्चाद् यथा बालयोरसदृशं पौरुषमन्वभूयत तदा विस्मयशौर्ये अजायेतां विसृमरे। इदानीं सैन्यापेक्षया प्रबलौ दृश्येते स्म बालौ। सदृशं च तत्। युद्धे हि तत्राभियोज्याभियोक्तृभावमभजत् स्वयं भगवान् रामः। युद्धमिदमेकस्यैव सूर्यस्य प्रभा आदाय भास्वतोरादर्शयोरिव प्रावर्त्तत। तत्राभिभवस्य सर्वथैवाऽभावः, प्रत्युत प्रदीप्त्यतिशय एवावीवृधत्। नूत्नाभिरुत्प्रेक्षाभिश्चमत्कारवर्षामिव व्यतानयतात्र सुकविः।

अस्मिन्नेवान्तरे रामः शम्बूकप्रशमायागतोऽश्वमेधाश्वमप्यदिदृक्षत। वाल्मीकिपदमापेदिवानेष ददृशिवाञ्जृम्भकास्त्रव्याकोपम्। तद्धि तदेकायत्तमासीदासीद्वा तस्यैव सन्ततिगतम्। अद्भुतमासीदेतद् युद्धम्। अत्र योद्धृषु नादृश्यत कुत्रापि पक्षान्तरं प्रति प्रहारेच्छा। अभिनयसदृशमेवासीदत्र युद्धम्। न पेदेऽत्र पदं हिंसा, न वा रक्तपातः, संरम्भगाढता तु नाऽहीयत।

अश्वमेधस्याश्वं न्यगृह्यत, किन्तु नोदपद्यत तत्राङ्गहानिदोषः—

हृतेऽपि यत्र नाश्वेऽभूदश्वमेधक्षतिः, परम् ।
माहात्म्यं तद्धि रामस्य, तस्य वा महतः कवेः ।।८.४९।।

रामोऽनुबभूव वाल्मीकेराश्रमोऽद्य करुणास्पदमभूत्वा शौर्यो—त्साहास्पदमस्ति। महर्षिस्तमभ्यनन्दत्। एकान्ते स स्वनिर्मितं रामकाव्यं तस्मा एवार्पयत्—

कैवल्यधाम्नि तस्मिंस्तु काव्यपुंसे कविर्निजम् ।
काव्यं समर्पयामास बिम्बाय प्रतिबिम्बवत् ।।८.५७।।

बालानां दलद्वयं स्वं स्वं पूज्यमपद्यत। रामो महर्षिं प्रणनाम सूर्यश्चक्षुरिव। ऐकात्म्ये पराजयोऽपि स्वदते। सैनिका अपि तदेव पदं पेदिरे। अनन्तरमिमे समे वाल्मीकिपदं पेदिरे।

महर्षिणा संकल्पः कृतः। तेन तत्रापद्यन्त विदेहराजो जनकः, राममातृभिः सह महामुनिर्वसिष्ठः। नागराश्च सैनिकरूपेणासन्नेव तत्र। महर्षिणाऽऽयोज्यत तत्रैका सभा जनकस्तत्राध्यक्षः—

अध्यक्षतां श्रीजनकोऽत्र चक्रे परावरप्रत्यय—निश्चितार्थः ।
य आबभासे मुनिभिर्वृतोऽत्र यथात्मयोनिर्दिवि नारदाद्यैः ।। ९.८।।

यादृशी न कदाचिदघटत, न वा सम्भाव्यत घटितुम्।। प्रसङ्गेऽस्मिन् कविर्जात आसारी मेघ इव नवीनानामुपमानजलानां प्रवर्षणे (९.९—२२)।

सभास्थलस्य ब्रह्मस्थलेऽदृश्यत वनदेवताविधृतभूर्जपत्रावृतमेकं स्थण्डिलम्। अथ वाल्मीकिरुदतिष्ठदवोचच्च—

'मान्याः,

रामभद्रोऽश्वमेधं करोति। यज्ञो भवति रयिसोमात्मकः। रयिर्भवति यजमानपत्नी। रामभद्रश्चैकाकी। कीदृशमिदमनुष्ठानम्।'

यद्युच्यते 'ननु सीतायाः सुवर्णप्रतिमा, तां प्रतिनिदधीतेति, तत्र पृच्छ्यते 'सीतैव कथं नाभिषिच्यते यजमानपत्नीत्वे। यद्युच्यते सा विपन्नेति, तदिदं वचः पदेऽस्मिन् मोघम्, अस्मिन् पदे सती सीता विपत्तुं न शक्नुते। सैवान्विष्यतामिति।'

वसिष्ठेन संकेत एष मर्मतोऽगृह्यत, प्रार्थ्यत च कविः प्रसीद भगवन्! प्रकटय सीतामिति। कविर्ददर्श जनान्, जनशासकं रामभद्रं च। जनेष्वदृश्यत सीतादर्शनपरीवाहः, रामे पुनरश्रूणि—

न वाङ् न लेखो न सखा न चान्यन्निवेदनाय स्वहृदस्तदानीम् ।
उपार्जि राज्ञापि सुमानुषेण बाष्पप्रवर्षेण तु सर्वमूचे ।। ९.४०।।

महर्षिणा वनदेव्यो दत्तसंकेता अक्रियन्त। ताश्चापि भूर्जावरणं संवरयामासुः। अदृश्यत च तत्र कषायवेषा भगवती सीता माता भुवनेश्वरीव पीताम्बरेव वा। सभा देव्या अस्या आलोकशब्दैरापूर्यत।

जनकस्यापि हृदि समुदपद्यत महान् परितोषः। मातरः समुदच्छ्वसन्। जनाः सीतामिमां प्रीत्या भीत्या च प्रणेमुः। समयेऽस्मिन् भारतस्य स्थलवेदिः प्रजहर्ष, सागरपर्यन्ताया अस्या प्रत्येकं तृणमकश्मीर–केसरायत, भारताब्धिश्च पाटलजलैरिवापूर्यत, दिशां कुक्षयः सौरभैरापूर्यन्त–

तस्मिन् क्षणे सागरमेखलायास्तृणानि कश्मीरभवान्यभूवन् ।
अभूदथो भारतसिन्धुतोयं सुवासिताशं नवपाटलाम्भः ।। ९.६० ।।

प्राग्ज्योतिषो वङ्क्षुतटं यावत्, यावच्च त्रिविष्टपात् सिंहलकमष्टादशद्वीपशुभेयमार्यवेदिर्नवा वधूटीवादृश्यत शृङ्गारिता–

प्राग्ज्योतिषो वंक्षुतटानि यावत् त्रिविष्टपात् सिंहलकं च यावत् ।
अष्टादशद्वीप–शुभार्यभूमिर्वधूविभूषां नु तदाऽऽससाद ।। ९.६१ ।।

सीता समुदतिष्ठत् साञ्जलिबन्धा सर्वेभ्यः सविनयं प्रणनाम।

अथ व्यापकः प्रश्नः – **'सीता गर्भवती बभूव यदाऽयोध्यां त्यक्तवती। किं तस्याः फलमि'**–ति।

जृम्भकास्त्रप्रयोगतोऽनुमितमपि लवकुशयोर्मैथिलेयत्वमपैक्षत शाब्दीं श्रुतिं प्रामाण्याय। बालकौ च तौ सभाकाले शस्त्रशास्त्रा–भ्यासयोरेव निरतावभूताम्। कवेरद्भुतः प्रासादिकः श्लोकः– (१०.६)

आसन् कुमारास्तु तदा निजेषु स्वाध्यायशस्त्राभ्यसनेषु लग्नाः ।
य उत्सवाद् बिभ्यति शस्त्रशास्त्राभ्यासे स्वराष्ट्रं पिपुरत्यमी हि ।।

कुलपतिः शिष्टागमनावकाशमुज्जुघोष। चन्द्रकेतुः कुशलवावपि सभास्थलमानाययत। वृद्धसमागता इमे बालास्तान् प्रणमन्ति। चन्द्रकेतुः स्वपितुर्नामग्राहं प्रणमति, लवकुशौ पुनर्मातृनामग्राहमेव, पितुरज्ञानात्–

ननाम सौमित्रिसुतोऽर्चितेभ्यः संकीर्त्त्य नाम स्वपितुः, परन्तु ।
तौ पित्रबोधाद् बत मातुरेव नाम्ना प्रणामाय नतावभूताम् ।।१०.१३।।

सेयं करुणकरुणा स्थितिः कविनाप्युपनिबद्धा समनन्तरमेव–

वाक् साऽत्र सीताजनमानसेषु निःश्वासवीचित्वमवापदुच्चैः ।
अस्वत्वबोधेषु जनेषु किन्तु नेत्राम्बुधारावपुषा व्यगालीत् ।।१०.१४।।

अथ भगवान् वाल्मीकिः कथयति—(१०.१६)

पुत्रौ! श्रुतं यन्मम रामकाव्यं यस्तत्र रामः स हि राम एषः ।
या तत्र सीता ननु सैव सीता भवत्सवित्री, न तु काचिदन्या ।। इति।

पुत्रौ फलसदृशौ। कविरुद्यानपालमात्रम्। स्वामी श्रीरामः। रामश्च गुरौ वसिष्ठे सति पुत्रयोः परिग्रहे नोत्सहते। कविस्तत्र सावधानः —

रामस्तु नात्मानममंस्त योग्यं गुरौ वसिष्ठे सति पुत्रलब्ध्यै।

कथमिति चेदुत्तरम्—

ममत्वतो यद् विनियोग एव राष्ट्राय बालस्य सतां प्रशस्यः।।१०.२१।।

इयं हि राष्ट्रं प्रति जागरूकता कवेः।

अन्यस्यादृष्टमन्येन स्प्रष्टुं न शक्यमिति पारमेश्वरं विधानम्। अतः महर्षिर्वसिष्ठोऽपि रामस्य पुत्राविमौ रामायैवार्पिपत्— (१०.२३)

न यायजूकस्य परन्त्वदृष्टं स्प्रष्टुं कदाचित् क्षमते पुरोधाः ।
रामाय तद् द्वावपि बालकौ तौ वर्णाश्रमाणां गुरवेऽदिशत् सः ।।

रामोऽपि वाल्मीकिना दत्तविनयौ वसिष्ठेन प्रशंसितौ च तौ पुत्रौ योग्याविति इमावेव राष्ट्रपतित्वे योग्याविति च सप्रहर्षं प्रत्यपद्यत—

स चापि वाल्मीकिवसिष्ठदृग्भ्यां परीक्षितौ प्राप्य सुतावहृष्यत् ।
न पिण्डमात्रं नृपसन्ततीनामार्यावनौ राष्ट्रपतित्वमेति ।।१०.२४।।

अनन्तरं कवेः प्रहर्षोऽपि नितान्तमादरणीयोऽत्र (१०.२५—२९) पद्येषु। इदानीं दृश्यं परिवर्त्तते।

चन्द्रकेतुः सीतामुपैति। प्रणम्य निवेदयति चलन्तु भवत्यः साकेतमिति। प्रजापि तदेवोदघोषयत्—

मातः प्रसीद कुरु कैरवसोदरं नः
साकेतकं पदनखेन्दुमयूखहृष्टम् ।

एते वयं मधुकरायितुमत्र यस्मात्
सम्यक् क्षमेमहि चिरात् प्रभृति प्रतृष्णाः ।।१०.५८।।

इदं श्रुत्वा जनकः परां तृप्तिमविन्दत्, परमां तुष्टिं च भगवान् वाल्मीकिः — (१०.६०)

कविरिमामुपकर्ण्य सरस्वतीमतितरां विशदोऽभवदात्मनि ।
अनुशयः कलुषस्य विनिष्क्रयः सुजनताऽजनतापरुचिश्च यत् ।।
स जनको जनकोपपराङ्मुखो दुहितरं हितरञ्जित-भूतलाम् ।
जन-मनो नमनोदितपुण्यतमृतमथैक्ष्य बभूव कृतक्रियः।।१०.६१।।

वसिष्ठो धर्मशैथिल्यस्यात्यन्तमुच्छेदममन्यत—(१०.६४)

कुश—लव—प्रसवा तु निशम्य ता जनगिरो निजकीर्तिपरा अपि ।
समतया मतया विदुषां दधे श्रुतिमतीति मतीन्दुकलां शुभाम् ।।

राजा रामो व्यश्वसत् प्रजानां पूर्णे शिक्षितत्वे—

स नृपतिश्च पतिश्च सतां चितेरुपचितां रतिमेक्ष्य शुभग्रहे ।
जनपदेषु पदेषु च नागरेष्वमनुत ज्वलितामसतां चिताम् ।।१०.६३।।

सर्वेषां नीतिः सफलतामशान, किन्तु परिणामः? परिणामः कः? न सः, यं दुष्यन्तपरिगृहीता पुत्रवती शकुन्तला, सीतैव वा भवभूतेर— भुङ्क्त। इदं त्वद्भुततमम्।

सीता हि तस्य क्षणस्य महत्त्वमबुद्ध। अन्वभूदसौ यत् क्षणेऽस्मिन् पतिरप्युपस्थितोऽस्ति, पुत्रद्वयमपि सन्निहितमस्ति। स्थानं चास्ति तीर्थकल्पं महर्षेर्वाल्मीकेः। कर्त्तव्यं किमपि नावशिष्यते। इदानीं देहधारण— मनावश्यकमेवेति स एष तस्या एव समर्पणीयो यया दत्तः। सा च माता पृथिवी—

तस्मिन् काले पतिपित्रादेः सान्निध्यं
सूरेराद्यस्याश्रमतुल्यामथ भूमिम् ।

दृष्ट्वा, शिष्टं कृत्यमदृष्ट्वा स्वं चान्यत्
स्थूलं देहं स्वस्यै मात्रेऽदित्सत् सा ।।१०.६५।।

शिरःकपोतिकया विनयमार्दवेन सर्वेभ्यः कृतप्रणामा सा भूयस्तरां बबन्ध सुभद्रां पद्ममुद्राम्। कृतप्राणरोधा सा प्राविशद् अव्युत्थानाख्यं समाधिम्। तत्र यमानन्दमलब्ध सा स ह्येवासीद् रामः। राम एष तादृशो यस्मात् कदापि न भविता विरहः। नर—नारी—क्लीबत्वादितः समुत्तीर्णा प्रत्यवापदसौ साधारण्यमात्मनः।

वसिष्ठादयः प्रत्यैक्षन्त कतिचनाहोरात्रान्। यदा नापश्यँस्तां प्रत्यागतप्राणां तदा योगमुक्तो मृतो न भवतीति गर्त्तमेकं विधाय प्रोक्षितसुरभिपुष्पगङ्गोदके तत्रैव सीताशरीरं प्रत्यतिष्ठिपन्। पूजयित्वा च तामाच्छादयन् तीर्थमृत्तिकया। इदानीं सर्वे काला भेदमत्यजन्। रसलीनेभ्यः कीदृशो व्यक्तिभेदः कीदृशश्च कालभेदः?

इदानीं सीता युक्ताख्यो योगी जाता। वसिष्ठादयस्ता—मेतामस्तुवन्—

प्रतिष्ठेयं जाता निमि—रवि—महावंश—यशसां
प्रतिष्ठेयं जाता युगयुगकृते भारतभुवः ।
प्रतिष्ठेयं जाता श्रुतिमहति मार्गे कृतधियां
यदेषा देहेन स्थितिमधित मृत्युञ्जयभुवः ।।१०.७४।।

तस्याः कुटीरं सम्प्रति प्ररुदितमृगम्। तत्र प्रविष्टेन श्रीरामेणावापि सीतादेव्या स्वकरकलितं 'सीताचरितं' नाम काव्यम्। तस्यैवांश एको भवति काव्यमिदमस्माकं सीताचरितं नाम—

तस्यास्तस्मिन् प्ररुदितमृगे यद्धि शान्ते कुटीरे
काव्यं किंचित् स्वकरलिखितं राघवेणापि पुण्यम् ।

तस्यैकांशे चिरपरिचितेऽप्यर्पयन्नर्थजाती—
र्नूत्नाः 'सीताचरित'—विरुदोऽसौ कृती, सर्गबन्धः ।।१०.८१।।

कोऽर्थः? अयमेव यत् प्रवर्त्तनीया लेखनी नारीचरितलेखाय नारीहृदयं प्रविश्यैव।

तदिदं काव्यं समर्प्यते सीतामातुरेव पदकमलयोः, तस्यैवेदं मकरन्दमाध्वीकं यदेव विश्वसर्गबन्धे मषीकरोति विधिः। उच्यते चास्यानुजे 'स्वातन्त्र्यसंभव'—नाम्नि सर्गबन्धे—१.२ पद्ये

पादपद्ममधुश्च्योतं शिवयोः परयोः स्तुमः ।
सर्गबन्धमिमं येनाऽऽलिलेखिषति पद्मभूः ।। इति।

समर्पणाय बद्धः सुश्लोकः श्लोकबन्धः —

मातुस्ताभ्यां पदसरसिजाभ्यां कृतिर्मेऽर्पितेयं
यन्माध्वीकं व्रजति लिपितां विश्वकाव्यप्रबन्धे ।
अर्थत्रैधं दलपरिमलोल्लासिनी केसरश्री—
र्धत्ते यत्र, श्रयति पदतां किं च सा हंसकोक्तिः ।।१०.८२।।

२. कुमारविजयम्

अस्त्यस्माकं द्वितीयं महाकाव्यं कुमारविजयं नाम। अत्र भवन्ति सर्गा एकादश श्लोकाश्च ९०२।

किंप्रयोजनकमिदं काव्यमिति जिज्ञासिते उत्तरं तदेव यत् सीताचरितस्य विषये—'प्रतिक्रिये'—ति।

कालिदासीयं कुमारसंभवमष्टाभिरेव सर्गैः पूर्त्तिमशानेति सम्भवशब्दादेव स्पष्टम्। विरक्ताः खलु कृतविवाहा अपि निष्पुत्रा एव भवन्ति कामक्रीडायामरतेः। विरक्तोऽपि परमशिवः कालिदासेनाष्टमे सर्गे कामक्रीडाभिषङ्गित्वेनोपस्थापितः। एवं च तस्य वीर्येण तारकासुरमारक—शिवात्मजत्वं प्रत्यपद्यतैवेति कुमारजनिः सुविनिश्चिता जातैव। अतः परं

विराममेव लभन्ते लेखनव्यापाराल्लेखविदः सुकवयः। जैनकुमारसम्भव–महाकाव्यमप्येवमेव संभवोपपत्तिं यावदेव निरमीयत सुकविना। अथापि निर्णयसागरतः प्रकाशिते कुमारसंभवेऽष्टमसर्ग– तोऽग्रेऽपि दृश्यन्ते ९सर्गाः। सप्तदशसर्गात्मकत्वं ततोऽस्य प्रसिद्धम्। तारकवध ापर्यन्तमत्रेतिवृत्तम्। एवं च कुमारसम्भवस्यास्य तारकवधत्वं समजायत। तेन कुमारसम्भवमिति काव्यैकदेशमात्रसंगतं नाम। वस्तुतोऽष्टमतः परं यत् कथानकं तस्य पुराणमात्रोचितत्वं भवति, न तु काव्योचितत्वम्। तथापि लभ्यन्ते चेन्नव नवास्तत्र सर्गाः परीक्षणीयमेषां शिल्पम्।

परीक्षिता इमेऽस्माकं चिरञ्जीविना डॉ०सदाशिवेन। निष्कर्षतश्चा–नङ्गीकृतमेव भागेऽत्र कालिदासकृतत्वम्।अस्माकं तु प्रवृत्तिरत्र काव्योचित–त्वसंपादनायैव। योऽयमश्लीलोऽत्रांशः स प्रतीकत एव स्पृष्टः, काव्योचितैर्विशेषान्तरैस्तु काव्यमिदमापूरि। तथाहि काव्यारम्भः (१.१) –

शिवयो रमणोत्सवो य आसीद् रमणार्थं न स केवलं बभूव ।
मरणार्थमिदं तु तारकस्य विधिमार्गेण सनातनात्मना ।। इति।

अत्र प्रश्नः 'सनातनात्मा विधिमार्गः क' इति। अत्रोत्तरम् –

विधिमार्गत एषका सृतिर्नरनारी–शिवयोः स्मरागमः ।
तमिमं तु पुराणवर्त्मना कविताऽऽदर्त्तुमिह क्व वा क्षमा ।।१.२।।

क्षमा उचितेत्यर्थः।

यदा शिवौ स्मरवह्निकषायितौ जातौ तदा पृथिवीमूर्त्तित्वमिमाववापतुः।

भगवती शिवा पार्थिवार्धतां भेजे। तस्यां भगवानभिसन्निविवेश। सन्निवेशात् पूर्वं शिवः शिवायां वह्निरूपेण प्रविवेश, वह्निरेवैतयोः समागमसुखे विघ्नोऽभूदिति–

स हि बिन्दुवपुष्क ईश्वरो गिरिपुत्री–स्मरवह्निमाविशत् ।
कृतवान् स हि विघ्नमेतयोर्निभृतं तत्र कपोतवर्ष्मणा ।।१.४।।

ज्वलनोऽप्यसौ शिवांशरूपेण वह्निनाऽऽत्मनो भर्ज्जनामिवान्व–

भूत्। ततो रक्षणार्थं शम्भोरेव जलमूर्त्तौ प्राविशत्, नान्यमुपायमपश्यन्। गङ्गैव हि भागवती जलमूर्त्तिः। तामवगाहितुं प्राविशन्नृतुचक्ररूपाः षट् कृत्तिकाः। बीजमिदं तत्र गङ्गायामेव कृत्तिका एताः समक्रामत—

प्रविवेश तु कृत्तिकातनुः षडृतुश्रीस्त्रिदशापगापयः ।
स हि बिन्दुवपुः शिवस्तु ताः प्रविवेशाऽथ बभूव षण्मुखः ।।१.७।।

अष्टमूर्त्तिरसौ षट्सु कृत्तिकासु षण्मूर्त्तित्वेन परिणनाम। अन्यथापि जलशशिनोरभेदेन अग्न्यादित्ययोश्चाभेदेनाष्टमूर्त्तेरस्य षण्मूर्त्तित्वमेव संपद्यते। उच्यते कविना—

शिवयोरभिदैव भिन्नतामुपयाता स हि षण्मुखः सुतः ।
इयमेव सृतिर्मनीषिणां शिवशृङ्गाररसः स लौकिकः ।।१.९।।

शिवश्च शिवा चेति शिवौ, तयोर्लौकिकः शृङ्गारः कालिदासा—दिभिरुपनिबद्ध एव। पुनश्च भावमिमं विवृणुते कविरेष—

शिवया खलु रस्यते शिवः शिव एष स्वदते शिवामिमाम् ।
अनयो रसनैव सा परा प्रसरीसर्त्ति सिसर्त्ति वा सृतौ ।।१.१०।।

कीदृशीयमाध्यात्मिकी रसलीला? अत एव भागवतोत्तमानां महाभागवतानां स्वामिश्रीकरपात्राणामुद्गारः 'श्रीकृष्ण एव राधात्वं प्रतिपद्यते रासलीलायाम्, राधैव च श्रीकृष्णायते। अयमेव पर्यायो महाभावस्य।

अथ तारकासुरः कः?

अस्या रसनाया एव विपर्य्ययस्तारक इति प्रतिवक्ति कविः —

शिव एव हि तारकासुरं विपरीतक्रमणाभिधानकम् ।
यदि नाम हिनस्तु केवलश्चितिलोपः खलु हिंसनायते ।।१.११।।

एवं प्रथम एव सर्ग एकादशभिरेव प्रारम्भिकैरेव वैतालीयै—र्वृत्तैरात्मनो दर्शनं सनातनेन विवृतवपुरकारि। अयमर्थः — स्वरसप्रवृत्ता या त्रैगुणी सा हि सदृशप्रवृत्तिका, अस्या या रसचर्वणा सा खलु स्वभावो

भावानाम्। तस्या अस्या विपर्ययस्तारकः प्रतारकत्वावच्छिन्नोऽसुरः। तस्मादस्माद् यानन्दमयी संवित् तस्याः पृथक्त्वमात्रं धर्मस्य जयोऽधर्म– नाशोत्तरस्य। नाऽत्रापेक्ष्येतास्त्रशस्त्राभियोगो रक्तपातजनकः। अस्य तारकस्य प्रतारकः प्रकाश एव शिवस्वरूपः।

भगवान् स हि कृत्तिकात्मजो गिरिजातात्मतया तथैधितः ।
चकमे खलु यं समोऽपि वै पतिरूपेण कुमारिकाजनः ।।१.१५।। इति

प्रसङ्गेन कुमारो देवसेनानाम्नीं कन्यां व्यवोढ। सा च स्वयं पार्वत्या गृहकर्मणि शस्त्रविद्यायां च व्यनीयत–

सहितः स हि देवसेनया रिपुमुद्ध्वंसयितुं व्यचेष्टत ।
तृणराशिविनाशने क्षमो भवतीहाग्निकणोऽपि सानिलः ।।१.२५।।

कुमार एष देवसेनया सह शत्रूनुद्ध्वंसयितुं चकमे, किन्तु तारकासुरस्तं व्युपैक्षत शिशुरिति धिया। शिशुस्तु पञ्चभिरेव दिवसैः परिवृद्धिमाप–

ववृधेऽनुदिनं स कोऽप्यसौ शिशुरिन्दुः सितपक्षगो यथा ।
परिपूर्त्तिमवाप पञ्चभिर्दिवसैरेव तु युद्धकौशले ।।१.२४।।

तथापि तारकासुर एनं शष्पाधिकं नामंस्त–

स च तारकसंज्ञकोऽसुरः शिशुमेतं मनुते स्म सस्पकम् ।
पवनस्य तु वेगमात्मनो भुजयोर्वीर्यममन्यताऽभयः ।।१.२६।।

कुमार एष एकाकी ह्येव संख्यातीतैरसुरैर्युद्धं चक्रे। ते हि प्रौढाः असौ च शिशुः। अथापि न व्यकम्पतासौ युद्धात्। आसीदसौ दिव्यशक्तिभिश्शरैरिवात्मशक्त्यापि प्रौढः–

प्रधनं धृतवानसौ शिशुर्मनसि प्रौढवयः–शरीरकैः ।
असुरैरभयैरभीः प्रधीस्तिमिरैर्दीप इवाभिदीपितः ।।१.२७।।
अखिलैरपि दिव्यशक्तिभिः शरजालैः परिवारितो गुहः ।
निजमात्मबलं हि संयुगे विनियोक्ताऽसुरसंघसंहृतौ ।।१.२८।।

स हि वज्र इवाम्बुवाहगः सलिलेनापि वृतोऽभ्यवर्धत ।
रिपुशक्तिचयेन निर्भरं प्रहृतोऽप्यात्मबलेन शाम्भवः ।।१.३०।।
चितिमाहुरमर्त्त्यशक्तिकामचितं मर्त्यगुणां च वैदिकाः ।
अचितः खलु किं भयं चिते मृगयूथादिव सिंहसूनवे ।।१.३१।।

कविः शिशोः तारकबलस्य चोत्तराधमत्वप्रतिपादनाय कथयति कुमारो वह्निस्तारक– पक्षश्च तृणगुल्मः।

अभितः परितश्च तं शिशुं वरयेयुर्निखिलास्तु तारकाः ।
सुतरां स भविष्यति क्षमस्तृणगुल्मेऽग्निशिखास्य नाशने ।।१.२९।।

इत आरभ्य ५४पद्यं यावद् विविधाभिर्निश्चायिकाभिरुपमान–विच्छित्तिभिः प्रतिनवत्वं विभ्राणे काव्यरत्ने नूतनस्याप्यद्ययुगस्य चक्षुरुन्मील्यतेतराम्। रक्तपातनिष्ठुरता मृदुतायां निमज्जति ततश्च विलीयतेतरां निष्ठुरत्वं जिघांसया समम्। सेयं योगशास्त्रस्य प्रतिज्ञा– **'अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः'** (पा.यो.सू. २.३५) इति –

शिशुरेष परात्परः शिवौ वै,
शिवतामात्रमयस्तदीक्षणेन ।
अशिवा निखिलाः स्वयं प्रलीनाः
पशुपक्षिष्वपि हन्त हन्त दृष्टाः ।।१.५४।।

अथ यस्तारकोऽसुरस्तस्यापि चित्तं पर्यवर्त्तत–(१.५५)

शिशुमेतमवेक्ष्य तारका–सुरचित्ते ललितत्वमुद्ययौ ।
भुजगोऽपि हि रिक्तफूत्क्रियः शिवकण्ठं प्रतिपद्य जायते ।।

क्षण एष तारकासुरस्यायुषश्चरमः क्षण आसीत्। कथमिति प्रश्नं शमयति कविः–(१.५९)

क्षण एष तु तारकायुषोऽभूच्चरमो यच्छिशुरेषकः शिवोऽभूत् ।
शिवया सहभाव–वानिहासीच्छिव एव स्वयमाप्य साहितीं ताम् ।।

शिवयोरियं साहित्येव तारकाख्यो मन्त्रः काशीधामनि सततसुलभः—

शिवया प्रविरेचितः शिवः क्षणलेशेऽपि कदापि नेक्ष्यते ।
सहभावमिमं हि योगिनः कवयस्तारकतां नयन्तकि ।।१.६०।।

अग्रेऽपि प्रसरीसर्त्ति दर्शनमिदं काव्येऽस्मिन् (१.६१—७९)।।

तारकासुरविनाशस्यान्यदप्यस्ति कारणमेकम्। तच्च भौतिकेऽभ्युदयेऽतिशयिततातिरेकः। तदुच्यते—

प्रकृतिं परिवर्त्तयञ् जले स्थिरताञ्चञ्चलतामिव क्षितौ ।
अनलेऽपि च शीतलां सृजन्नतिरेकं गमितो विनश्यति ।।१.६८।।

तारकासुरोऽपि दोषमिममारूढ इति तस्यापि क्षयोऽन्तिकस्थितायते—

स हि तारकनामकोऽसुरः कविभिर्वर्णित एव तादृशः ।
अत एव च तस्य संक्षयक्षण एतर्हि निरूपितोऽन्तिके ।।१.६९।।

ईदृशी तारकस्य शक्तिर्यदनया सूर्यमण्डलमिव संपूर्णमपि ग्रहमण्डलमात्मविधेयं व्यधायि—

विधुमण्डलमस्य शासनात् प्रतिवारं परिपूर्णतां श्रितम् ।
उदगादथ पल्वलोद्गताः कुमुदिन्यो ननृतुः प्रहर्षतः ।।१.७१।।
रजनीष्वपि वासरायमाणास्वलभन्ततिविकासमम्बुजानि ।
सुरभीनभितश्चराचरेऽस्मिन् विसृजन्ति स्म सिते दलेऽसिते नु।।१.७२।।
पवनः परितः परिक्रमन्नतिशीतेष्वपि वासरेष्वभूत् ।
शिशिरो न, शुचौ करै रवेरिव चन्द्रस्य करैरपि श्रितः ।।१.७३।।
क्षितिरप्यसुनोत् सदा समानपि मुष्टीन् मधुपौषमासजान् ।
अथ तेष्वपि पञ्चगव्यजा न विभूतिर्न हि मूर्च्छनामगात् ।।१.७४।।
सकला अपि तस्य सीम्नि गावो गतबन्धाः स्म चरन्ति पीवराङ्गाः ।
न हि तेऽन्वभवन् हलग्रहं वै कृषिकृत्येन विना कृषिक्षणेऽपि।।१.७५।।

प्रथमेऽस्मिन् सर्गे तारकासुरः पार्थिवं वपुः प्रसादयामास। अथाष्टमूर्त्तेः शिवस्य द्वितीयं जलरूपं वपुः प्रसादयितुमारेभे। एतदर्थमसौ मेघोदरे निलीनां विद्युतं स्ववशे कुरुते—

पूर्वमेष जलदोदरसंस्थां विद्युतं दुहितरं सलिलानाम् ।
सञ्जिगाय च बभूव च तस्मादुद्यदुज्जलमहामहिमोच्चैः ।। २.२।।

विद्युदत्र सलिलदुहितेति व्याहृता—

पूर्वमेष जलदोदरसंस्थां विद्युतं दुहितरं सलिलानाम् ।
सञ्जिगाय च बभूव च तस्मादुद्यदुज्ज्वलमहामहिमोच्चैः ।। २.२१ ।।

विद्युतामधिगमेन, समन्ताद् योजनेन, नियन्त्रणेन च तारकासुरः सुरभुवोऽपि महिमानं क्षपयति।। २.२।।

स हि मरुभूमिष्वपि विद्युतामुपयोगान्मार्दवं जनयति, तेन तत्र भूमिर्भृशमुर्वराऽजायत—

मारवेषु स हि विद्युदन्वयात् स्निग्धतामगमदुर्व्वरां भुवः ।
तत्र तापमपि चन्त्रवायुभिः स्वानुरूप्यसुभगं व्यदधादसौ ।। २.४।।

तत्र तापमपि यन्त्रवायुभिः स्वारूप्यसुभगं स चकार।। २.४।। विद्युदेवागमानां त्वरिता शक्तिः। अस्या एवाम्बिकायास्तन्महो यद् भगवतो विष्णोरङ्गुलावङ्गुलीयकतां दधत् सुदर्शनचक्रं द्योतते—

यत् त्विदं त्वरितया पराम्बया सृष्टिचक्र उपधीयते महः ।
तत् सुदर्शनतयाऽभिजित्वरं दीप्यते हरिकरेऽङ्गुलीयकम् ।। २.६।।

विहायसि यदद्य विमानानि पक्षिवद् उड्डयन्ते तत्रापि कारणं भवति विद्युदेव—

ऊर्ध्वमूर्ध्वमधिरुह्य वैष्णवं धाम मध्यममनन्तविस्तरम् ।
पक्षिवत् खलु विमानमद्य यत् सञ्चलत्ययमहो महोदयः ।। २.८।।

संगणकयन्त्रं विद्युच्चेति द्वयं युगस्यास्य सत्फला नियतिः—

एतदेव जलतारकं युगं विद्युदस्ति यदियं जलात्मजा ।
अत्र संगणक—शक्तिबन्धुरा कापि हनत नियतिः समिन्धते।। २.१०।।

अस्या विद्युत एवायं प्रभावो यदिदानीं मनुष्यो देवलोकमिव सेवते—

तारकोऽद्य ननु मानवात्मना भ्राजते त्रिदिवभूमिमण्डले ।
सोऽसुरानपि हिनस्ति हिंसया लीढचेतस उदायुधान् घ्नतः ।। २.१२।।

तारकासुरं मारयति वस्तुतः मनुष्य एव। स एव हि सनियमानहिंसादीन् यमान् अनुसरति, परिहरति संतापात् (अहिंसा आदि) को नियमो लोकम्—

तारकस्य ननु रक्षसोऽन्तकस्तारकोऽस्ति मनुजो हि, यो यमान्।
आश्रयत्यथ च चेतसः श्लथान् व्यातृणेढि खलु संज्वरज्वरान्।।२.१३।।

अस्ति कश्चित् अन्योऽपि तारको यः प्रयुङ्क्ते आसुरीः शक्तीः। स एव विद्युताऽऽहन्यते

तारकासुरेण प्रयतितं कुमारं घातयितुं। किन्तु, स्वमेव सोऽजि—घांसत, विषद्रुमो यदि फलति तर्हि स स्वमेव शुष्यति—

तं विनाशयितुमुद्यतः स वै संव्यनाशयदिमं स्वमेव यत्।
सा हि कापि फलना विषद्रुमे, या द्रुमं हि खलु नाशयत्यकि।। २.२२।।

स कथं नश्येत् यस्य शिरसि रसमयी चन्द्रकला विराजते कामं सः स्यात् परिवृतः सर्पाणां गरलैः—

यस्य मूर्धनि विराजतेतरामैन्दवी रसमयी कलासुधा ।
तस्य नागगरलैरपि क्षतिः किं नु कुत्रचन भाव्यतेतराम् ।। २.२३।।

विद्युद्रूपं शिवं प्राप्य तारको निष्ठुरचित्तो जातः। प्रबलः सः दुर्बलानबाधत—

अत्यजत् परमसौ दयालुतां दुर्बलेषु सबलोऽपि सन् पपौ ।
तेन शोणितमपि स्वबान्धवानामपि स्मयकषायितान्तरः ।। २.३०।।

शनैः शनैः तस्यानया दुष्टतया संसारः अकम्पत—

सा ह्यमुष्य विषमा मन:स्थितिर्निर्ऋतित्वमभजद् यदा तदा ।
प्राणिमात्रमभवत् प्रकम्पितं भीषया जगदुपप्लवोत्थया ।। २.३१ ।।

गृहाद् गतः गेही पुनः स्वगेहं द्रष्टुं नाक्षमत। तं तारकासुरस्यासुरी शक्तिर्न्यगिरत्—

यो गतो गृहपतिर्गृहाद् बहिः स न्यवर्त्तत पुनर्न मानुषः ।
आसुरी क्षुदिममाशयद् भृशं तारकस्य जठरे प्रजाग्रती ।। २.३२ ।।

कौतुकागारे पत्या सह सुप्ता नवोढा तारकेणैवाऽभुज्यत निभृतम्। तस्या रक्तं स पपौ—

या च काचिदबलाऽस्वपन्निजे कौतुकावसथगर्भसद्मनि ।
तामसौ प्रसभमाजहार च प्रापिबच्च सुषमां तदङ्गगाम् ।। २.३३ ।।

तस्यानाचारमिमं संसारः सोढुं नाशकत्। सः भगवन्तं शिवं प्रपेदे रक्षणार्थम्—

विप्लवस्य ननु तां स्थितिं जगत् सोढुमाप न धृतिं गरीयसीम् ।
त्राणमात्मन इदंयुगे परं प्रार्थयत् प्रभुमिति स्वचित्तगम् ।। २.३४ ।।

तेन भगवान् शिवः प्रार्थितः भगवन् विश्वं त्वमेव सृजसि अतस्तस्य रक्षापि त्वयैव कर्त्तुं शक्यते। त्वं हि सन्ततौ सिसृक्षां द्रष्टुमिच्छति, तारकश्च तामेव सिसृक्षां बाधते, उच्छिनत्तीव ताम्। तस्मिन्नपि त्वमेव विराजसे अतः तारकस्यायं प्रहारो वस्तुतः त्वय्येव—

त्वं हि तत्र विनिविश्व तिष्ठसि त्वं हि तत्र चितिशक्तिरुज्ज्वला ।
तारकस्य खलु यो विपर्य्ययः स प्रहार इह वस्तुतस्त्वयि ।। २.३७ ।।

तारकासुरो देवालयान् चक्षुषापि द्रष्टुं नेच्छति। स तेषां विनाशे निरतः। वस्तुतस्तु भाव्यं तेन देवालयनिर्माणे सहायकेन—

मन्दिराणि भवते समर्पितान्यस्य चक्षुषि भवन्ति सूचिकाः ।
ध्वंसमेषु च दिदृक्षतेऽसुरो नो विनिर्मितिरमुख्य तुष्टये ।। २.३८ ।।

स: कामं यज्ञं वितनुते किन्तु तत्र तस्य प्रयोजनं विध्वंस: यद्यपि सोऽयं तस्य स्वस्यैव विध्वंसः—

यज्वतां व्रजति नाशवह्निषु क्षिप्नुरेष भुवनस्य निर्मितिम् ।
आत्मनाश-निपुणोऽन्यशातना-घातना-विशसनादिकोल्वणः ।। २.३९ ।।

कवेरुक्तिः—

अन्यो ह्यसौ रस इहास्ति न कोऽपि सत्ता—
स्वस्तित्व—सत्त्व—सहितो रसिकः कलावित् ।
भावः समोऽपि खलु यत्र विभाव एव
भावत्वशून्य—विगताङ्कुरबीजसूचिः ।। २.४० ।।

संसारे सर्वेऽपि पदार्था: विभावरूपा:। विभावा विगतभावा: भावत्वहीना: यत्र अङ्कुरणा न भवति(२.४०)। २.४१—४४श्लोका: सुभाषितोत्तमा भवन्ति। तेषु शाश्वतं सत्यं प्रदीपितं भाति। अत्र कवेर्विश्वास: यत् नियते: दुर्निवारत्वन्तु न नियति:। तद्धि विकल्पान्नातिरिच्यते—

कृपणति नियतिर्नितान्तवेगा मतिषु कुशाग्रिमभावभाक्षु तेषाम्।
अपगतकलुषासु चिल्लतासु फलतितरां खलु यद्गतासु शुद्धिः।। २.४५ ।।

भारतभूमि: पृच्छ्यते वद 'को नु त्वयि दोष: यत् त्वं सदैव झञ्झाकम्पिता तिष्ठसि। कदापि न लक्ष्यसे शान्ता'—

मनुजधरणि! को नु तेऽस्ति दोषो
यदिह कदापि न शान्तिरीक्ष्यतेऽद्धा ।
सततमिह वहन्ति झञ्झयाऽऽढ्या
मरुत उदस्तमहीरुहाः समन्तात् ।। २.५० ।।

अग्रे कथ्यते— भगवति वसुधे! त्यज्यतां त्वया वसुधात्वं अथवा सोढुं शिक्ष्यतां प्रतिदिनं वर्धमाना: यातना: असुराणाम्—

भगवती वसुधे! वसुन्धरात्वं त्यज निजमेतदुताऽसुरोपतापम् ।
प्रतिगृहमभिवर्धमानमुच्चैर्विषहस्वाऽद्मरतां गतं नृलोके ।। २.५१ ।।

वसुधे! त्वयि निवसत्सु केचन शान्ता:, प्रतिदिनमुषसि जपन्ति बुद्धिशुद्धिगायत्रीम्, केचन पुन: शवगर्तेषु पूतिक्लिन्ना: कीटशू– कैर्दश्यमाना: स्वपन्ति, यदापि जीविता: आसन् सर्वदैव करणवेगान् शमयितुं व्यग्रा अतिष्ठन्–

अनुदिनमथ ये शवस्य गर्त्ते क्रिमिभिरनुक्षणभक्ष्यमाणदेहा: ।
विपदमनुभवन्ति वेगमात्रं करणगतं क्षपयन्ति तेऽतिदीना: ।। २.४८ ।।

अद्यापि तेषां हृदयानि तथैव पच्यमानानि दृश्यन्ते–

तृणमपि खलु यस्तृणेढि चित्तं दहति तदीयमपि ज्वलन्निवाऽग्नि: ।
अनुशयजनितो हृदन्तरालगहनगुहापिहितोऽद्य भूमिलोके ।। २.५२ ।।

यदि सम्पूर्ण: संसार: एषामेव अधिकारे तिष्ठेत् तदा वसुन्धरा त्वं वसुञ्ज्वरा भविष्यसि। कियत् प्रबला वर्तते कवेरियं भविष्योक्ति:– (२.५३)

अयि तरलितचेतसाममीषां वशमुपयाति वसुन्धराऽसुराणाम् ।
भगवति! भविता वसुञ्ज्वराऽसौ वसुनि समेऽपि हि सञ्ज्वरं सृजन्ती ।।

कुमार: प्रार्थ्यते–

यदि महेशसूनुर्भवान् असुरसंहतियागे यायजूकायते तर्हि जगति विवर्त्तमानमेतं विपर्य्ययात्मकं प्रलयमाशु हर–

यदि भवति भवान् महेशसूनुस्त्वमसुरसंहतियाग–पायजूक: ।
हर जगति विवर्त्तमानमाशु दहनमिदं पृथिवीतलस्य घोरम् ।। २.५५ ।।

दहनमद्यज्वलनतया गृहीतम्। अथ कवेर्ब्रह्मास्त्रं पश्यन्तु–

स्तवनवचनमेतदस्मदीयं प्रतिपदमक्षरमेकमेकमुच्चै: ।
भिदुरयतु भवत्समर्थनाभि: परिगतमद्य कथं नु तारकेषु ।। २.५७ ।।

अस्माकं यदिदं स्तवनम् अस्य प्रत्येकमक्षरं वज्रं भविष्यति, यदि विश्वशक्त्याऽत्रभवत्याऽध्युष्टं भवेदि'–ति।। कीदृशोऽयमुद्गार:?

पश्यतु विश्वमेतद् एतद् विश्वकाव्यम्।

७२पद्यात्मकेऽस्मिन् सर्गे ५८तः ७२तमं पद्यं यावत् या कविता सा भागवती विस्फोटशक्तिरेव। तानिमान् मूलत एवावयन्तु सहृदयाः।

असुरध्वंसप्रार्थनामिमां शिवात्मजो भगवान् कार्त्तिकेयो मारणप्रयोगमिवाऽप्रियमपश्यत्। न च जग्राह तस्याक्षरार्थान्। अत्र विचारं कुर्वन्नेव स्कन्द एष धग्धगायमानगात्रः पवनात्मजो जातः। प्रत्यपद्यत स सलिलभावाद् अग्निभावम्। दर्शनानां सृष्टिविद्यायामारोहक्रम एषः।

तृतीये सर्गे तारकासुरोऽग्निमपि स्ववशगं चकार(३.१)। एतेनासौ घनं तरलं, तरलं च घनं कर्त्तुमक्षमत। यच्च लोहसारं क्षितेर्गर्भे तिरोहितमासीत् तदप्यसौ तारकः स्वर्णवदेव स्वहस्तगं चकार। स्मरन्तु अत्र भिलाई—इस्पातकेन्द्रम्, तत्र स्वर्णवदेव प्रवहति प्रणालिकाभिस्तरलं लौहजातम्।

प्रातःकाले सूर्य उदेति, सायन्तने चास्तमेतीति यन्नियतिचक्रं तस्य केन्द्रे स्थितास्ति दहनशक्तिरेव—

कुहूतिमिरहस्तिनं परिनिपात्य विष्णोः पदा—
दिमं करसहस्रकैर्ज्वरितविग्रहं गाहते ।
प्रभातसमये दिशं रविरिमां विहायेतराः
समा यदपि पूर्विकां तदपि हन्त वह्नेः फलम् ।। ३.९।।

एतस्मिन् प्रकरणे सर्वाण्यपि पद्यानि भागवतानीव, गभीरयथार्थानि ललितप्रवाहाणि प्रसादिकानि च।

वह्निरेव शिवललाटे तिलकति, तत्समकालमेवासौ चितिरूपतां प्रतिपद्यते भगवति नीलकण्ठतां च जनयति—

ललाटतिलकायितुं प्रयतते यदोषर्बुध—
स्तवेश! शतमन्युभिर्भवति वन्दितोऽसौ तदा ।

तदा तु बत का कथा व्रजति वह्निभावादसौ
यदात्मचितिरूपतामहह नीलकण्ठप्रियाम् ॥ ३.१३॥

अथ पद्यमिदं पश्यन्तु—

अनर्थति तु तारकोऽसुरपतित्वमासादितः
सदर्थति च यद् भवाननिशमेव तन्मारकः ।
क्व मारकति तारकः क्व च स मारकस्तारक—
त्यसौ कथनिका करे गुणनिकायते ते प्रभो ॥ ३.१६॥

कीदृशोऽर्थपाकः। समाधिमिव लभेरन्नत्र तान्त्रिका भावकाः।

दिशो दश भवन्ति। सर्वास्ता अद्वितीयमेकं यं गुणं बिभ्रति स भवानेव चितिरूपः। प्रतिदिशमेकमिति कृत्वा भवतामाननानि दश भवन्ति, ततो भवानपि दशाननो जायते, किन्तु रावणस्य विद्रावणो रावणः। तव नाम श्रुत्वैव रावणा अपि विद्रवन्ति दूरे। एवं कविः शाब्दीं केलिमपि काव्ये दर्शयति।

दिशः खलु विभास्वरा दधति गर्भमेकं स वै
प्रकाशमय—विग्रहो ननु भवान् हि, नान्यः परः ।
अतो दशमुखो भवान् भवति, किन्तु नो रावणो
जगत्त्रितयरावणो भवति रावणद्रावणः ॥ ३.२८॥

सर्वाण्यप्यप्सरांसि सुषमावति त्वयि जातानुरागास्तारकेण विघ्निते—च्छास्तं क्रूरं शपन्ति। तासां स्तनाः शुष्यन्ति। दुग्धदशनाः शिशवो रुदन्ति—

इमा हि खलु वारयत्यसुरतां गतस्तारकः
समा अपि ततस्त्विमाः परिशपन्ति तं तत्तथा ।
अमी हि शिशुकाः समे परिरुदन्ति दत्तेक्षणा
अलब्धपयसः क्षुधा किमपि मातृवक्षः स्थले ॥ ३.३६॥

सुरभयः स्नुतपयोधराः सत्यो यावद् वत्सकान् पयांसि पाययन्ति तावदेव भवन्ति तारककृपाणधारापातसूतद्वैधीभावाङ्किताः। धिगिमां

दुर्दशाम्। शिवः संबोध्यते 'शिव एवेश्वरः, तदुपासकाश्च महेश्वराः। अयं हि शुच एव विषयो यदिदमन्यायक्षणे तथाविधा त इमे सर्वेऽप्यत्र दृष्टिं न ददति।

उपस्पृशति यो भवन्तममुमीश्वरोऽसौ महे–
श्वरन्नपि स नाऽशितुं बलति तारकं मारकम् ।
भवानरुणतां गतः प्रथममेव विद्रावय–
त्युषस्तिमिरसंहतिं स्वपिति सौख्यतस्तच्छिवः ।। ३.४३।।

अग्निरूपस्तुतिमिमां श्रुत्वा कुमार–शिवः सिस्मिये। तेन देवगणैर्विचारितं सफलोऽस्माकं सन्नाह इति। किन्तु शिवस्य कुमार एष स्वीयां शक्तिमधिकमवर्धयत पवनात्मतां चाशिश्रिये–

अथास्य शम्भोस्तनयोत्तमस्य गुहस्य शक्तिर्ववृधे ततोऽसौ ।
व्यमूर्च्छयत् स्वां पवनात्मतां च प्रासेसिधद् विश्वविजेतृताश्च ।।४.१।।

भगवता हनूमता लङ्केश्वरो वायुशक्त्यैव नाशितः–

या फुफ्फुसद्वन्द्वगतास्ति वायोः प्रश्वासनिश्वासमयी विभूतिः ।
तामाश्रिता ये पवनात्मजास्ते न रावणान् रावयितुं न शक्ताः ।।४.२।।

प्राणायाम एव तद् रहस्यं येन कुम्भकर्णोऽकुंभकर्णायत, विभीषणो व्यभीषणायत, खरादयोऽखरायन्त। प्राणायामशक्त्यैवेषु ववृधे 'स्ववश'–त्वयोगः–

ये कुम्भकर्णाश्च विभीषणाश्च खराश्च येऽन्ये च वभूवुरुग्राः ।
तेषां समेषां बलमेकमेव प्राणेषु कश्चित् स्ववशत्वयोगः ।।४.३।।

प्राणायामस्य प्रगीता अत्र विभूतयः। तत्रोदोहरणं पवनात्मजत्वेन प्रतीतो भगवान् हनूमानेव। सर्वेऽपि संप्रज्ञातयोगे समानरूपेण दर्शितादरा दृश्यन्ते–

ये वैदिका यज्ञविधाननिष्ठा जैनाश्च ये पुद्गलिनो महार्हाः ।
ते, ते च ये गौतममार्गनिष्ठाः योगे समेषां प्रबलैव निष्ठा ।। ४.१६ ।।

गोपीकृष्णरासेऽपि स एष प्राणायामयोग एव शक्तिभूतः—

स एष योगो हि चराचरेऽस्ति वृन्दावनात्मन्यभिदृश्यमानः ।
रासेश्वरीत्वेन विराजते वै रासेश्वरो यत्र सनातनात्मा ।। ४.१८ ।।

योगादेव रावणो लङ्काधिपो जातः—

योगं तमेतं हि विभूतिमन्तं प्रसाध्य लङ्केश्वरतां प्रयाताः ।
के वा न पौलस्त्यकुलावतंसा यानीश एव क्षमतेऽधिकर्त्तुम् ।।४.१९ ।।

सीता मही। लङ्का स्वर्णः। मही यदा स्वर्णमयी क्रियते तदान्नेन हीनाः प्रजा नयन्त्येव क्षयम्। सेयं गाथा सीताया लङ्कायां स्थापनायाः। सर्वे देवा इदानीं भगवन्तं गुहं प्रेरयन्ते तारकनाशाय—

इत्थं स ईश्वरसुतो ननु कार्त्तिकेयः
संप्रार्थितः सुरगणेन पुनर्वितेने ।
हास्यं कपोलयुगलेऽमलविद्रुमश्री—
संशोभिते किमपि हन्त रहस्यदिग्धम् ।। ४.७८ ।।

ईश्वरांशो भगवान् पुनः प्रहसिताननश्रीरदृश्यत। एकतः शिवसुतः पुरातने रूपे समृद्धो समपद्यत, अन्यतश्च तारकोऽपि तथैव चतुर्षु महाभूतेषु वश्यतामादधे—

अथ सुरजनतायाः प्रत्ययायेश्वरात्मा
स शिशुरभिनिवृत्तो वर्ष्मणः प्रत्नाच्च ।
स्मययुतिविकृतात्मा तारकश्चासुरोऽभू—
दधिकतरमिदानीं जागरूकः क्षयिष्णुः ।। ४.७९ ।।

अथ पञ्चमस्य सर्गस्यारम्भः प्रथमः श्लोकः —

पृथ्वीं विजित्य च विजित्य च वारि जित्वा
वह्निं विजित्य च समीरणमेव दिव्यः ।

सूनुः शिवस्य चकमेऽम्बरमेकमेव
जेतुं दिशां तनुतलाम्बरमुज्ज्वलात्मा ।। ५.१ ।।

यत्र सर्वे ग्रहास्ततस्ततो विचरन्ति (५.२), यां वारिदा अपि समाश्रयन्ते यत्र पतत्रिण उत्पतन्ति, यत्र स्वर्गङ्गाः सुराङ्गनाभिर्वारि–विहारायाश्रीयते। तस्या वर्णनम्–

स्वर्गङ्गया प्रतिपदं प्रतिपन्नगात्रा–
ण्यृक्षाणि यानि परितः प्रतिभान्ति तेषाम् ।
गात्रेषु सन्ति च बृहत्तम–मान–भाक्षु
ज्योतींष्यनेकविवराणि परिप्लुतानि ।। ५.७।।

अचिद् की विभूति चिद् में विराजमान विराट् की सेवा करती ही रहती है। उसमें क्षणभर भी विराम नहीं आता। सेवा का फल कभी प्रसाद होता है तो कभी विषाद। पर यह सदा ही होता रहता है–

चेत्ये विराजं तमचिद्विभूतिः संसेवनाभिः सततोत्थिताभिः ।
प्रसादयन्ती च विषादयन्ती च क्व क्षणस्यापि कणे न दृष्टा।। ६.१२।।

तारक था घना अंधकार। इसी प्रकार वह कार्त्तिकेय था अत्यन्त प्रबल ज्योति। इन दोनों का साम्मुख्य हुआ करता है इन दोनों में छिड़ा युद्ध और यह युद्ध केवल क्षण भर चलता है–

स तारकः संतमसोत्तमोऽभूद् गुहश्च स ज्योतिरुदारशक्ति ।
साम्मुख्यमेतद्द्वितयस्य मध्ये युद्धायते स्म क्षणमात्रमेव ।। ६.२०।।

सबेरा हो जाने पर सूर्य उदित होता तो उस समय रात्रि का अंधेरा कितनी देर रुकता है? कुमार शक्ति के सामने तारक भी उतनी ही देर तक दिखाई दिया।। ६.२०।।

साम्मुख्यमाप्ते द्युमणौ प्रभाते या वान्धकारस्य गतिश्चकास्ति ।
तां तारकः प्रापदतीव शैघ्र्यादनक्षिकोषद्वयलक्ष्य–लक्षात्।।६.२१।।

तारकस्य तादृशे विरक्तपाते विलये देवा दुन्दुभीनाध्वन्ति–

इतः समाप्तिः प्रधनं विनैव तादृग्विधा तारकराक्षसस्य ।
इतश्च दिव्यध्वनितप्रपूर्त्तिर्व्योमाङ्गणे सिद्धजनस्य तस्य ।। ६.२२।।

महत्तमेन ध्वानेनैव तारकस्य क्षयः प्रत्येतुमशाकि। अयमेवार्थः पद्यमिदमेवं ददाति—(६.२३)

व्योमाङ्गणेऽभूद् यदसौ महीयान् ध्वानस्ततो विश्वसितान्तरङ्गैः ।
क्षयिष्णुताया उदरे प्रवेशः प्रत्येतुमैशिष्यत तारकस्य ।।

इत आरभ्य ४०तमं पद्यं यावत् काव्यविच्छित्तयोऽपूर्वायन्त, गुणः प्रसादः, रीतिः पाञ्चाली वा लाटी वा छन्दश्च वसन्ततिलकः कवेर्विसदृशं सामर्थ्यमुपस्थापयन्ति। सुभाषितकल्पमिदं पद्य मनुशील्यताम्—

येषां न हन्त हृदयानि समासजन्ते
रक्तप्रपातखुरलीष्विह यौद्धिकीषु ।
क्रीडारसस्त्वपर एव विराजते वै
तेषां कलान्तर—रसान्तर—सान्तराणाम् ।। ६.४२।।

इत आदाय ७४तमं पद्यं यावद् यत् सौराज्यमत्रोपचित्रितं तेन साम्प्रतिकं ह्यमरीकागतं केलिफोर्नियाक्षेत्रस्य सम्पन्नधान्यत्वं नयनपथ—माजिहीते।

नवीने (सप्तमे) सर्गेऽभिनन्दन्ति त्रिलोकीजनाः कुमारमिमं वाचिकैस्तैस्तैः। तत्र नृत्याङ्गनानां तत्तद्भक्तिमन्ति नृत्यान्यपि सङ्गति—मादधति। तत्र भगवान् गणपतिपतिरप्युच्चैः पुष्करमाहन्ति—

ननृतुरखिलभृंगैरंगनास्ताः सभावै—
रथ च रसमयीभिर्गीतिभिः संपरीताः।
ध्वनयति खलु याभ्यः पुष्करं पुष्कराग्रै—
र्गणपतिपतिरुच्चै कार्त्तिकेये स्म हर्षात्।। ७.२।।

स्वयं भगवान् शङ्करोऽत्र नटराजसंज्ञां चरितार्थयते

यदपि कटितटाभ्यां लम्बते स्माऽवदातं
सरसनयनयुगलं वै तत्र तासां वधूनाम्।
तदपि नयनयुग्मं राभसीतश्चकर्ष
स्मरललितहृदां नो दृष्टिभाजां न यूनाम्।। ७.७।।

रतिस्मरावपि आङ्गिकेषु विविधानि रेचकानि दर्शयतः

स्मररतियुगली तत् तन्तिम्बोच्छ्रयेषु
प्रथिमभरितबिम्बेष्वध्वरुक्षत् तदानीम्।
अथ च विरचयामासाऽऽसु तत्तानि लीला–
नटनविहृतिमुग्धान्यांगिके रेचकानि।। ७.८।।

स्वयं महामुनिर्भरतस्तत्र शिक्षते स्म नाट्यविद्याम्।
तत्र हेतुमुपन्यस्यति कविः शाश्वतिकमेव–

भरतमुनिरिदानीं लम्भितो जन्म कुत्रा–
ऽप्युदलसदिह लब्धुं नाट्यशास्त्रोपदेशम् ।
भवति निगमनाया आगमानां जनुर्यद्
भवति निगमना च स्फूर्त्तिमाप्ता स्वतो हि ।। ७.९।।

अभिनये मूलं लौकिकी स्पन्दनैव। सत्यमिदं कविर्वैखर्योपस्थापयति–

स्मरणमुपगतानां स्पन्दनानां समेषा–
मनुकरणविधानं जायते तद्धि शस्यम् ।
समुपजनयते यद् भावकानां मनस्सु
प्रतिनवरसभावव्यक्तिजातान् समाधीन् ।। ७.१०।।

कलासु नटनकलैव संपूर्णा कला। तत्रैव कलान्तराणामङ्गता मुग्धता च। उच्यते–

भजति ननु पदार्थः सर्व एवाऽत्र सत्तां
निपुणमभिनिविष्टः प्रातिभीतेव काञ्चित् ।

भवति न करुणापि क्रूरकारुण्यदुष्टा
भवति च रसनीयो मानसो भावपूरः ।। ७.१९ ।।

कविरत्राभिनवगुप्तं न न स्मरति—

अभिनवतितरां वै यत्र सर्वोऽपि गुप्तः
शिवरसमभियोक्तुं भुक्तये नायकः सन् ।
दधति खलु कलायां यस्य शङ्कूत्तमस्या—
प्यनुमितिशितिमानं रेचिता रोहणत्वम् ।। ७.२१ ।।

स्मरणीयमत्राभिनवभारतीगतोऽभिनवस्य घोषः—

ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं धीः पश्यति श्रान्तिमवेदयन्ती ।
फलं तदाद्यैः परिकल्पितानां विकल्पसोपानपरम्पराणाम् ।।
तस्मात् सतामत्र न दूषितानि मतानि तान्येव तु शोधितानि ।
पूर्वप्रतिष्ठापितवस्तुसिद्धौ नवप्रतिष्ठाफलमामनन्ति ।।' इति।

वृत्तीनां सत्तां सत्त्वशुद्धामुदीर्य रीतीनां दैशिकत्यमात्रमुद्दिशति

न खलु भवति शंका वृत्तिसत्वे यथा वै
भवति खलु समुत्थाऽसौ परं रीतिसत्त्वे।
न खलु भवति रीतिर् वाक्यनिर्माणयोगाद्
विविधविरचनात् सा भिन्नगात्री समासात्।। ७.२७ ।।

त्रिविधा या नाट्यमण्डपविरचना। तस्या अपि नाट्यवित् कविरत्र निपुणं स्मरति—

त्रिविधविरचनानां मण्डपानां शरीरे
यदपि भवति पीठं यच्च शीर्षं पटी ते।
विभजति यदि नास्ते सा ततोऽद्वैतमेवो—
ल्लसितिमुपगतं वै दृश्यमानं तयोः स्यात्।। ७.२९ ।।

पीठपार्श्वयोर्ये मत्तवारण्यौ भवति ते अपि कविः स्मरति, तत्र कुतपविधानं यथाशास्त्रं विहितम्।—

मार्दङ्गिकः कुतपमध्यगतो व्यराज–
न्नद्धावनद्धवपुराणयन् स्ववाद्यम् ।
ब्रह्मेव पिण्डयुगलीं दधदुद्यदार्ष–
ध्वानश्रुतिः सृतिलताङ्कुरतः पुरस्तान् ।। ७.३२ ।।

अथ च–

मार्दङ्गिकं सुषिरवाद्यकलानदीष्णो,
यद्वापि तं स च समन्वसरत् पटिम्ना ।
तत्ताधिनादमहितेन समन्वयेन
तेनाविरास रसनाविषयो रसः सः ।। ७.३३ ।।

नान्दीनां त्रेतामपि प्रतिनिबध्नाति शास्त्रवित् कविरसौ(७.३४–३५)।
'भरत'–शब्दस्य निरुक्तिमपि स्पृशति सुकविः–

यत् किञ्चिदस्ति भरतत्वमिहास्ति तस्मिन्
भावस्य चापि च रसस्य च तालकस्य ।
औचित्यभाजनतया प्रथिमानमाप्तः
कश्चित् समन्वय इति प्रवदन्ति सन्तः ।। ७.३८ ।।

उत्सवेऽस्मिन् शास्त्रार्थानां शुद्धिमुग्धामभिनीतिं निभाल्य कुमार एव न तुष्यति, कुमारस्य पिता स्वयं महानटेशोऽपि भगवान् तृप्यति–

तत् तादृशं निपुणिमातिशयेन युक्तै–
स्तत्तादृशेष्वभिनयेषु कृतं प्रयोगम् ।
दृष्ट्वा न केवलमभूद् गुह एव तुष्ट–
स्तुष्टोऽभवद् गुहपितापि नटाधिराजः ।। ७.४४ ।।

कलानामासां समाहार एष यन्नाट्यमिति भरतनाट्यशास्त्र–तद्व्याख्यातृवर्यगुप्तपादराद्धान्तोऽत्र परिभाषा जातैः सनातनेन प्रत्यपादि। प्रस्तुते च कथानके सर्वमिदं मेलयन् कविरसौ वक्ति–

एकत्र तारकमयं तिमिरं परत्र
तत्सामरस्यसरसं गुहसूर्यतेजः ।
आदाविदंद्वितयमप्यवलोक्यमान—
मासाञ्चकार पृथगेव परन्तु पश्चात् ।। ७.६९ ।।
पार्थक्यमापदनले घनसारभावं
निर्देहसौरभमलं प्रथयत् समन्तात् ।
सा ह्येव सिद्धिरिह लोकगते विताने
तामास्थितास्तु विलसन्ति शिवस्वरूपात् ।। ७.७० ।।

तारकासुरः पुनः प्रादुर्बभूव। तस्य प्रतिक्रियायां कविरब्रूत—

आसाञ्चक्रे समासामपि बत ककुभां संवितानेऽभिमाने—
नापूर्यान्तर्वितानं किमपि स तदा तारकाख्यः सुरारिः ।

एतेन भीतिः प्राचकटत—

प्राकट्यं प्राप भीतिर्हृदि च सुररिपोस्तस्य तीव्रस्य तीव्र्य ।
या वै नामान्तरं वै भजति मृतिरिति ख्यापितं विश्वपृष्ठे ।।

भीतिरेव मृतिपदवाच्येति कवेः सूक्तिरत्रादरणीया।

नवीनेऽष्टमे सर्गे कुमारस्यावयवानां परिपोषो दर्शितः।

यदा कुमारो यौवनं भेजे तदा तस्य कायकान्त्या नाशितानि तमांसि सुरलोककामिनीनां मनस्सु प्रच्छन्नानि जातानि

तदंगकान्त्या ह्यपसारितानि तमांसि नाशं न गतानि तानि।
प्रावीविशन्निन्द्रपुराङ्गनानामनङ्गबाणाऽऽकुलितेषु हृत्सु।। ८.५।।

कोऽर्थः? अयमेव यत् ताः स्मरकषायिता जाताः कुमारसौन्दर्ये।

कविः कामस्याङ्गहीनत्वं समर्थयते—

अङ्गेन हीनो नियतं स कामः

किमन्यथाऽसौ सुराङ्गनानां कुचाभ्यां निबिडे उरसि प्रवेशं लेभे। नासीत् तयोर्मध्येऽन्तरालम्। स्मरणीयं कुमारसंभवे पार्वतीवक्षसः समानं

घनत्वम्—

'अन्योन्यमुत्पीडयदुत्पलाक्ष्याः
स्तनद्वयं पाण्डु तथा विवृद्धम्,
मध्ये यथा श्याममुखस्य
तस्य मृणालसूत्रान्तरमप्यलभ्यम्' (कु.सं.) इति।

कामो न पश्यति वयः, न वर्णं, न गोत्रं, न धनं, न विद्याम्। स खलु पश्यति सौन्दर्यमात्रम्—

नासौ वयः पश्यति यातयामं वर्णं न गोत्रं न धनं न विद्याम् ।
पश्यत्यसौ केवलमेकमेव गुणं दृशाकर्षण—तर्पणाढ्यम् ।। ८.९।।

कियदिदं शाश्वतमिति सहृदया विमृशेयुः।

पश्यन्तु कुमारविजयस्य कविता कुत्र गच्छति—

मनो जविष्ठं नहि,
यो जविष्ठः स तस्य पुत्रः स्मरकामनामा।

कामो मनोज इत्यनर्थान्तरम्। कथमिति प्रश्ने समाधिः—

मनः क्रमं पालयते
स्मरस्तु क्रमेण हीनो हि शरीरभाक्षु।। ८.८।।

अतः परं कुमारविजये काव्यशास्त्रपरिभाषा आधारतां व्रजन्ति (८.१०) यो हि वीतरागः पुरुषस्तत्र कटु प्रहरति कुमारविजयकविः—

यो वै नरः सन्नपि वीतरागः कषायिता यस्य चितिर्न कामैः ।
नारी कथं नैव कृतो विधात्रा स एष हा हन्त नपुंसको वा ।। ८.१७।।
तदङ्गसृष्टौ व्ययमापिता या मृत्स्ना निरर्था खलु सापि जाता ।
व्यर्थव्यया वा विहतव्यया वा समानमानाः खलु तेऽर्थशास्त्रे।।८.१८।।

बहु व्याहृत्य परिवेष्य च कवितामधूनि सर्गान्त एष कविः सुभाषितमेकं प्रसूते—

या वै कलापरिभुजिर्न हि संयमं सा
बेभेत्ति,
वेत्ति परमं तु तया पुमांसम् ।
यः संयमी स रसिकश्च परात्परस्य
लीलानुरक्ति—परिभुक्ति—कषायितश्च ।। ८.८४।।

इदानीं सर्वे देवाः कुमारस्य जनकं भगवन्तं शिवं दिदृक्षमाणा—स्तस्य स्थानमुपयान्ति। द्रुतविलम्बितैरेकत्रिंशत्या, द्वाविंशत्या स्रग्धराभिः, सप्तदशभिर्वसन्ततिलकाभिः परिपूरयत्यत्र कविरर्थजातं कविप्रौढोक्ति—जनितम्। सर्गं प्रपूरयति। पश्यन्तु विदग्धा अत्र प्रौढिम्। का वाऽत्र विचारप्रौढिः, कीदृशो वा शाब्दो बन्धः, कीदृशश्चार्थ उपस्थानं लम्भिता भगवत्या कविप्रतिभया तदेतन्मूलानुशीलनैकवेद्यमस्ति, अलमत्र समीक्षाचापलेन।

अन्तिमे ७१पद्यात्मक एकादशे सर्गे पितृगृहं पतिपुत्रद्वयीसहिता भगवती पार्वती प्रयातेति तत्र योऽनन्यादृशो महोत्सवस्तस्य निबन्धः। अत्रैकादशे सर्गे माता पार्वती स्तूयते

अम्ब! त्वमेव धृतशङ्करविग्रहासि
त्वय्येव राजति चतुर्भुजतापि काचित् ।
त्वं ब्रह्मदेव इति यस्य शुभास्ति संज्ञा
तद्रूपतामपि दधासि समं सहैव ।।११.६४।।

पार्वती वाग्रूपेण चकास्ति, चकास्ति चार्थरूपेण परमेश्वरः। अनयोर्यत् साहित्यं स शृङ्गारः। स रसः। ततः प्रतिशब्दं काव्यता चकास्ति (११.६१)। उच्यते च— **साहित्यसृष्टिरियमस्त्यत एव साम्ब-**
स्येशस्य काचिदुपमानपराऽभ्युपास्तिः ।
सा श्रव्य-दृश्य-विधि-रीति-समादृता चे-
न्मातापि हृष्यति पितापि च जर्हषीति ।।११.६२।।

साहित्यमुपासितं चेत् समपादि ब्रह्मयाग:। उच्यते—

किं तेन यज्ञविधिना विविधैर्हविष्यै:
सन्तर्पितेन हरिणान्तरवस्थितेन/धिष्ठितेन ।
यस्मिन् हरि: प्रतिपदा प्रकटो विभाति
तस्मै तु काव्यकलनाय धृतादरा: स्म: ।।११.६३।।

प्रतिपदेति प्रतिपत्त्येति धृतार्थकं पदं भगवते पाणिनयेऽपि नास्ति नचमत्कारकम्। त्रैरूप्यमिव त्रैकाल्यमपि पराम्बाया एव तव लीला—

त्वामामनन्ति सुधियो गत—विद्यमान—
भावित्व—भावभरिते त्रितयेऽपि काले ।
एकात्मभावपरिपूर्णतनुस्त्वमते—
त्कालत्रयस्य परियन्त्रणमातनोषि ।।११.६७।।

देवा ब्रुवन्ति—

त्वामामनाम ननु केन समुच्चयेन
वाचामुदार—रमणीयतमेन मात: ।
तत्सर्वविग्रहतया यदसौ त्वमेव
व्यावर्त्तमानतनुवल्लरिका विभासि ।।११.६८।।

एकादशस्य सर्गस्यान्ते चत्वारिंशता पद्यै: कविरात्मन: परिचय—मुपनिबध्नाति, समुपसंहारपद्ये च स्वकाव्यगतान् विशेषानप्युपश्लेषयन् वक्ति— **प्रत्यग्रा कविता ममास्ति वपुषि स्वान्ते च**
नावश्यकौपम्यादि—स्थगिता,
न चापि रहिता वैशेषिकै: सद्गुणै:।
प्रत्यग्रं मम काव्यशास्त्र—कलनं प्राचीनमाश्रित्य यत्
तत्त्वार्थेन परिष्कृतं विलसति स्वैरत्वदोषोज्झितम्।।पृष्ठ १९९।।

सीताचरितं स्वातन्त्र्यसंभवं (१—३३) चेति यत् पूर्ववर्त्तिकाव्य—द्वयमस्य तयो: शिल्पमेवात्र शिल्पमिति च प्रतिजानाति, प्रतिजानाति च

स्वैरत्वमत्र विद्यते, किन्तु न दोषरूपम्, अपितु समाधिकृत्त्व–रूपमहत्तमगुणयुक्तम्। प्रारम्भे पीठिकायामपि भवन्ति ३७ पद्यानि। ४०+३७ = आहत्य ७७ पद्यानि सर्गान्तरमिवोपजनयन्ति। तर्हि गीतगोविन्दमिवानुहरति गीतिविरहितं पद्यगीतात्मकञ्च।

अत्र चान्द्री कला प्रतीकत्वेनादृता स्वातन्त्र्यसंभव इवैव। सा च शान्तिप्रसूः। रक्तपातविरोधः शान्तेश्चाराधना भारतीयस्य कविकर्मणः सर्वोत्तमं स्वम्। एतदुभयमत्र कविना कौशलेन निर्व्यूढमिति व्यधीयतास्य युगस्य प्रातिनिध्यम्।।

आवरणपृष्ठे काशीहिन्दूविश्वविद्यालये भगवतः स्कन्दकार्त्तिकेय–स्यार्चावतारो दत्तः, तस्यापि प्राप्तिः काश्यामेव जातेति शम्।।

३. स्वातन्त्र्यसम्भवम् (१–७५ सर्गाः)

महतः सर्गबन्धस्यास्यापरं नाम षट्साहस्रीमहाकाव्यमिति चतुष्षष्ट्युत्तराणि श्लोकानां षट् सहस्राणि (६०६४) भवन्तीति कृत्वा। अस्मिन्नितिवृत्तस्यास्ति आ झाँसीश्वर्या आ च डॉ० मनमोहनसिंहस्य प्रधानमन्त्रित्वार्धात् स्वातन्त्र्यसंग्रामस्य स्वतन्त्रस्य भारतस्य चेतिहासः। अत्र स्वातन्त्र्यपदं कश्मीरशैवागमिषु शिवस्य यो नित्यः स्वभावः तस्यापि प्रतिपादकम्। तच्च मोक्षकल्पमिति मुक्तिर्नाम पारतन्त्र्यात्, बन्धनाच्च मायाजनिताद् वेदान्तादिप्रतिपादितान्मुक्तिरिति। तदिदं द्वितयमप्यत्र प्रत्यपादि। स्वामिनो रामदेवस्य प्रच्छन्नां सुमहतीं संपदं प्रकाशयितुं, भ्राष्टाचारं समापयितुं च, लोकपालनियमस्य लोकसभया स्वीकारार्थमन्नाहजारेनाम्नः स्वच्छात्मनो वृद्धस्यान्दोलनेऽनशनव्रत–समाप्तिं यावत्। द्वादशदिवसव्याप्तस्य तस्यानशनस्य समाप्ति–रन्नाहजारेमहोदयान्दोलनस्यार्धं साफल्यमन्यत। तेनैव सार्धं काव्यस्यास्य पूरणम्, अग्रे वैषम्यातिशयस्य भावित्वात्।

महाकाव्यमिदं वस्तुतस्त्रिविक्रमं त्रिभिर्विक्रमैः पूरितत्वात्। तत्र प्रथमे विक्रमेऽभूवन्नस्य अष्टविंशति सर्गाः। द्वितीये विक्रमे तत्रैव नवीनाः षट् सर्गा योजिताः। तत्राष्टाविंशस्य पूर्वार्द्धं सप्तविंशे सर्गे, स्वस्तिवाचनशान्तिपाठादिमयमुत्तरार्धं च त्रयस्त्रिंशस्य सर्गस्यान्ते योजितम्। नवीनञ्चैकं सर्गं निर्माय १—३३सर्गीये हिन्द्यनुवादसहिते द्वितीये विक्रमेऽयोजि। तृतीयस्य विक्रमस्याप्यत्र त्रिविक्रमत्वमजायत। पूर्वं ७०सर्गेणैव पूर्त्तिरकल्पयिष्यत, तदनन्तरं भाजपासदस्येन जसवन्तसिंहेन पाकस्तानमधिकृत्य प्रकाशितस्य पुस्तकस्य सूचनां यावत्। ततः परं ७२सर्गा अजायन्त। तत्रापि नवीनाः केचन पूर्त्तिश्लोकाः दत्ताः। तदनन्तरमारभेतां रामदेवाऽन्नाहजारे—महोदययोरान्दोलनं, प्रकाशमुपेतश्च पद्मनाभमन्दिरादिषु गुप्तः सुमहान् हेमराशिः, अचोर्यत च तत्रैको देवालयात् कस्माच्चिद् भगवतः पद्मनाभस्यैव हेमविग्रहः। अलभ्यत च प्रशान्तपुरस्थस्य सत्यसॉईस्वामिनः सुविशालः सुवर्ण—समुच्चयः। एवंविधानि घटनाजातान्यपि काव्यकलेवरे निवेशितानीति भूयोऽपि सर्गचतुष्टयकल्पस्य सर्गत्रयस्य वृद्धिः। एवं १—७५सर्गा अत्र समजायन्त। येषु च सर्गेषु ७० श्लोकतो न्यूनाः श्लोका आसन् तेष्वपि ७०सर्गात्मकत्वं ततोऽधिकश्लोकात्मकत्वं वा समपादि। एतेनात्र ६०६४श्लोकाः। अन्ये ५००प्रायाः श्लोकाः पृथक् कृतास्तेषु नेतॄणां व्यक्तिगतस्य चित्रस्याऽप्रियत्वात्। अष्टाविंशस्य सर्गस्यैका भिन्नापि प्रतिर्मम संग्रहे मिलिता यस्यां प्रधानमन्त्रिणां क्रमो वास्तवात् क्रमादभिद्यत।

महाकाव्ये कश्चनाप्येको नेता प्रधाननायको वक्तुमशक्य ऋते नहेरोर्जवाहरलालात्। यद्यपि लालबहादुरशास्त्रिणोऽपि वृत्तं चरित्रं चाऽत्र नितान्तमुन्नतं तथापि प्रधाननेतृत्वं तत्र साधयितुं न क्षमम्, तस्य चरित्रे वैविध्यमात्रायास्तनीयस्त्वात्।

अत्र ये विचारास्तेषु रस एवैको न प्रमुखः, देशभक्तिरूपाणां भावादीनामपि बाहुल्येन विद्यमानत्वाद्, विद्यमानत्वाच्च रसाभासानामपि प्रथीयस्या मात्रायाः। तत्रालम्बनानि भवन्ति ते मन्त्रिणो ये भ्रष्टत्वेन कारागारेषु निरोधं सहन्ते, यैर्भुक्तयौवनाः कामिन्यो मारिताः, मारिताश्च स्वभोक्तारः प्रमदाभिः। अघटन्तैवंप्रायाः घटना एतस्मिन्नवधौ, प्रकाशमापिताश्च वृत्तपत्रेषु।

दार्शनिका विचारा अत्र तथा स्यूता यथा न तत्रासहजत्वं भाति। नूतना अर्चावतारा अप्यत्र कल्पिताः। तथाहि राष्ट्रस्य विष्णुत्वम्।

देवस्तुतयोऽप्यत्र गुरुतरां भावसंपदं स्नुवानाः गुम्फिताः। कमलामादाय जवाहरलालः कश्मीरान् गतः। तत्र महादेवगिरिशिखरमपि दृष्टवान्। शिखरस्यास्य गुहाभ्यः स्तोत्राणि व्युच्चरन्ति स्म। एवमेवेन्दिरा देवी श्रीवैष्णवीं द्रष्टुं गच्छति। सापि शृणोति तस्य गर्भगृहात् स्तोत्राणि प्रादुर्भवन्तीति। स्तोत्रेष्वेषु सहज एव दार्शनको भावः। तान्त्रिका अपि विचारा पुष्पे सौरभायमाणा इवाऽत्र निगूढाः।

केन्द्रीयं वक्तव्यमत्र विद्यते नियमोत्तराणां यमानां दीक्षा। सैवास्ति जननी मानसस्यानुशासनस्य, धर्म इति जैनबौद्धवैदिकेषु निर्विशेषं समादृतस्य। अद्यत्वे तस्यैवास्य दुर्बलत्वं समाजे विषायते। यमनियमयोः शिक्षैव सदाचारशिक्षा। उपदेश एष विविधेषु प्रस्तावेषु मन्त्ररूपेणो—पस्थितोऽस्त्यस्मिन् महति प्रबन्धे। तथाहि—

रात्रिर्यथा दिनमपि क्षणशो विधान—
संयन्त्रिते हि निखिलेष्वपि मानुषेषु ।
यद् वै विधानमिह यन्त्रणमस्ति धर्म—
नाम्नोऽनुशासनवरस्य यमात्मकस्य ।।१.५४।।
त्यक्त्वा यमान् सनियमान् न हि भूमिलोके
धर्मात्मकं किमपि वस्तु चकास्ति, ते च ।

विश्वम्भरस्य शुभवर्त्मतया समेषा–
मेवात्मधर्म इति मान्यतमाः पृथिव्याम् ।।१.५५।।

तत्र यमाः पातञ्जले दर्शने– 'अहिंसा–सत्याऽस्तेय–ब्रह्मचर्याऽपरिग्रहा **यमाः'** (२.३०)।

अत्र व्यासः–

अहिंसा सर्वथा सर्वदा सर्वभूतानभिद्रोहः (२.३० भाष्ये)।

सत्यं यथार्थे वाङ्मनसे।

स्तेयम् अशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्, तत्प्रतिषेधः पुनरस्पृहारूपम् अस्तेयम्।

ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः।

विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणम् **अपरिग्रहः**।

नियमाश्च तत्रैव– 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि। (२.३२)

अत्रापि व्यासः–

शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यम्, आभ्यन्तरं चित्तमलानामाक्षालनम्।

संतोषः सन्निहितसाधनादधिकस्यानुपादित्सा।

तपो द्वन्द्वसहनम्। द्वन्द्वश्च जिघत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च। व्रतानि चैषां यथायोगं कृच्छ्रचान्द्रायण–सान्तपनादीनि।

स्वाध्यायः मोक्षशास्त्राणामध्ययनं प्रणवजपो वा।

ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणम्।। ततः प्रत्त्यक्चेतनाधिगमोऽपि अन्तरायाभावश्च।। तथा विष्णुपुराणे (६.७.३६–३)।

एते यमाः सनियमाः पञ्च पञ्च प्रकीर्त्तिताः,
विशिष्टफलदाः काम्या निष्कामानां विमुक्तिदाः।।

एवमेव ५२सर्गे 'यम—परिग्रहः' प्रपञ्चितः विपरीतरीत्या। २४सर्गे अष्टमं बन्धं पश्यन्तु— **'अहं स्वतन्त्रः पटु प्रवक्तुं यमनियमानामर्थान्'** इति। यमनियमपदाभ्यां निर्दिष्टा अत्र पातञ्जलीये एव परिभाषे अनुपदमेवोद्धृते।

'सनियमा यमा एव धर्म' इति धर्मस्य सर्वमान्यं लक्षणम्। सर्वमान्यत्वं नाम वैदिकाऽवैदिकोभयसम्प्रदायमान्यत्वम्। तत्र भारतवर्षे बौद्धानां धर्मविषयिणीं श्रद्धां बुद्धवचनानां धम्मपद संज्ञया प्रमाणयन्तु, जैनसाधुः प्रणम्यते चेदाशिषं ददाति 'धर्मलाभस्ते भवत्वि'—ति। सेयं सर्वसंप्रदायसामान्या परिभाषा यद् धर्म इति। अस्या न केवले भारतवर्ष एव प्रचारः प्रसारश्च, प्रत्युत संपूर्णेऽपि पृथिवीपृष्ठे यत्रास्त्यस्तित्वं मनुष्यतायाः। यत्र 'समाज'—स्तत्र सर्वत्रापि मूलायतेऽनुशासनरूप आत्मसंयम एव। स एव च धर्मः।

धर्मगुरुर्नानकोऽत्र वर्ण्यते—

चक्षूंषि यस्य नितरां विपुलानि शान्त—
श्रीह्रीयुतानि ललितान्यभिकर्षकाणि ।
ज्योत्स्नावितानि च मुखाब्जमवालुलोक
लोको रसेन गुरुरत्र स नानकोऽभूत् ।।१८.६७।।

श्रीनानकदेवोऽस्माकं गेही शङ्कराचार्योऽभूत्—

पञ्चापभूमिसलिलाग्निमरुद्विहायः—
संघोत्थितत्रिपुरसुन्दर—मातृभक्तः ।
आसीदसावभिनवः खलु कोऽपि गेही
भिक्षुश्च शङ्कर इति प्रथितो गुरुर्नः ।।१८.६८।।

स्वातन्त्र्यसंभवे यः प्रथमः सर्गस्तं मन्यामहे महत्तमं पीठिकाबन्धं महत्तमाय काव्याय।

कविर्मगणत आरभत सर्गबन्धमिमम् 'वन्दे' इति। प्रणवोऽत्र श्लोकघटक एव। नमस्कारात्मकमत्र मङ्गलाचरणम्। प्रथमे पद्ये 'वन्द' इति, द्वितीये पद्ये 'स्तुम' इति, तृतीये पद्ये 'नम' इति, चतुर्थे पद्ये जयतिपदाक्षिप्त एष नमस्कारार्थः। एवं चतुर्भिश्छन्दोभि परमात्मानं प्रणम्य कविः षष्ठेन वृत्तेन काव्यस्यास्येतिवृत्तायावधानमामन्त्रयति विदुषाम्—

ऐतिह्यमत्र नैतिह्यमात्रं गीतास्विवाऽत्र नः ।
दर्शनं सांख्ययोगाढ्यमपि सम्यक् प्रतिष्ठितम् ।। इति।

सांख्ययोग—पदे पदत्रयं घटकी—भूतम् सांख्यमित्येकम्, योग इति द्वितीयम्, तृतीयं च सांख्येन सहितो योग इति 'सांख्ययोग' इति। सांख्यं ज्ञानम्, योगश्चानुष्ठानम्। एवं हि विज्ञातॄणामेवाऽत्र कर्मसङ्गिता। सम्पूर्णमेवं वैदिकं दर्शनम्। गीतास्विवेति श्रीभगवद्गीताऽत्र विवक्षिता।

पुराणमेव कलया परीतं सत् काव्यायत इति 'हेयोपादेये'—ति पद्येन अष्टमेन प्रत्यज्ञायि। अत्राधिकारिणः क इति प्रश्ने कवेरुत्तरम्—

तं सन्तः श्रोतुमर्हन्ति सत्त्व—स्वत्वाद्वयर्षयः ।
कवितात्मनि रेवाया महास्फोटेऽत्र राष्ट्रिये ।।१.१४।।

अयमर्थः ये सत्त्वविहीनाः सन्तः, ये वा मलिनसत्त्वास्तेऽत्र नाधिकारिणः। उभयविशिष्टानामेव सहृदयानामत्राधिकार इति।

ये प्रत्यग्रस्य द्वेषिणः पुराणैकपक्षपातिनां तेषां पुरोऽप्यानतमेव सनातनस्य शिरः, किन्तु, विमुखीभूयेति समर्पकं वचः (१.३१)।

यद्धि राष्ट्रं रागद्वेषरिक्तानां प्रतिभानां केन्द्रं तदेव राष्ट्रं राष्ट्रत्वावच्छिन्नमिति संयमशिक्षाऽनुशासनानुशासनञ्च भूमिकाभूतम्। द्रष्टव्यमत्र—

आर्येदनार्यमपि कर्मपथे प्रशस्ते धर्मस्य,
नास्ति खलु यः प्रभुताप्रधानः ।
प्रेमा हि तत्र परमार्थतया समेषु
जागर्त्ति, न स्वपिति कश्चन रिक्तकुक्षिः ।।१.५९।।

स्वातन्त्र्यमेकं स्वयमेव महद् दैवतम्।

स्वातन्त्र्यमस्ति निजतन्त्रणमेव पूर्वं
स्वेनैव दृष्टपरमार्थ–निजार्थकेन ।
यस्मै निजार्थतितरां तु परार्थ एव
स्वातन्त्र्यमत्र हि प्रसीदति, दैवतं तत् ।।१.६१।।

भारतीयो नागर उद्बोध्यते–

प्राणान् नियम्य कुरु चेतसि मानुष! त्वं
स्वं ध्यानमेष खलु कस्त्वमसीति नित्यम् ।
भूतेष्वभूतति भवानभवँस्तु भूतो
भूतेश्वरस्त्वमसि हालहलस्य पाता ।।१.६३।।

स्थिरधीर्गीतायाः परम आदर्शः। स्वातन्त्र्यसंभवस्य पद्येऽस्मिन् स एष एवमुपस्थाप्यते–

हालाहलं न गरलायति प्रत्युतैतत्
पीयूषति स्थिरमतौ सुभगे मनुष्ये ।
उद्वेगमञ्चति न यं विषमे प्रहर्षो–
द्रेकश्च संपदि स वै स्थिरबुद्धिको ना ।।१.६५।।

स्वस्य तन्त्रणमेव निकषः स्वातन्त्र्यलाभाय–

अ–स्वं जिघृक्षति न यः पतितं स्वमार्गे
स्वातन्त्र्ययोगपटिमाऽतिशयोऽत्र दृश्यः ।
आवश्यकादधिकमर्जितुमस्तरागे
यद्वा, तदेतदुभयं निकषः स्वतन्त्रे ।।१.६७।।

अपरिग्रहो नामाधिक ग्रहः, आवश्यकादित्यर्थः। अर्थममुमुपनिबध्नाति कविरेषम्—

नो सञ्चयोऽधिकतमस्य धनस्य तस्मै
रोचेत हेमकुलशैलभरो नु मूर्ध्नि ।
संवित्तुला गणयतेऽधिकमाशु तस्मै
यस्मै विकारितुमलन्त्वमियर्त्ति भूतिः ।।१.७२।।

या हि चिद्वधूः संयममिमं हृदा पिपर्त्ति सैव हि पिपर्त्ति स्वातन्त्र्यस्य गुर्वीं धुरम् (१.७३)। अत्र पद्यम्—

इमं तु निजसंयमं हृदि पिपर्त्ति या चिद्वधूः
सदा खलु बिभर्त्ति सा परतमां स्वतन्त्रां धुरम् ।
इतः पृथगिहास्ति नो भरतभूतले संमता
स्वतन्त्र-परतन्त्रता-प्रभृति तर्हि वाग्ग्लापनम् ।।१.७३।।

स्वातन्त्र्यं खलु कालिदासभाषया स्वहस्तधृतमातपत्रमेव— यथोक्तं दुष्यन्तेन— **'राज्यं स्वहस्तधृतदण्डमिवातपत्रम्'** (शा. ५.६) इति। स्वातन्त्र्यसंभवेऽप्युच्यते—

स्वातन्त्र्यमेवमिह हस्तधृतातपत्रं
क्लेशाधिकी लसति तत्र तथा न सौख्यम् ।
तस्मै स्पृहा भवति हन्त तपस्विताया
दीक्षाव्रतस्य वरणस्पृहयालुतैव ।।१.७५।।

पीठिकामेवमाबध्य कविर्वन्दते। किं वा दैवतम्? स्वकीयां पञ्चप्रशाखीम्। का सा। ननु स्वकीयं पञ्चाङ्गुलं लेखनीयुतं पाणिपल्लवमेव। किं तद् दद्यादिति प्रश्ने कवेरुत्तरम्—'यामाश्रिता काचन सूक्तिदेवी, विवर्त्ततेऽर्थात्मतया स्वयं ही'—ति—

वन्दामहे पद्मदलाभिरूपां पञ्चप्रशाखीं कविनायकानाम् ।
विवर्त्ततेऽर्थात्मना स्वयं हि यामाश्रिता काचन सूक्तिदेवी ।। २.१।।

अथवा तां निर्झरिणीमप्यक्षरमालिकासवित्रीं कविरसौ प्रणौति—

नमामि तां निर्झरिणीं कवीनामाकाशगङ्गां नु विशुद्धिमुग्धाम् ।
यत्कुक्षिसूताऽक्षरपद्ममालां वाग्देवता श्रीरिव मूर्ध्नि धत्ते ।। २.२।।

अत्र निर्झरिणी 'Fauntainpen' वाच्यैव।

अथ रहस्यं प्रविशति सुकविः कालरात्रिं प्रणमन्—

तां कालकालीमथ रात्रिरात्रिं नुमो हृदा काञ्चन कालरात्रिम् ।
हिरण्यगर्भश्रियमुत्प्रसूते या पुष्पलक्ष्मीं नु वसन्तलक्ष्मीः ।। २.३।।

अथ वन्द्यते भारतवर्षविष्णुः—

आ दक्षिणाब्धिप्रसरं सुमेरोर्मूर्ध्नो धरां व्याप्य समुल्लसन्तम् ।
अब्धित्रिवेणीप्रणताङ्घ्रिमूलं वन्दामहे भारतवर्ष—विष्णुम् ।। २.७।।

अन्ते कविरेष स्वातन्त्र्ययुद्धाग्नियज्ञे हविष्यायमाणान् वीरानपि प्रणौति—

वैदेशिकव्याधशिलीमुखेषु लाजप्रवर्षेष्विव सञ्चरन्तः ।
राष्ट्रं निजं ये पिपुरत्यमीभ्यो नमो नमो वीरवृषाकपिभ्यः ।। २.८।।

'नमोनम' इति द्विरुक्तौ विलसन्तितरामसंख्या अर्थाः।

अथारभ्यते झाँसीश्वरीजन्मवस्तु। काश्यां सा लक्ष्मीर्जन्म भेजे। काश्याश्च प्राणा माता भागीरथी। तामेवादाय 'काव्यवस्तु' स्वात्मानं लभते— **'पादद्वयीचारिशरीरधारिन्नि'**—त्यत आरभ्य 'वेदार्थशास्त्रार्थे'—ति त्रयस्त्रिंशं पद्यं यावत् काशीं वर्णयन्।—

सा विश्वनाथस्य पुरी विशाला गीर्वाणवाणीकलितालवाला ।
मोक्षप्रसूः कल्पलतैव साक्षाच्छुकैश्च हंसैश्च धृतप्रवाला ।। २.२४।।
अस्यां सदा जाग्रति हन्त तिस्रस्त्रिमार्गगा निर्व्यभिचारसङ्गाः ।
भागीरथी चामरभारती च स्वातन्त्र्यदात्री करुणा च शम्भोः ।। २.२५।।
छात्रालयीभूतसमस्तगेहा विद्यालयायन्ति हि यत्र रथ्याः ।
काशी न सा कापि पुरी पुराणः स विश्वविद्यालय एव मुक्तेः ।। २.२६।।

ग्रन्था न यस्यां लिपिपत्ररूपास्ते ह्यत्र विज्ञानमया हि कोषाः ।
ग्रन्थालयायन्तकि तेन यस्यां स्वयंप्रकाशा विबुधा, न गेहाः ।। २.२७।।
गाङ्गं जलं यत्र धनं परार्ध्यं विश्वेशपूजैव हि यत्कुसीदम् ।
यल्लेखरूपाश्च भवन्ति वेदाः स्वतःप्रमाणाक्षरबन्धभेदाः ।। २.२८।।
अत्राऽस्ति विश्वेश्वर एव राजा मातान्नपूर्णैव हि यस्य कोषः।
उत्कर्षसीमा खलु साऽस्य राज्ये कोषः स्वयं यद् वृणुतेऽत्र भिक्षुम्।। २.२९।।

अथात्रैव सर्गे झाँसीश्वर्याः शिशुत्वयौवनारम्भौ वर्ण्येते वीराङ्गनानुरूप्यं रक्षता कविना।

सा गारुडानां जपमालिकासीन्मन्त्राक्षराणां कथमन्यथाऽसौ ।
व्यसोढ साम्राज्यविषं परेषामाशीविषाणामिव काँश्चिदब्दान् ।। २.७१।।

अङ्ग्रेजैः सार्धमैक्यमासीत् कठिनमिति युद्धमारभ्यत तान् अपाकर्त्तुम्। भारतीयत्वं हि यमनियमाभ्यासाश्रितम् (३.१४–२२)। अभ्यास एष पाल्यते सम्पूर्णेऽपि भारते यस्य सीमाऽस्ति दक्षिणे भारताब्धिः (हिन्दमहासागरनामा) उत्तरे हेमकूटाचलः सुमेरुर्नाम, पश्चिमे बालुकाब्धी राजतरङ्गिणीप्रसिद्धः, पूर्वस्यां च प्राग्ज्यौतिषम्–

यां दक्षिणाब्धिश्चरणाम्बुजाते यां हेमकूटोऽचल उत्तमाङ्गे ।
यां बालुकाब्धिश्चरमे दिगन्ते निषेवते ज्योतिरिवोदयाङ्गे ।। ३.२३।।

चारित्र्यदृष्ट्या–

यद्रामकृष्णाववतारमुख्यौ परार्थमुख्योऽप्यथ यद्दधीचिः ।
हिंसाऽनृतस्तेयपरिग्रहेभ्यः प्रच्यावयन्ते समुदीर्णकामान् ।। ३.२४।।

पाश्चात्त्याः पुनर्हिंसादिष्वेव प्रसक्ता अस्मद्विपरीताचाराः। झाँसीश्वरी विरोधमारब्ध। तस्या दाढर्याय श्लोक्याः श्लोकाः–

गान्धारराजस्य सुतेव साध्वी पाञ्चालराजस्य सुतापि यस्याः।
यथार्थयत्यक्षरशोऽभिधानं महीति पृथ्वीति वसुन्धरेति।। ३.३३।।

आसां समासां बल-वीर्य-धैर्य-स्थैर्यश्रियां संघटनेन कच्चित्।
लक्ष्मीमिमां ब्रह्मविदां वरिष्ठो ब्रह्मा व्यधात् साध्वसवीतचित्ताम्।। ३.३४।।

लक्ष्मीरियं पृष्ठप्रतिबद्धवत्सा दुद्राव तत्याज शरीरं गोपाद्रिदुर्गे। तदा—

काशी प्रचुक्रोश रुरोद तारं प्रयागराजो व्यलपच्च काञ्ची ।
यद् धर्मभूमाविह पीवरत्वं दधावधर्मो हि तटस्थताख्यः ।। ३.३८।।

दुर्गासप्तशतीमनुशीलयामः। तस्या मन्त्रः संघशक्तिरेव—

'असङ्घशक्तिर् महिषासुरीयैर् बलैर् विलङ्घ्येत मही'—ति गाथा।
न हि प्रथां नो भजतेऽत्र राष्ट्रे मृकण्डुसूनुग्रथिताऽर्थशास्त्रे।। ३.३९।।

ऐक्यस्य मन्त्रमिदं भारतीयैर्युवभिः प्रत्युषसि नियमतोऽजप्यत।—

ऋजुकुटिलगतीनामध्वनामध्वनीना
भरतभुवनधात्रीस्तन्यपीना युवानः ।
परिणतवयसां तामान्तरैक्याभिधाना—
मुषसि रतिपरीताः सामिधेनीं प्रजेपुः ।। ३.५२।।

अथ काशीतः कविस्तीर्थराजं प्रयागं प्राप्तः। माघमेलारुचिरं प्रयागं स विस्तरेणावर्णयत्। तत्र माघमासे समवेतास्तपस्विनो वर्ण्यन्ते—

छन्दांसि शास्त्राणि च मूर्त्तिमन्ति त्रैगुण्यतीर्थेऽवतरन्ति यस्मिन् ।
प्रत्यब्दमेवोत्तमतापसानां व्याजेन माघे विविधव्रतानाम् ।। ४.११।।

तीर्थराज एष जले चलोऽपि अक्षय्ये वटे स्थिरो लक्ष्यते—

अस्याङ्कलक्ष्मीः पुरुषार्थजातिः कृत्स्नाऽपि, कल्पद्रुम एष एव ।
जले चलो यः स हि तीर्थराजः स्थिरत्वमत्रैव तरौ दधाति ।।४.३२।।

तीर्थराजस्यास्य सर्वतीर्थोत्तरत्वाय कविः कथयति—

वृन्दावनानामयुतानि यस्मै वाराणसीनां नियुतानि यद्वत् ।
सौभाग्य-निःश्रेयस-सन्निपात-श्रेष्ठाय नन्नन्ति परत्वधाम्ने ।।४.५५।।

प्रयागे दानस्य महिमाप्युल्लिख्यते जागरूकेण कविना—

धनक्षयोऽक्षय्यधनायमानश्चतुष्किकां यां खलु हेमपुण्याम् ।
प्रतिप्रसूतेऽत्र सहस्रनेत्रव्रजोऽपि तिष्ठासति हन्त तस्याम् ।। ४.६७।।

अत्र मोतीलालस्य गृहलक्ष्म्यां स्वरूपरान्यां जवाहरोऽजनि—

स्वरूपरानीदयितस्य मोतीलालस्य सारस्वतभूसुरस्य ।
वंशाङ्कुरस्तत्र जवाहराख्यो लेभे जनिं हंसवदातमूर्त्तिः।। ४.७१ ।।

तं च कश्मीरलक्ष्मीः कमलोदवोढ

तं नेहरूगोत्रसुमेरुशृङ्गे विभ्राजमानं सुरशाखिराजम् ।
हिरण्यवर्णं हरिणी सुवर्णा कश्मीरलक्ष्मीः कमलोदवोढ।। ४.७२।।

अनुरूप एष विवाहः। तत्र प्रसन्नः कविः सानुप्रासमुद्गिरति—

सदृशघटनानेदीयस्त्वं पुराणतमः पिता
युवकयुवतीसंयोगाख्ये मखे चिरविस्मृतः ।
यदनुगुणतामेतामस्मिन् द्वये परिक्लृप्तवा—
नहह कुशली तस्मिन् कश्चिद् घुणाक्षरतानयः ।। ४.७५।।
भवति यदि वा तस्मिन् भाग्योदयो विरलोदयो
ननु रतिपतेर्हेतुर्योऽसौ शरीरमपि त्यजन् ।
परमशिवयोर्द्वैतातीतां सुरासुरवन्दितां
कथमपि कृती प्रीतिस्फीतां रतिं समजीघटत् ।। ४.७६।।

नेहरूदम्पत्योः सौभाग्यश्रिया इव गात्रश्रिया औचित्यगभीरं वर्णनं १—१९पद्यैः कृत्वा पूजितः कविना महाकाव्येऽपरिहार्यो भगवान् शृङ्गाररसः। तत्र ५.१९ तमं पद्यम्—

तां दिव्यकान्तिं युगलीं स्मरन्तो निवेशिताः स्मो मधुमासलक्ष्म्याम् ।
शृङ्गारमात्रेण, न नीतिरीत्या चितिस्तु नस्तुष्यति यातयामा ।।

इति। अन्यत्र यातयामत्वं दोषः, दाम्पत्यसौभाग्ये पुनर्गुणः। मधुमासारम्भक्षणे सूर्यरथो मलयपर्वतात् प्रालेयपर्वतं प्रति परावर्त्तते।

तस्मिन्नृतुसन्धौ भारतवर्षे या परमा श्रीस्तां वर्णयते कवीन्द्रः—

गोधूमभूमाञ्जनमेचकानि प्रोत्फुल्लसत्सर्षपपाण्डराणि ।
क्षेत्राणि दद्युः परमाय पुंसे चित्राणि वासांसि नु चैत्रमासे ।। ५.३७ ।।
एकत्र भूमण्डलशाटकन्ति क्षेत्रेषु सस्यानि शुकद्युतीनि ।
अन्यत्र चोष्णीषपटन्ति वृक्षाः सपत्रपुष्पा दिवि वासवस्य ।। ५.३९ ।।

अत्रैव साहित्येऽन्यत्रास्मृतनामानं सुदर्शनं वर्णयन् कविः शृङ्गारस्य सुमेरुमिवारोहति। मोचाक्षुपान् वर्णयन् कविस्तेषां हरितविस्तृतान् स्वस्थयुवकसंपुष्टमेरुपृष्ठविस्मारकान् पत्रोत्तमान् रुचिरं चित्रयति (५.५५—५६)।

५.५६पद्ये कविः कथयति यद् वटपत्रशायी भगवान् बालमुकुन्दो मोचाक्षुपाणामायतविस्तृतानि पत्राणि दृष्ट्वा कल्पान्तकाले तान्येवा— श्रयितुमैषिषत्—

कल्पान्तकाले समुपस्थितेऽहं वटस्य पत्रं न पुनः श्रयिष्ये ।
निशाम्य पत्रं विततं कदल्या व्यमृक्षदित्थं नु शिशुर्मुकुन्दः ।। ५.५६ ।।

'पद्मा'—पदवाच्या लक्ष्मीरपि कदलीपत्राण्येवाश्रयितुमिच्छति—

सञ्चारसातत्यसपीडपादा पद्मा न पत्रे यदवाप पाद्मे ।
शय्यासुखं तत् सुखमश्नुतेऽसौ रम्भादलेष्वायतविस्तृतेषु।। ५.५७।।

वनज्योत्स्ना नाम 'नेवारी'वल्लरी। तामपि कविः प्रस्तौति—

यं पुष्पसंभारमपारगन्धं ज्योत्स्ना वनानां दधिरे दलेषु ।
स शङ्खशुक्तीरधिबुद्धिकोषं व्यापारयन्मारकते विताने ।। ५.६० ।।

अमुं सौभाग्ययोगमधिगम्य स्वर्गलक्ष्मीरपि शच्या समं भूलोकं प्रति धावति— (५.६१)

ज्योत्स्ना विधोर्ज्योत्स्निकया वनानां व्यधायि सौरभ्यमयी यदानीम् ।
अधावि नाकं प्रविहाय लक्ष्म्या शच्या समं हन्त भुवे तदानीम् ।।

सनातनस्य दर्शने मधुलक्ष्मीर्हि अस्मितायाः स्वातन्त्र्यलक्ष्मीः। तां लक्ष्मीं

चित्कला केवलेन वसन्तसमयेनैव चुम्बति— (५.६५)

प्रासादिकं चेतसि वैभवं यत् स्वातन्त्र्यलक्ष्मीर्ननु साऽस्मितायाः ।
तां चित्कला चुम्बति केवलेन वसन्तकालेन नमो नमोऽस्मै ।।

अथ दृश्यं परिवर्त्तते—

इदंक्षणे प्रादुर्भावमाप भगवती सिसृक्षा। पटिष्ठा सा लोकविधौ। सा ह्येव विधातुराद्या दयिता। अविद्यावधूट्या म्रदिष्ठमिदं स्फुरणम्।—

अत्रान्तरे लोकविधौ पटिष्ठाऽविद्यावधूट्याः स्फुरणा म्रदिष्ठा ।
विधातुराद्या दयिता सिसृक्षा मुमूर्च्छ विश्वेषु शरीरभाक्षु ।।५.६६।।

सेयं सिसृक्षैव संसिसृक्षात्मना परिणमति। ततश्च—

लता द्रुमैः कैरविणी द्विरेफैर्मृगी मृगैः पल्वलिनी सरोभिः ।
दिगङ्गनाश्चापि कुलाचलेन्द्रैः साकं परीरम्भसुखान्यवापुः ।। ५.६७।।

अथ च

हृत्पद्मसद्मा ननु कापि पद्मा पद्मापतेः स्तम्बकुलानि यावत् ।
विराजमाना परिलक्ष्यतेऽन्तश्चितावियं काचन संसिसृक्षा ।।५.६८।।

संसिसृक्षाया अस्या अन्वय एव प्रियो, न व्यतिरेकः। एतदुच्यते—

अस्यै व्यतीरेकयमस्य दंष्ट्रा नासीत् प्रिया हन्त कदापि साध्व्यै ।
तामन्वयेनाविरतप्रसारेणैषा प्रजानां प्रसभं भनक्ति ।।५.७२।।

तां यमदंष्ट्राम्।

अत्र ६९—७९ इत्येतानि यानि दश पद्यानि गर्भप्रागभावमादाय गर्भाधानं गर्भधारणं चाधिकृत्य निर्द्वयान्येव सादृश्ययोजनायाम्।

षष्ठे सर्गे मातुरानन्दमय्या वर्णनमुदारतरम्। अथ संसारस्य मिथ्यात्ववादिनोऽत्र प्रत्यादिश्यन्ते। ६.१८।। दर्शनाचार्यवरा आकार्यन्ते—

रे दर्शनाचार्यवराः! मनीषां युष्माकमेतां लघु शोधयन्ताम् ।
सृष्टौ विसृष्टिं नु विसृष्टिगात्रे सृष्टिं न या पश्यति तर्कशुद्धाम् ।।६.२१।।

गर्भिण्याः स्वप्नाः स्वगतस्य सत्त्वस्यानुभावातिशयं द्योतयन्ति। तान् कविरत्रापि प्रत्युपनिबघ्नाति(६.३१—३८)। पद्येषु स्वप्ना इमे प्रत्युपनिबद्धाः। गर्भस्थितः सत्त्वः परब्रह्मणः कलेत्युच्यते

यश्च प्रतीक्ष्यः खलु कोऽपि सत्त्वस्तां कुक्षिरत्ने श्रयति स्म गूढः ।
स वै प्रतीक्ष्येष्वखिलेषु पुंसामाद्यः, परं ब्रह्म स एव सद्भ्यः॥ ६.४२॥

अथ पृच्छ्यते गर्भः—'जननीगर्भगमनात् पूर्वं त्वं क आसीदि'—ति। तत्र भवाञ्चितिरूप आसीदित्युत्तरे भूयोऽपि प्रश्नः सखण्डा वासीच्चितिः अखण्डावेति। आद्ये पक्षे चितेश्चितित्वमेव खण्ड्यते, चितेरखण्डताया एव सिद्धान्तितत्वात्, खण्डानि भूतेषु संभवन्ति न तु चितौ, चितिर्हि सर्वभूताधिपतिर्विभूतिर्भवति—

आद्ये चितित्वं परिहीयतेऽस्या भवन्ति भूतानि हि खण्डितानि।
चितिर्न भूतत्वधिया विमान्या सा सर्वभूताधिपतिर्विभूतिः॥६.४५॥

अथ प्राप्तो ग्रीष्मर्त्तुः। तस्मिन्नृतौ प्रयागराजे भगवान् तिग्मरश्मिः प्रखरतरोभवति, अतो जवाहरलालो तमेतं समयं शारदादेशस्य उत्पला—द्रावतिगमयति। गिरिरेष महादेव—शिखर—नाम्ना व्याह्रियते—(७.१)

अधिशुचिदिवसं प्रयागराजे प्रखरतरो भवति स्म तिग्मरश्मिः।
अतिगमयति वासरानमूँस्तत् स खलु जवाहरलाल उत्पलाद्रौ॥

भूतधात्र्यामसावपरदिशः श्रितकुङ्कुमं वक्ष एव। अत्र भगवान् ईश एव कवितात्मना निगमरसान् रसयति—(७.२)

अयमिह गिरिरस्ति भूतधात्र्यामपरदिशः श्रितकुङ्कुमं नु वक्षः।
इह रसयति साम्ब ईश उच्चैर्निगमरसान् कवितात्मना प्ररूढान्॥

इहैवाऽचले सोमानन्दो नाम महानाचार्यः शिवसूत्राणि स्थिरयामास समुदकीर्णयत च तानि शिलासु, अत्राक्षराणि मणिरचितान्यभूवन्— (७.३)

इह पशुपतिनाम्नि धाम्नि सूत्रं स्थिरयति कश्चन सोम एव शैवम् ।
दृषदि तत उदेति यत्र कश्चिन्मणिखचिताक्षर–गर्भकोऽभिलेखः ।।

इह वचोऽधिदेवी स्फटिकशिलाफलके किं नु तन्त्रं न पिपठिषति। तस्या विपञ्ची कवितामयी। सा पञ्चमेन रागेण कं वा रसं न रसयति– (७.४)

पिपठिषति न किं नु तन्त्रमस्मिन् स्फटिकशिलाफलके वचोऽधिदेवी ।
रसयति कवितामयी विपञ्ची रसमिह पञ्चमरागतो न वा कम् ।।

स्वयमुत्पलाचार्य एवात्राभिनवमुप्ततया प्रकटति, स्वं शिवं विभाव्य। अत्र शुकशिशुहस्ता माता शारदा स्वयमेव दर्शनानि प्रयच्छति– (७.५)

अभिनवतितरामिहोत्पलाख्यः कविरुपगीय निजं स्वरूपमीशम् ।
उपसरति तमेव शारदाम्बा शुकशिशुमण्डितपाणिपल्लवाऽसौ ।।

माता सा स्वर्गलोक–कविः। सा हि मृगमदवासितेन कुसुम्भवर्णेन च पटाञ्चलेन रागजनितान् मलान् स्वकीयेनैव करकमलेनापा–करोति– (७.६)

मृगमद–परिवासितेन सेयं सपदि कुसुम्भरुचा पटाञ्चलेन ।
त्रिदिवकविरपाकरोति रागादधिनयनाञ्चलमुद्गतं मलं नः ।।

अत्र या धवलता दृश्यते नास्ति सा चन्द्रे, न काशे, न वा कुन्दे। नित्ये समाधौ साऽस्मान् निमज्जयति – (७.७)

विशदिमनि शशाङ्ककाशकुन्दद्युतिमुषि कुत्रचनाद्भुते चितिर्नः ।
प्रलयमतितरामुपेत्य तान्तिं त्यजति भजत्यथ शान्तिमत्र नित्याम् ।।

अत्र सुलभोऽस्त्यरुणवर्णो द्राक्षासवः, तेन पूर्णे पात्रे प्रतिफलितानि दृश्यन्ते मातुरेव पद–पङ्कजानि– (७.८)

अरुणतरमिहास्ति गोस्तनीनां शिशिररुजं विरुजत् तदच्छमम्भः ।
भजति कमलतां यदङ्कपाल्यां प्रतिफलितं चरणाम्बुजं शिवायाः ।।

अत्र पर्वते करणजातम् आत्मनश्चाञ्चल्यं त्यजति, तथैव यथा नीलकमलं प्राप्य भ्रमरः अथवा मातुः स्तनकूटं शिशुः—(७.९)

करणकुलमिहाद्रिराजशीर्षे भ्रमरकुलं नु विनिद्र उत्पलाङ्के ।
भवति ननु निलीन—चापलीकं शिशुरिव मातुरुपेत्य दुग्धकूटम् ।।

इदानीं जवाहरेण कमला प्रोक्ता— 'निर्वर्णय किं भवत्यत्र! अत्र हि सनातननामा कविः पुष्पिताग्रा—हरिणीभ्यां कवयति, पुरुषार्थास्तत्र ललितललितो विषयः। स्वयं भगवती प्रतिभैतत् सर्वं घटयति, यदिवा कविताक्षरैर्वसन्तसमय एव कवेर्ललाटे तिलकं ददाति(७.११—१२)—

कवयति जनतेयमत्र गण्डे सुरवचसां प्रतिभोत्थितैर्वितानैः ।
अतितर—ललितान् पुमर्थबन्धानयि कमले! विमले क्षणं धयैतान् ।।
घटयति हरिणीं सपुष्पिताग्रामिह खलु कोऽपि कविः सनातनात्मा ।
तिलकयतितरां स्वसन्निपातैः सपदि वसन्त इमां यदक्षरेषु ।।

अतः परमत्रैव सर्गे सुलभाः २०पुष्पिताग्राः, ६वसन्ततिलकाः, २३हरिण्यः, पृथ्व्यश्च २३' एवेत्याहत्य ७२पद्यानि, येषु नास्ति कुत्रापि गतिरोधो नापि चानुभूयते वेगभङ्गः।।

अत्र ७.६८ ध्येयम्—

इदं न खलु कृत्रिमं किमपि काव्यमस्मिन् हहा
महाचितिरपि स्वयं नटति चित्तविद्रावणाम् ।
इह क्षण उदित्वरो भवति वासरेऽपि स्फुटो
विहस्य विधुरर्चिषां शतशतैः करालः कटुः ।। इति।

अथ जवाहरलालो 'भारतमाता ग्रामवासिनी'—ति संस्कारेण तत्रैव सस्यश्यामलां ग्राम—महीं पश्यति। तत्र ग्राम्याणि शाकानि फलितपुष्पितानि दृष्ट्वा हृष्यति। अत्र ग्रामाञ्चले प्रसिद्धानां

शाकवनस्पतीनां नामानि वैपुल्य लम्भितानि। नामास्ति सर्गस्य ग्रामटिकेति। ७४संख्यकेषु पद्येष्वत्र ७२वैतालीयानि शार्दूलविक्रीडित—मेकमेका च मालिनी। शार्दूलविक्रीडितमत्र पुरस्तादुपस्थापयति समग्रां भारतीयां भूमिम् — (८.७३)

कृष्णश्मश्रु—पदाभिधानमहितैर्यत् पूर्यते शालिभिः
सौरभ्येण महीयसा सुरपदं दूर्वाधिराजैः समम् ।
तस्मिँश्चङ्क्रमतां न वाञ्छति मनः स्वर्गौकसां सेवितुं
स्वीयं नन्दनमप्यपूर्वसुरभिस्मेरं वसन्तश्रिया ।।

कृष्णश्मश्रुर्नाम कालीमूँछ—नामा ग्वालियरक्षेत्रीयः शालिः। चिक्कणो बहुगन्धश्च भवत्यसौ शालिः। दूर्वाधिराजश्च छत्तीसगढेषु प्रसिद्धा 'दुवराज'—नामा धान्यजातिः। अत्रापि सौरभातिशयः, लघुत्वं च भवति कणेषु।

मौतिलालिर्जवाहरलालः पैत्र्ये आनन्दभवनेऽपि यत् सुखं नाप तदत्र काश्मीरग्रामेषु सर्वत्रैव सुलभमिति विचिन्त्य विस्मितोऽभवत्। अथ प्रयागं प्रत्यागतः।

नवमे सर्गे जवाहरलाल आन्दालने व्यग्रः भारतराष्ट्रे एकत्र संघशक्तिरपरत्र च वैदेशिकं शासनम्। अनयोः प्रावर्त्तत संघर्षः। अत्र संघशक्तेः प्राबल्यम्। निध्येयाऽत्रोक्तिः—

न मत्कुणानामपि, मक्षिकाणामपि, क्षुपाणामपि वा समूहम् ।
विरोद्धुमभ्युद्यतसंघशक्तिं पितामहोऽपि क्षमते विसोढुम् ।।९.२३।।

मत्कुणाः खट्वाविवरेषूत्पन्नाः खटमलाः, क्षुपाः खर्ववपुष उद्भिज्जाः पादपाः। एतेऽपि यद्यभ्युद्यतसंघशक्तयो विरोद्धुमुद्यता भवेयुस्तर्ह्येतेषामपि विरोधं ब्रह्मदेवोऽपि न क्षमेत विसोढुम्। कोऽर्थ! 'संघे शक्तिः कलौ युगे' इति।

विरोधममुमन्वसरन् दैवतान्यपि भारतवर्षे। तथा च नवमे सर्गेऽत्र सप्तचत्वारिंशत्तमादारभ्य त्रिषष्टितमं पद्यं यावत् वर्षाप्रवाहमिव प्राप्नोति सनातनस्य कविता। एकषष्टितमे पद्ये दृश्यतां को नु भावः—

क्रान्तिर्यदा लेढि जनस्य चित्तं सर्पस्य गात्रं नु हलाहलाग्निः ।
ईक्षक्रिया तस्य तदाऽन्तरे नो जागर्त्ति नेत्रे तमसा निगीर्णे ।। ९.६१ ।।

अग्रे कथ्यते—

न संविधानं न च दण्डभीतिस्तमोनिगीर्णान्तरदृक्तरङ्गम् ।
जनं निरोद्धुं क्षमते लुलायं यमस्य संरम्भमिवेयिवांसम् ।। ९.६२।।

विरोधे संरब्धो जनो यमराजस्य महिष एव। असाध्यः स संरभ्य प्राप्तश्चेत् केनाप्युपायेन। किमुच्यते कविना दृश्यताम्—

संन्यस्तदेहं न जनं प्रचेताः (वरुणः)
न दण्डधर्त्ता (यमः) न महेन्द्र एव ।
पाशेन दण्डेन महीध्रभेत्रा
वज्रेण वा लङ्घयितुं क्षमेत ।। ९.६३।।

तदानीं राष्ट्रध्वजस्तर्कुमध्यः (इदानीमशोकचक्रमध्यः)। वर्णास्तु त्रय एव, तेषां क्रमोऽपि स एव य इदानीमस्ति। उपरि कषायो वर्णः, मध्ये श्वेतः, अन्ते च हरितः। अत्र प्रथमो वर्णस्तितिक्षायाः शिक्षकोऽभूत्, शुचित्वं मध्यवर्त्तिनि, प्रहर्षश्चान्तिमे। अन्येऽपि केचन कल्पा अत्र कृताः।

काशीप्रयागस्थाः पण्डिता अप्यत्र सहयोगं चक्रुः। पद्यम् (९.६८)—

शास्त्राणि बुद्धौ प्रतिमापराणि, शस्त्रं च पाणौ च निशातयन्तः ।
काश्याः प्रयागस्य च विद्वरेण्याः स्वातन्त्र्ययुद्धाग्निमवर्धयन्त ।।
छात्राः स्म कक्षाः परितस्त्यजन्ति प्राध्यापकाः स्वस्तिवचो ब्रुवन्ति।
सरस्वती चापि विहाय वीणां तदा स्म कालीयति खड्गहस्ता।। ९.६९ ।।

अथ परा काष्ठा कवित्वस्य—

श्रीविश्वनाथायतनस्य काश्यां हिरण्मयं शृङ्गमदीव्यदुच्चैः ।
घण्टास्तदा तारतरं विनापि घातं विरेणुः खमिवोद्रुजन्त्यः ।। ९.७० ।।
ढक्केश्वरस्यायतने स्वयं हि निक्वाणनां मोचयति स्म धीराम्।
कम्पे नु भूमेः क्षितिसन्धयोऽपि रेसुः स्वयं क्रूररवं समेऽपि।। ९.७२ ।।

जवाहरलालकुटुम्बिनी तदिदं घटनाजातमन्तरात्मनाऽन्वभूत्—

इत्थं भारतवर्ष—मानसमभूद् वज्रोपमं शत्रुषु
प्रत्यग्रेष्वदुहन्निहातिकृपणां ये प्रत्नतादीनताम् ।
पत्नी वीरजवाहरस्य तदिदं चित्तेन सर्वं कथा—
जातं भावयति स्म दोहदमिषादन्तः शुचा ताम्यती ।।९.७३।।

स्वातन्त्र्ययुद्धमिदं षष्टिं वर्षाणि तथा व्यवर्धत यथा—

'ज्योतींषि पद्मानि रजांसि शीघ्रं खेऽप्सु क्षितौ चापि समं व्यशान'।।१०.१।।

सर्गेऽत्र ४—२५इत्येवं २१पद्यैः पं० जवाहरलालस्य स्वात्मा सूक्ष्मसूक्ष्मं प्रकाशितः। उत्तममिदं व्यक्तिचित्रं जवाहरलालमहोदयस्य।

'कमला' तदाऽऽसन्नप्रसवाऽभूत्। तां तथाभूतां दृष्ट्वा पं० मोतिलालः, तद्धर्मपत्नी स्वरूपरानी च प्रहृष्टचित्तावदृश्येताम्। ३३—४४ इति पद्यानि पुराणार्थगर्भितानि महार्हाणि च। पद्यद्वयमत्र—

तटे त्रिवेण्याः परितो विशालैः सालैः परीतं भवनं प्रयागे ।
श्रीमोतिलालश्च पुरूरवाश्च नेत्रोत्सवं निर्ममतुः पृथिव्याम् ।।१०.५५।।

तस्मिन्नभावप्रतियोगिभावाऽतीतार्थसार्थ—प्रगुणे लसन्ती ।
उद्यानशोभा यदिवेन्दिरा वाऽन्योन्योपमावत्त्वमथाश्रयेताम् ।।१०.५६।।

इन्दिरा पितुरङ्के कीदृशी प्रतिभातीति प्रश्ने कविप्रौढोक्तिः—

कवितरि प्रतिभेव विभास्वराऽरुचदसौ पितरि द्युतिशालिनि ।
भरतभूवलयस्य शुभंयुताक्षरमयीव लिपिः कवितार्थदा ।।

प्रयाग एव विद्यते कल्पवृक्षो वटः। तस्यापि प्रभावोऽयं यत् स्वातन्त्र्ययुद्धे साफल्यमवापि।–

अयमेव तरुर्जवाहराद्यानपि साफल्यजुषो विधास्यतेऽद्धा ।
भरतस्य भुवः स्वतन्त्रतायै चलितं च प्रधनं, न संशयोऽत्र ।।१०.७३।।

अथानन्दधाम्नि जवाहरेण सर्वभाषाकविसम्मेलनमायोजि, यत्र सनातनः कविरपि न्यमन्त्रि प्रास्तूयत तेनास्य देशभक्तिप्रधाना कविता हंसपद्मसंवादरूपा। सर्गेऽत्र सा स्वातन्त्र्येण द्रष्टव्या।

स्वातन्त्र्यवीरास्तास्ता यातना अन्वभूवन्। अस्मिन्नेव समये 'जलियावालाबाग'– काण्डमजायत यत्रैकत्र समवेता स्वातन्त्र्ययोद्धारो गोलीभिर्भर्जिताः–

पञ्चाम्बुदेशैकमुखप्रकाण्डप्राचीरसंवेष्टितनिष्कुटे च ।
प्राचीकिरन् संहतिभाक्ष्वसंख्येष्वङ्गारवर्षाणि भुशुण्डिकाभिः ।।१२.७।।

अथ च–

मृताः कियन्तः क्षपिताः कियन्तः कियन्त आसन् गतसंज्ञकाश्च ।
इत्युल्लिलेखाऽत्र न कोऽपि हन्त कृतान्तवक्त्रेऽपि दयां विधाता।।१२.८।।

एतत् सर्वं यैरकारि तेऽत्र 'सिताङ्गकाकोदरा' इत्युक्ताः–

गौराः शरीरैर्हृदयैरमान्ध–तामिस्र–तापिञ्छ–मरीचिचौराः ।
सिताङ्गकाकोदरसोदरास्ते किं नाम कुर्युर्न कुकृत्यजातम् ।।१२.९।।

अस्मिन्नेव क्रमे स्मर्यन्ते दत्तशरीरबलयः श्रीचन्द्रशेखर; श्रीभगतसिंहः अन्ये च वीराः।

यज्ञोपवीताञ्चितमांसलांसश् चन्द्राभिधः संस्कृतवागधीती ।
भक्तः स यज्ञेऽत्र गुरुप्रधानाश्चान्ये वपूंष्यग्र्यहवींषि चक्रुः ।।१२.१७।।

त्रिरङ्गस्य ध्वजस्याऽत्र भूयोऽपि वर्णविवेचना लभ्यते १२. २५–३४ इत्येतैर्नवभिः पद्यैः–

रजस्तमोद्वन्द्वयुगे स्वकर्मलक्ष्माङ्कितं सत्त्वगुणं दधानः ।
ज्ञानामनेकत्वजुषां प्रकृत्या कृत्या च तादात्म्यमलं ब्रुवाणः।।२५।।
वैराग्यमाश्रित्य विशुद्धिरन्तश्चितेश्चिदानन्द उपास्य तां च ।
काञ्चिद् चिरत्नामपि नूत्ननूत्नां सञ्जीवनीं यद्वदुपाश्रयाणः।।२६।।
हरित् तमालद्रुमसिन्धुतोयैः काशीप्रयागेषु च शङ्खपाण्डुः ।
सुमेरुणा स्वर्णमयीति वर्णत्रयीमयीं भूमिमिमां नु बिभ्रत् ।। २७।।
यद्वा त्रिवेणीमिव पुण्यपुण्यां रक्तां च नीलां च सिताञ्च बिभ्रत् ।
चक्रेण संसारगतिं च चित्रां स्वकर्म–यष्ट्या विधृतां दिदिक्षन्।। २८।।
वेदत्रयीं कर्मसमिद्धमद्धाऽध्वानं दिशन्तीमिव धारयिष्णुः ।
मनुष्यसृष्टेः कवितेतिहासमहार्थसार्थं नु पुनः किरिष्णुः।। २९।।
यद्वा मुसल्मान इति श्रवेण सत्यस्य तथ्यस्य च पूजयिष्णोः ।
मनुष्यसंघस्य मतिं नु कीरच्छदद्युतिं काञ्चन सन्दधानः ।। ३०।।
कारुण्यशुद्ध्योरथ यीशुधर्मप्रेष्ठात्मनोरीश्वरभक्तिमुक्ताम् ।
व्याजेन शुभ्रस्य गुणस्य सर्वास्वाशावधूटीषु च वर्षयिष्णुः।। ३१।।
प्रपञ्चसत्ता व्यवहारसत्तावधिस्तदेकं परमार्थसत्त्वम् ।
आर्यामिमां दर्शननीरजस्कां काषायलक्ष्म्या च चितिं विवृण्वन्।। ३२।।
निकायसन्दानितजीवकोषो नैष्कर्म्यमात्रेण न पूरयेत ।
नृलोकयात्रामिति कर्मसूत्रं तर्कुच्छलेनात्मनि लक्षयिष्णुः।। ३३।।
राष्ट्रध्वजो भारतराज्यलक्ष्मीसर्वस्वसंकीर्त्तनशङ्खनादैः ।
बालेषु वृद्धेषु गणेषु यूनामास्फालयामास समिद्धमोजः।। ३४।।

स्वातन्त्र्यसङ्गरमुत्तरोत्तरं प्रावर्धत। तत्र–

जवाहराद्या असकृन्निरुद्धत्यक्ता विदेश्यैरसकृच्च देशम् ।
प्रोद्बोधयन्तोऽगृहयन् रिपूणां कारागृहाण्येव निरस्ततर्षाः।।१२.३९।।

सर्वे वन्दिनः शिववृता अतिष्ठन्। भावमिमं कविरेवं निबबन्ध (१२.४६–५२) –

अन्नं शिवो वारि शिवः शिवो हि वह्निः शिवः शाश्वतिको मरुत्वान् ।
शिवो नभः सूर्यविधू शिवौ, स्वं शिवः, शिवो धीः, शिव एव चित्तम् ॥
योगः शिवः, कर्म शिवः, स्वधर्मः शिवः, स्वराष्ट्रं शिव, एतदीया– ।
भक्तिः शिवा, हन्त शिवः शिवायै शिवः शिवा किञ्च शिवः शिवाय ॥
नमः शिवायाथ नमः शिवायै नमः शिवाभ्यां च नमः शिवाभ्याम् ।
नमः शिवाभ्यामथ सन्ततं हि साहित्यभाग्भ्यां समवायभाग्भ्याम् ॥
पृथक् स्थिताभ्यामपृथक् स्थिताभ्यां शृङ्गारशान्ताऽद्भुत–रौद्रभुग्भ्याम् ।
भयानकाभ्यां च जुगुप्सिताभ्यां कारुण्यभाग्भ्यामथ हासिताभ्याम् ॥
वीरैरनेकैः परिवारिताभ्यां विनायकैस्ताण्डवतोषिताभ्याम् ।
विषाणि पीत्वाऽपि सुधाम्बुवर्षैर्विश्वस्य सौस्थ्याय समुद्यताभ्याम् ॥
शिवः शिवां प्रेप्सति मूर्त्तियुक्तां सपीतये चापि सजग्धये च ।
शिवा शिवं चेप्सति तासु तासु कलासु मूर्त्यैव युतं युवानम् ॥
कामः शिवाद् भेदमितः प्रदग्धः शिवो हि कामः स्वयमेव देवः ।
यस्मादसौ नैव रतिं ददाह रतिप्रियः प्रीतरतिश्च कामः ॥

१२.६४–६५ पद्ययोर्नव्यन्यायशास्त्रं पदं व्यधात्, व्यधाच्च पदं साहित्यशास्त्रमत्रैव कौशलेन। मध्ये पत्न्याः कमलायाः शरीरपातः (१२.८२)। आहतस्य जवाहरलालस्य चक्षुर्भ्यां बाष्पधारा प्रास्फुटत्। तस्य वर्णने कविः–**तस्याक्षिशुक्ती सृजतः स्म यानि**
मुक्तफलाश्रूणि निरन्तराणि ।
तानि स्त्रजीकृत्य रतिप्रियोऽपि
धिग्धिक् शिवेऽजायत जञ्जपूकः ॥१२.८५॥

इत्येवं कल्पनामचीकरत् पिचण्डिलां रुचिरां च। सर्गान्ते मृत्युरेव प्रणम्यते–

धगिति हृदये क्रूरः कश्चिद् दिधक्षति दाहको
ज्वलन इह धिग् धिग् धातून् समस्तशरीरिणाम् ।
विषमविषमाः कुर्म्मस्तत्रापि लौकिकभेषजं
विषमविषमं मृत्यो! तुभ्यं नमस्त्वमसि प्रभुः ।।१२.१००।।

अथ कवेः काव्येऽस्मिन् कालतत्त्वमीमांसा। त्रयोदशे सर्गे जवाहरलालस्य पिता मोतीलालः स्थविष्ठं शरीरं जहौ। अथैकदा जवाहरलालो भावकतातिशीतिं गतः स्वकीये आनन्दभवने कविसमवायमाजुहाव। तत्र सनातनकविरप्याहूतः श्रीकृष्ण–विवस्व–न्यायेन। तेनापि मृत्युमधिकृत्य रचिता कविता तत्र श्राविता। तत्र प्रश्नः–

मृत्यो! त्वं खलु कः,
प्रमीलनकला द्राघीयसी किं दृशोः
दीव्यद्–दीप–दशार्चिषोः क्षणमितः किं विप्रयोगोऽसि वा?
ब्रूहि प्रस्फुटमद्य मित्र!
भवसि त्वं किं चितागर्भयोः सन्धिर्?
ज्ञातम्, अहो नवीननटने नान्दीनिनादो भवान्।।१३.१७।। इति।
मृत्यो! वदासि खलु सप्तसु कः पदार्थ?
त्वं भावतां स्पृशसि वा यदिवास्यभावः ।

अत्र विकल्पाः–

शेषो भवान्, अयि न भावति नान्यथा तु
ब्रह्माप्यभावतु विहाय तु भावभूयम् ।।१३.२३।।

अथ सृष्टिविकासेऽनेके सन्धयः। मृत्युरनुयुज्यते 'को वा सन्धिास्तव निवास' इति।

भूमेर्गर्भात् प्रचलति रसो याति काण्डे, ततश्च
शाखारन्ध्रेष्वविहतगतिर्धावति प्राप्तरंहाः ।

पत्रं पुष्पं फलमथ तदीये विपाकेऽदसीये भोगे
पश्चाद् भवति रसनातल्पशायी रसो हि ।।१३.२४।।
मृत्यो! ब्रूहि त्वमिह महति प्रक्रमे सावकाशः
कस्मिन् सन्धौ, क्व च रसमये पर्वणीक्षोरमुष्य ।
यः प्रोल्लङ्घ्य व्रजति पुरतस्त्वां रसश्चेत् स एव
संसारेऽस्मिन् बत रसमये त्वामभावं मनामः ।।१३.२५।।

अथ प्रश्नः मित्र! मृत्यो! 'कालेन ते कः संबन्ध' इति।

कालेन सर्गकलनप्रतिसर्गसिद्धिसंसिध्यदात्मसकलोत्तरपौरुषेण।
मृत्यो! तवास्ति वद कः खलु भावबन्धः?
किं ते स,
तस्य यदि वा त्वम्
उताभिदा वाम् ।।१३.२६।। इति

अग्रे सहर्षमुच्यते—

अहह विदितं मृत्यो! त्वं कालसर्पवधूर्
दधास्ययि जगदिदं कुक्षौ सूषे च चर्वयसे च तत्।
त्वमसि जननी स्तन्यं यस्या न वक्षसि जायते
ज्वलति च सदा यस्याः कुक्षौ
वृकज्वलनोऽक्षयः ।।१३.२७।।

अनेके प्रश्नाः।

वदतु भगवन्! मृत्यो! कस्ते पुमर्थचतुष्टये प्रियतम?
इयं मुक्तिः किम्?
सा प्रिया न दिवौकसाम्।
भवति हि भवान् देवः स्वर्गो हि यत्र परायणं
स च विषयभूर्भोगारण्यं द्वयत्वपराङ्मुखम् ।।१३.२८।।?

वदतु नु महामारीकाले भवान् क्व विराजते
यदमृतभुजः सर्वे नश्यन्ति नैव भवानयम् ।
अदितिसुततां यद्वनमृत्यो! भवानपरामपि
श्रयति नियतं गूढां काञ्चिद् विशेषकलां न नो ।।१३.२९।।
प्रवदतुतरां नीत्वा संख्येतराञ् जगतीजनान्
प्रतिसुरमसावेभ्यो वासं ददाति सखे! क्व वा ?
अथ किमु तदागारे कुत्रापि पिच्छलपिच्छला
भवति सुलभा काचिद् दिव्या मही कवितामयी ।।१३.३०।।
नहि यदि, ततो मृत्यो! भीतोऽस्मि,
सा कवितैव या तिरयति तमश्चेतोधातौ गुणैर्विनिवेशितम् ।
वपुषि शिवयोः काचिद् या वै परत्वमयी परा
परमतमता तस्या अस्याः प्रसूः कवितैव नः ।।१३.३१।।
अथ भवति सा मृत्यो! त्वं नो भवस्यपरैव सा
भवति वसुधा यस्यां नास्ति क्षमः प्रसरस्तव ।
परमशिवया सार्धं तस्यां स ताण्डवपण्डितो नटति सततं
स्वामी ते कोऽपि चन्द्रकलाधरः।।१३.३२।।
मृत्यो! प्राणास्तव वद नु के, कश्च तेषां त्वमेषः
त्वं किं भोक्ता भवसि किममी सन्ति भोज्यास्त्वदीयाः।
किं वा प्राणास्तव सहचरा भृङ्गराजस्य भृङ्गा यद्वत्
किं वा दिनमणितनावंशवः स्वस्वरूपाः।।१३.३४।।
आद्ये पक्षे भवसि भगवन् पन्नगः कालवर्णः
ख्यातो यो वै पवनकवलप्रक्रमे विक्रमाढ्यः।
अन्त्ये मृत्यो! भवति भगवान् भैरवः कालमूर्त्ति–
र्युङ्क्ते व्यालावलिमवयवालङ्क्रियायां य एषः।।१३.३५।।

हंहो ज्ञातं,
भवसि भगवान् भैरवः काशिकायाः
स्वामी विश्वेश्वरपशुपतिप्रख्यया संप्रतीतः।
देवः सोऽयं हरति सततं यः श्मशानं निवासत्यह्नायैव
स्मरहरति यो यो भवत्वं च धत्ते।। १३.३६।।
सत्यं सत्यं भवहर इह त्वं भवस्त्वं हरस्त्वं
हं हो स त्वं बत हरभवः शक्तिधर्त्ता षडास्यः।
त्वं सेनानीः सुरपति—परित्राणकृद्ब्रह्मचर्यः
सर्व्वोत्तीर्णः 'शमनसमनास् तुभ्यमेते प्रणामाः।। १३.३७।।
एते शब्दाः,
यदि तु भवतः संदिदृक्षास्त्यमीषामर्थव्राते
नयनयुगलीकज्जले दुर्विभाव्ये।
काशीं यातु श्रितसुरसरिन्मेखलां,
सान्नपूर्णो देवो यस्यां वसति सततं विश्वनाथस्त्वदीशः।।१३.३८।।
यद्वा,
क्षिप्राजलपरिगतां श्रीविशालां विशालां याहि क्षिप्रं
यदिह वसति श्रीमहाकालनाथः।
कुर्व्वंल्लीलां कवयतितरां यत्र सार्धं कपोतैः
शुक्लापाङ्गैर्नटति भगवान् स स्वयं कालदासः।। १३.३९।।

पर्यन्ते मृत्युराकार्य्यते मर्त्येन—द्वन्द्वयुद्धार्थम्—

एह्येहि त्वं सुहृदसि महान्
मल्लयुद्धाय भूत्वा सज्जः पुर्योरिह हि
विजयो निश्चितोऽस्माकमेव,
मृत्यो! जीवः पशुरथ पतिस्त्वं तदीयस्त्वदीशो भाव्येषोऽहं
पशुपति—पतिर्विश्वनाथाधिनाथः।। १३.४१।।

पिपुरतुतरां तूणीं बाणास्तवान्तक! घस्मरा
निमिषतितरां चक्षुर्देवः स यावदुमाधवः।
भवसि तु यदा संधित्साभिर्मयि व्यतिलङ्घितः
स्मरसखयिता त्वामप्येषोऽद्य भालविलोचनः ॥१३.४२॥

इतः परं मृत्युकाव्यमिदममृतायते प्रतिपद्यरत्नम् ४९तमं पद्यं यावत्। ततश्च परं परमाणुं भीषयन् सनातनो ब्रूते–

शृणु, सति मयि त्वत्ता त्वामेव हास्यति मां यथा
सति परशिवे मत्ता,

अत्र हेतुः– **सत्ता शिवं हि पतीयति॥१३.४३॥**

परमं सुरक्षितस्य मे नास्ति भयस्याणुरपि। कथमिति चेदेवम्–

तामसं महिषं विसृज्य स्पृशतु भवान् धवलं सात्त्विकं च वृषम्। तदा तव शिरसि समुदेष्यति चान्द्री कला। अपि जानासि कोऽहम्। तस्यां चन्द्रकलायामेव दोलाभूतायां शयानो दुग्धमुखः शिशुः। मां च परिरक्षतः पितरावेव तौ स्वयम्। तस्यामस्यां चन्द्रकलायां कस्यापि गतिर्नास्ति, न मृगस्य, नवा शशस्य, तव महिषस्य तु वार्त्तैव का।– **'त्वयि वृषगते काचिच्चान्द्री कला समुदेष्यति।'**

अयमहमहो तस्याः कोटिद्वयीमृदुविष्टरे
स्वपिमि शिशुकः पित्रोर्दृष्ट्या तयोः परिवीक्षितः।
न खलु लभते स्थानं त्वस्यां मृगस्य शशस्य वा
किमपि कलुषं गात्रं, का वा कथा महिषस्य ते ॥१३.४५॥

महिष एष ते मम कन्दुको भविता क्रीडासु।

मृत्युः पृच्छति–अथ बिभ्यति कथं जनाः? उत्तरे कारणं 'विषमामाचरसि वैशसीं यत' इति–। वैषम्यवैशसी चाधो दीयते–

क्षपयसि लतां त्यक्त्वा तस्याः प्रियं बत शाखिनं
क्षपयसि तरुं त्यक्त्वा तस्य प्रियां च लतां हहा।

भवसि तु ततो मृत्यो! क्रूरोऽतिमात्रमथापि धिक्
प्रथमकवितुः शापस्त्वां नोपयाति विसृत्वरम् ।।१३.६८।।

कवितयाऽनया स्वर्गतं पितरमाराध्य जवाहरलालो भूयोऽपि स्वातन्त्र्ययागाध्वर्यवं कर्त्तुमारेभे।

चतुर्दशे सर्गे प्रवर्त्तमाने स्वातन्त्र्यसङ्गरे जवाहरो विस्मृतविश्व–प्रपञ्चान्तरोऽतिष्ठत्। गेहेऽपि देहसख एवासाविदानीं प्रियदर्शिन्या दुहित्रैव पर्यवेक्ष्यत। अत्र कवेः सुभाषितमादरपात्रति। तथा हि–

परिणयवतीं नेत्रज्योत्स्नां नु तां प्रियदर्शिनीं
हृदयसदने स्वर्णप्रस्थो गिरिर्नु पिता सुताम् ।
सुखितसुखितां शश्वद् दृष्ट्वा बभूव कृतक्रियो
दुहितरि महाभाग्याः केचिद्धि यान्ति विचिन्तताम् ।।१४.२।।

इदानीं राजीवानुजं सञ्जयं जनयाञ्चक्रे सुता। अत्रोपमा प्रातर्वेलाऽरुणमिवेति–

पितरि निरते राष्ट्रस्वातन्त्र्यरुद्रमहाक्रतौ
दुहितरि पदं लेभे पुत्रोऽपरः किल सञ्जयः ।
अरुणमिव यं प्रातर्वेला स्वराष्ट्रतपस्विता–
तनुमिव परं दिव्यं प्रासोष्ट सा प्रियदर्शिनी ।। १४.६।।
अधिगतसुता सेयं सस्याञ्चितेव मही दिशां
भरतभुवनस्यैतस्यासीत् प्रणम्यतमा ततः ।
सृतिरियमलङ्कारं धत्ते प्रसूतिमयं यदा
प्रतिनवतमं नृत्यत्यद्धा तदा स्वजयोन्मदा ।।१४.९।।

इति सुकविः स्वकीयां संस्कृतिं स्मरति।

अत्रैव सर्गे कविर्दृश्यान्तरं प्रस्तवीति। तत्र वर्ण्यो विषयोऽस्ति कर्मचन्द्रात्मजो गान्धी मोहनदासः। प्रसिद्धोऽसावेव 'महात्मा गाँधी'–ति विरुदेन, बापूरिति शब्देन भुवि। अत्र चित्राणि–

पर इव महान् सांख्ये गान्धी च मोहनसंज्ञकः
प्रतिदिनमुदाकर्त्तुं तं पारतन्त्र्यनिशाचरम् ।
उदयमभजत् सर्वो लोकश्च तं पितरं यथा–
ऽनुगमनदृढः पूज्यं संभावनाभिरुपाचरत् ।।१४.१३।।
स्वकररचितं वस्त्रद्वन्द्वं वदातरुचि श्रयन्
मधुरवचनः सङ्गोन्मुक्तो यमैर्नियमैर्वशी ।
स खलु महतीं दृष्ट्वा राष्ट्रस्य दुर्गतिमार्थिकीं
शिशिरसमये वार्त्तापत्रेऽशयिष्ट तिरोहितः ।।१४.१४।।
धनविरहितं लोकं दृष्ट्वा तदार्त्तिवशीकृतः
स खलु बुभुजे शाकं क्षीरं च बर्करिकार्पितम् ।
भवति विगुणाचारः कश्चित् कथं ननु नायक–
श्चरितपरमे लोके स्तोकेन भक्तिमुपेयुषि ।।१४.१५।।
दिशि दिशि निजं कार्यं स्वीयैः करैर्हि विधित्वरान्
स खलु विविधाँश्चक्रे विद्वान् कुटीरमयाश्रमान् ।
विभवभरिते विज्ञानाढ्येऽपि यैः समये तदा
मुनिजनतपोऽरण्यान्याविष्क्रियामिव लेभिरे ।।१४.१६।।
मणिभिरुचिता क्रीडा येषामभूत् प्रथमे वय–
स्यपि नवनवास्ते ते यूनां व्रजाः सजवाहराः ।
स्वकररचितैर्वस्त्रैस्तुष्टा अनैषुरिमान्यहा–
न्युपचितदृढोत्साहा आङ्ग्लानितोऽपनिनीषवः ।। १४.१७।।

अत्र यवनजना अपि नाभिद्यन्तान्दोलने, किन्तु वैदेशिकाः शासका एकं **जिन**संज्ञकं महान्तं वाग्मिनं साधयामासुः। तस्मिन् गान्धी महात्माऽपि सजवाहरो विफल एवासिध्यत।। १४.१८।।

अथ देशः स्वतन्त्रो जातः। तदेतन्न्यबध्नात् कविः सर्गेऽत्र **१९, २३,२५,३०,३४,३५,३८,४१,४४,६६**इति पद्यैः। पद्यानीमानि मनुष्यस्य मानुष्यकत्वमुद्बोधयन्ति।

अत्र प्रथमः प्रधानमन्त्री जातः श्रीजवाहरलालो नेहरूरित्युच्यते—

प्रधानं मन्त्रित्वं प्रथमममभजद् विश्वपुरुषं
जवाहर्लालाख्यं विशदहृदयं भारतभुवः ।
विरेजे ह्यस्मिंस्तद् भगवति नु काकोदरवपुः
कलङ्को वा चन्द्रेऽमृतवपुषि भृङ्गो नु कमले ।।१४.७५।।

पाके पुन**र्जिनः** प्रधानमन्त्रिपदं लेभे यस्य परिणामं कविरेवमुपनिबबन्ध—

जिनः पाकिस्तानेऽभजदथ तदा राष्ट्रपतितां
प्रधानत्वोदग्रां विधिवदुपक्लृप्तां मतिबलात् ।
चतुर्दश्यां रात्रिः पिशितरुधिरैः पूरिततनुः
शितौ पक्षे यस्माद् बत बत पिशाचीवदुदभूत् ।।१४.७६।।

चतुर्दशी हि नितान्तमशुभा, तत्रापि कृष्णपक्षीया सा। तदानीमजायन्त भूयस्तराममङ्गलानि, येषु कानिचनोपनिबद्धान्यपि प्रस्तुते महाप्रबन्धे। सर्गस्यास्य पुष्पिकायां संज्ञा भारतविभाजन इति।

पञ्चदशे सर्गे राष्ट्रविभाजनायै परिदेवनानि। अत्रापि सुभाषितं—

धारां न तिग्मयति शोणितनाडिकासु
प्रस्पन्दमानवपुषं प्रबलोऽपि दोषः ।
यस्मिन् गृहे पितृवनादपि तन्निकृष्टं
क्रोशद्वृकान्वयमुखादिति घोषणा नः ।।१५.२७।।

११०पद्यात्मकः पूर्ण एव सर्ग एषः कण्ठे स्थापनीयः। नोवाखग्लीरक्तपातवर्णनाऽत्रैव लब्धपदास्ति।

षोडशे सर्गे भारतवर्षस्य शासनेन स्थापितेषु संयन्त्रेषु भिलाईस्पातसंयन्त्रस्य वर्णनाऽस्ति। अत्र श्लोकः—

सत्यं सत्यं भरतभुवनस्यास्य ते शैलराजा
भ्राजिष्णुश्री–परिगतशिला किं न लक्ष्म्याः समुद्राः ।
एका धारा प्रवहति यतः शीर्षदेशात् सरित्सु
गर्भादन्याऽऽयस–रसमयी, किञ्च, संयन्त्रकेषु ।।१६.१०।।

काशीवासी भगवान् विश्वनाथः प्रार्थ्यते–

काशीवासिन्! निटिलपटले विश्वनाथ! त्वदीये
कुण्डो वह्नेर्ज्वलति सततं यस्तदीया बुभुक्षा ।
क्लिश्नाति त्वां यदि पशुपते! याहि सद्यो भिलाई–
मष्टौ कुण्डाः उदरदहराद् यत्र हेमोद्गिरन्ति ।।१६.१२।।

राउरकेलानगरेऽपि स्पातसंयन्त्रं प्रारभ्यत। उच्यते–

राउर्केला जमसदपुरी दण्डकारण्यगर्भः
पुण्यश्लोका अथ च बहवः साम्प्रतं तीर्थराजाः ।
ये विश्वात्मन्निह तव गृहे भारताख्ये क्षमन्ते
त्वां सत्कर्तुं शमयितुमिमं व्याधिमक्ष्णश्च सद्यः ।।१६.१३।।

श्लोकाभ्यां १६.१४–१५निर्माणजन्यस्य सुवर्णद्रवत्वेन बहिरागत्य कुल्यया प्रवहतो महति कुण्डपात्रे सञ्चयः, तस्य लोहपंक्तिरूपेण परिणामः, पङ्क्तीनां यन्त्रहस्तैरादानं स्थापनं च शकटे, तत्र च महती जलवर्षा। शीतलाः पङ्क्तय इमा यानि बाष्पाणि जनयन्ति तानि नभस्युत्थाय तत्रैव वर्षन्तीति जनेनानेनैकाकिनैव १९६० संवत्सरे स्वयमक्षिसादकारि। एतस्य दृश्यस्य काव्यवपुरत्र द्रष्टुं शक्यं संक्षेपेण। अथ सौराज्यवर्णने भारतभूमेः सस्यश्यामतां स्तुवानः कालिदासभक्तः कविः कालिदासमुपस्थापयति–

सस्यैः श्यामामवनिमधुना भारतीयां द्युगर्भाद्
दर्शं दर्शं कविकुलगुरुः कालिदासोऽपि वक्ति ।

धातर्भूयो रचयतु तनुं भारते मामकीयां
शिल्पैः सर्वैरपि समुदितां साम्प्रतं स्तोतुमेतत् ।।१६.२१।।

पुरा यक्षराजेन शापपाशितो व्यधायि, क्षिप्तश्च दूरं प्रियाया कामी यक्षः। साम्प्रतं पुनर्धनपतिरेव सकलत्रैर्यक्षैः शप्यते—'मुम्बई सिन्धुपरिसरं गत्वाऽऽलोकय स्त्रीपुंसयोर्व्यतिकरान् स्वैरं भुज्यमानभावान्। भविता भवान् प्रसन्नः, न च शप्तुं शक्ष्यति अस्मादृशो वराकान्।। १६.२२।। सौराज्य वर्णनं पश्यन्तु १६.१७—४२ पद्येषु।

सौराज्यसमृद्धिमसहमानः प्रतिवेशिनौ पाकचीनावसूयामासतुः। तावेतौ प्रज्वालयामास्तां युद्धाग्निम्। तदानीं मौतीलालिस्तत्रभवान् जवाहरलालः प्रधानमन्त्री। सुगतस्येवास्य पञ्चशीली सर्वत्र भूमण्डले प्राप्तादरापि क्षणेऽस्मिन्नुच्चैररुदत्। कविर्वक्ति हन्त! श्वगणिभिरहिंसां दीक्षयन् हंस एव बन्धने पातितः—'बद्धो हंसः श्वगणिभिरिमान् दीक्षयिष्यन्नहिंसाम्' (१६.४८) इति। १६.४९—५० पद्ययोः सत्पक्षस्य या दौर्बली सोपस्थापिता। अथ भर्त्सिताः सर्वे कामिनः—

सत्यं सत्यं भवति नितरां दुर्बलं, दुर्बलात्मा—
ऽसत्यं सत्यं भवति नितरां वीर्यवत् किञ्च लोके ।
नो चेत् सीतामहरत कथं रावणो रामहस्तात्
कुन्तीपुत्रानगमयत किं धार्त्तराष्ट्रो वनान्ते ।।१६.५०।।
रे रे कामिँस्!
तव कति रदाः
किंच तेषां प्रमाणं
किं वा वीर्यं विलसतितरामायुरप्यत्र कीदृक् ।
द्वाभ्यामाभ्यां पशुरिव कराभ्यामुपादाय विश्वा—
नर्थानास्ये क्षिपसि नयने मीलयित्वाऽद्य यत् त्वम् ।।१६.५१।।

कारस्कारं क्षिपसि किमु रे शान्तये मार्मिकीणां
कण्डूतीनां वपुषि सुभगे स्वे कराभ्यां निजाभ्याम् ।
कोऽयं मोहः पिबसि गरलं हन्त पीयूषबुद्ध्या
निद्रां दीर्घां भजसि च रसान्निर्विरामां यदित्थम् ।।१६.५२।।

सर्गान्त उच्यते

इयं प्रधनखर्जना यवनदेहिनः खर्जय—
न्त्यतीव विषमा स्थिता विषमपाकपातेऽधुना ।
क्षयं व्यलभताधुना युगलपक्षशक्त्युच्चयः
क्षयातुरजने यथा विविधसुन्दरीसंकथा ।।१६.७०।।

सर्गस्य नाम वर्त्तते 'चीनपाकाभिद्रोह' इति।

अथ सप्तदशे सर्गे—

वितथानिति पाकचीनयोरपवित्रान् विदधन्मनोरथान् ।
स बभौ प्रियदर्शिनीपिता ग्रहयुग्मादिव रेचितः शशी ।।१७.१।।

युद्धपरिणामं सोढुं जवाहरोऽक्षय्यमपि शक्तिकोषमहापयत्, तेन तस्य मानसं व्यदारि। तथापि—

स चतुर्दश वत्सरानभूत् प्रथमे मन्त्रिपदे विराजितः ।
सुतयैव तयाऽभिरक्षितः क्रममाणश्च पथि प्रजोन्नतेः ।।१७.१४।।

वल्लभाईपटैलस्तदानीं स्वराष्ट्रमन्त्री। स हि प्रशस्यते स्म 'लौहपुरुष' इति—

पुरुषः स हि लौहनिर्मितः प्रबभूवात्मभुवि प्रतापवान् ।
स जवाहरलालसंज्ञकोऽप्यभवत् तं प्रति यत् समादृतः ।।१७.१६।।

अथ—

अवधाविह भारतावनेर्हृदयं भञ्जयितुं समद्धुराः ।
बहवो लघुराज्यभूभृतः पृथगेवासितुमुद्यमं दधुः ।।१७.१७।।

परन्तु—

अखिलानपि तान् स वल्लभो गरुडः पन्नगडिम्भकानिव ।
विलयाय धृतस्पृहान् व्यधादिह देशे प्रविहाय हैदरम् ।।१७.१८।।

तमसावरुणत्—

अरुणत् तमसौ स्वसेनया प्रविभज्य स्थितया तु पञ्चधा ।
मृगराडिव पञ्चभिर्नखैर्मृगशावं नु युयुत्सयोत्सुकम् ।।१७.१९।।

अथ हैदरावादपतिः—

जगृहे गृह एव तत्पतिर्यवनः कोऽपि कविः समं सुतैः ।
शतकद्वयसंख्यया युतैरथ दारैश्च ततोऽधिकैर्बलैः ।।१७.२०।।

मेदपाट (मेवाड) भूपतिः स्वयमेव स्वराज्य भारतेभ्यः समार्पिपत्—

स्वयमेव तु मेदपाटभूनृपतिः शासनमत्यजत् स्वकम् ।
अभवत् किल नः स्वतन्त्रता परमं लक्ष्ममिमां गता इति ।।१७.२२।।

अथास्य निर्णयस्य प्रतिक्रिया—

अचलेश्वर—वर्धमानयोः सममेवार्बुदसंज्ञकेऽचले ।
विदधे खलु मेदपाटपो वरिवस्यामितिहाससाक्षिकाम् ।।१७.२३।।

अचलेश्वर इति तत्र प्रतिष्ठितो भगवान् भूतभावनः। वर्धमानश्च सुवर्णमियीर्नैकाः प्रतिमा बिभ्राणो जैनतीर्थङ्करः। राणा प्रतापस्तस्यैव क्षेत्रस्य परिपालयिता। तस्य यशः—

प्रणतिं प्रतनोति संसृतिर्ननु मेवाडमहीभुजे, तृणैः ।
परिपालयते शिशून् वने वसते च स्वभुवः स्वतन्त्रणे ।।१७.३२।।

अस्मिन्नेव प्रस्तावे जागरूकेण कविता श्रीमान् भामा—शाहनामको जैनोऽपि स्मृतः, येन संपूर्णमपि स्वं राष्ट्रायार्पितम्, यावदेकं देवमन्दिरमप्यपूरयित्वा—

स हि भामहशाह ईड्यतां भरतानामधुनाऽपि भूतले ।
स्वधनं निजभूपतेः कृते प्रविहायेश्वरमार्पिपत् तु यः ।।१७.२८।।

स च भूपतिरप्यहो महान् स्वमपास्यैक्षत यः स्वतन्त्रताम् ।
अथ तामपि संस्कृतिश्रिया निजया मण्डयितुं य ऐहत ।।१७.२९।।

अपरस्य हानिरपरस्य बलमितिधीरत्र भर्त्स्यते—

पुरुषो यदि पाण्डुसंज्ञितः पुरुषत्वं परिहाय जीवति ।
धृतराष्ट्र! ततो न चक्षुषोस्तव दृष्टिः समुदेष्यतेतराम् ।।१७.३५।।
परदुर्बलता परस्य चेदुदयस्तं प्रणमाम दूरतः ।
न हि सेतुतयाऽभिमन्यते विवुधैर्गर्त्तगुहान्धतामसम् ।।१७.३६।।

अथ सर्वाण्यप्युपशासनानि विलयं प्रापुरेकस्मिन् राष्ट्रिये शासने।।१७.३७।।

उदधाविव वाहिनीगणो विलयं प्राप्य नरेन्द्रशासनम् ।
विदधे भरतावनौ पुनर्निखिलायामपि पूर्णरूपताम् ।।१७.३७।।
निदधे च महत्त्वमस्मितामयमात्यन्तिकमत्र भारते ।
विरहो खलु यस्य गामिमामसृजाऽरञ्जयदन्यदा नृणाम् ।।१७.३८।।

अधुना मानववंश उद्बोध्यते—

अयि! मानववंश! तावकी तुलना नास्ति चराचरात्मके ।
निखिलेऽपि विधेर्विधानके परितो व्यापिनि पश्य चेतसा ।।१७.३९।।

अत्र ४०—४५पद्यैः सुभाषितमयी नीतिरुपस्थापिता। जवाहरलाल—वल्लभभाई—युगे गहनमासीदैक्यम्—

न जवाहरलालमन्तरा सरदारः क्रमते स्म तन्त्रणे ।
न जवाहरलाल एव वा सरदारं स्म विना प्रवर्त्तते ।।१७.४६।।

इदानीमनशनेन कर्मचन्द्रपुत्रः गान्धी मोहनदास पञ्चपञ्चाशत्कोटिरुप्यकाणि पाकस्तानाय दापितवान्—

अशनं प्रविहाय भारतद्रविणं हन्त बलाददापयत् ।
रिपवे स्थविरः स मोहनः समयेऽस्मिन् ननु पाकसंज्ञिने।। १७.५६।।

तामिमां क्षतिं भारतभूमिः सोढुं न चक्षमे, अथ गोडसेगुलिकीभूय गान्धिनो रक्तमपिबत्। अत्र कविष्टीकते–

विरतिं भजताद् युधिष्ठिरो यदि नाम प्रधनाद्, य एषकः ।
पवमानसुतो वृकोदरः स कथङ्कारमुपाश्रयेत शम् ।।१७.६१।।

शनैः क्षीणतनुः सरदारोऽपि परं पदमाप। इदानीमेकाकी जवाहरलाल एव शास्ति स्म भारतान्। तस्यान्तिमामिष्टिं राजीवश्चकार यमुनातटे।। १७.७७–७८।।

शास्त्री लालबहादुरोऽत्र कियता समादरेण पूज्यते। कथ्यते– भारतीयैर्भटैर्निजशोणितैर्यद्विजयकाव्यमलिख्यत तत्र पुष्पिका व्यलेखि लालबहादुरेण स्वरक्तेन–

यदपि निजभटानां शोणितानां मषीभिः
कविकुलतिलकोऽयं राष्ट्रकाव्यं न्यभान्त्सीत् ।
अतितनिषत सोऽस्मिन् पुष्पिकामन्त्यसर्गो–
त्तमपरिणतिभूतामात्मनः शोणितेन ।।१८.८१।। इति।

कीदृश एष हृदयस्पृगुद्गारः? अग्र एकोनविंशे सर्गे षड्विंशत्याष्टपदीभिः शास्त्रिवर्याणां भारतमात्रे प्रणामा सनातनेनोपनिबद्धाः। तासु दृश्यन्ते तस्य संपूर्णं भारतीयत्वम्। संपूर्णेऽपि काव्येऽस्मिन् यदि कश्चिदेको नेता नायकत्वेन वरीतुं शक्यते तर्हि जवाहरो वा सः, लालबहादुरो वा, यद्यपि लालबहादुरं प्रति कवेर्भूयानादरः। द्वयोर्गुणानामन्तरेण तथ्यमेतत् स्पष्टं जायते लालबहादुरो नौकामारोढुं नाशकत्, आतरद्रव्यस्याभावात्, ततश्च गङ्गामसौ तीर्त्वाऽलष्यत्, रेलमन्त्रित्वमत्यजद् एकस्मिन्नेव रेलयाने दुर्घटनया कवलिते, लालकिलातस्तेन यदेकमेव भाषणं स्वतन्त्रतादिवसेऽगस्तमासस्य पञ्चदशे दिवसे कृतं तत्र तस्य तादृशी

मिष्टा मृष्टा च वाक् या नाद्यापि स्मृतिं त्यजति 'जय जवान जय किसान' इति यो राष्ट्रोद्घोषस्तेनादायि स राष्ट्रस्य धमनीषु रक्तत्वेनाद्यापि वहति।

जवाहरलालो विदेशेष्वधिकं दत्तदृष्टिः, वल्लभभाईपटैलः पुनः स्वदेशीयेषु योजनोपकारेषु। कविः कथयति द्वयोरप्यनयोः संप्लवो य एष लालबहादुरः —

तस्मिन्नवाप सरदारजवाहराख्या–
वद्वैतमार्य्यवसुधामधिकं पिपूर्त्तः ।
वीक्षाञ्चकार गृहमेष पुरा ततश्च
वैदेशिके निगमसंस्कृतिपूरितात्मा ।।१८.२।।

पाकयुद्धमसौ लालबहादुरः कथङ्कारं जिगाय? कविस्तथ्य–मिदमुपस्थापयते–लालबहादुरस्य मनसि पदप्रीतिर्नासीत्। तत एव तेन सैन्याधिपा एव युद्धनिर्णयाय स्वतन्त्राः कृताः। तेभ्यः प्रधानमन्त्रि–नियन्त्रणमपाहरत् (१८.१८)।

जातो नवीनः प्रधानमन्त्री श्रीलालबहादुरः शास्त्री। पाको भारतानाचक्रमे। शास्त्री शकारपरवर्त्तिन आकारस्य स्थाने अकारमवृणोत्, अथ क्रथयामासारातीन्। शास्त्रिशब्दक्रीडयापि कविः शास्त्रिणं प्रशंसति–

शास्त्री शकारपरवर्त्तिनमाशु हित्वा
नाम्नो निजस्य गुरुवर्णमवर्णनीयाम् ।
रौद्रीं श्रियं समधिगत्य चमत्कृतान्त–
र्धातूनि हन्त विदधे जगदण्डकानि ।।१८.१६।।

अयमर्थः–'शास्त्री शस्त्री' जातः। तदा तथाऽसौ रौद्रं रूपं दधौ यद् विश्वमात्रं चमत्कृतान्तःकरणं जातमिति। शाकारादाकारस्य लोपेऽवशिष्येत 'श्' इति वर्णः, निरर्थकत्वं तत्र दृष्ट्वा 'अवर्णनीया'–

मिति 'अ'—वर्णस्य निक्षेपमन्वमंस्त 'तेन 'शा'—कार: 'श'—कारत्वमापेदे। शस्त्री शस्त्रवान् यथा शास्त्री शास्त्रवानिति च तत्र दृष्टि:।

रूसा अत्र मध्यस्थतां चक्रु:। आजुहुवुस्ते पाकराष्ट्रपतिमयूवं शास्त्रिणं च ताशकन्दनगरे। तत्र सन्धिपत्रे लालबहादुरशास्त्री स्वकीयेन शोणितेनैव हस्ताक्षराणि चकार, जग्राह चान्तिमाञ्छ्वासान्। तस्थ शरीरमात्रं प्रत्यावर्त्तत स्वकीयं राष्ट्रम्, न तु स्वयं स:।।१८.८१।।

एकोनविंशे सुमहति सर्गे स्वयंकृतेन विषपानेन त्यक्ष्यमाण—शरीरस्य शास्त्रिमहोदयस्य भारतमात्रे प्रणामा १०४ पद्यैरुपनिबद्धा:। अन्ते च द्वाभ्यामिदं रहस्यमुद्घाटितं यदिमे विचारा: शास्त्रिवर्याणां स्वकरलिखितलेखरूपा एव। अथ सर्गपूर्त्ति: —

शास्त्रिमहोदयोऽत्र भरतभुवनसूर्य इति संभावित:—

भरतभुवनसूर्य्य: खण्डितारातिरात्रिञ्चर—
दशनसमूहो व्यूहमेवं विसृज्य ।
अभजत चरमाद्रिं कर्मयोग—प्रसिद्ध्या
भरतवचनमार्ये नाट्ययोगे नु योक्ता ।।१९.१०६।।

विंशे सर्गे राष्ट्रस्य सुमहत्यामस्यां हानौ सर्वासु दिक्षु परिदेवना। कविताऽत्र स्वयं प्रकर्षसुमेरुमारुरोह।

भरतभुवने सर्वेऽशोकद्रुमा: प्रतिगुच्छकं
दधति धगिति क्रूरक्रूरं ज्वलन्तमुषर्बुधम् ।
न खलु त इमे सीतामाश्वासयन्तमिमं प्रभो—
र्दयितदयितं दूतं दूरादपीक्षितुमातुरा: ।। २०.६।।

अत्र शास्त्रिधर्मदाराणामुद्गारा नितान्तं मर्मस्पृह:। तस्या एका उक्ति:—

न खलु कणिकामात्रेऽप्यन्यस्य हन्त धनस्य ते
हृदयमभजत् कृच्छ्रे कालेऽपि भावविपर्य्ययम् ।

पदमपि महत् प्रीत्यै नाभूत् स्वधर्मरताय ते
कृतयुगमिवाधातुं काले कलौ त्वमिहागतः॥ २०.२९॥ इति।

अथ प्रधानमन्त्रित्वेन सभाजिताऽभूदिन्दिरागांधी—

पुनरपि समे भूत्वा संसत्सदस्यवरास्तदा
विशदनयनाश्चक्रू राष्ट्रालिके तिलकोत्तमम् ।
अरुचततरां यस्मिन् गान्धीन्दिरा प्रियदर्शिनी
प्रमुखपदवीं प्राप्ता देवी मुरारिसमर्थिता॥ २०.३९॥

तस्या अस्या वर्णना २०.४१—५०पद्येषु। तत्रैकं पद्यम्—

शरदिव शुभा राजीवोल्लासदा विविधैर्गुणैः
कुरुकुलमहागाथारम्या च संजयशोभिनी ।
भुजयुगवती काचित् प्रत्यर्थिशोणितभक्षण—
व्रतनिपुणिमोत्कृष्टा कालीव या प्रियदर्शिनी ॥ २०.४९॥

अथावोचि—

भवति तनयो यस्याः पोतः स संजयसंज्ञको
नय—जलनिधेः क्षारक्षारस्य संतरणक्रतौ ।
स च भवति वै राजीवाख्यः सतां प्रमुखः कृती
पर—यवनिका—नान्दी—नादाय सूत्रभृतां वरः ॥ २०.५५॥

ताभ्यामाभ्यां तनय रत्नाभ्यामिन्दिरा भारतमुवं स्वकरनिघ्नामकार्षीत्—

इति सुतयुगशक्त्या भारतीयां धरित्रीं
निजकर—युगनिघ्नामिन्दिरा देव्यकार्षीत् ।
यदि भवति बलिष्ठं पक्षतिद्वन्द्वमीष्टे
पिकशिशुरपि तर्तुं व्योम ताराविचित्रम् ॥ २०.६३॥

भारतीयाया जनतायाः सिद्धान्तगतः कलहोऽबाधतास्या समुन्नतिम् (२०.६८.६९) अन्तेऽनुष्टुभा प्रोच्यते—

देश एष बुभूषां च प्रबिभर्त्ति गरीयसीम् ।
शुद्धामध्वर्युतां चापि नैव पश्यत्यणीयसीम् ।। २०.७० ।।

अथेन्दिरादेव्या विरोधः। इदानीमेव वङ्गान् पञ्चापीयाः पाकसैनिका पिण्डमर्दममृद्नन्। दुष्कर्मण्यसौ नामन्यत मोहम्मदं, न कुरानं, न वा स्वकीयं राष्ट्रम्। यो हि रौद्रो बीभत्सतमश्च तत्र नरसंहार उपस्थापितस्तं वक्तुं यमोऽप्यकम्पत। २१.७–१५पद्यैर्यद् दृश्यमत्र सनातनेन प्रस्तुतं तेन हि यमदंष्ट्रापि दयामृदुरजायत। धिक्कारोऽपि दारुणी कविता। सैवाविरभूदिदंक्षणे समेषामेव वङ्गक्षितिसाहित्यसृजां रत्नभूतानाम्—

चन्द्रेन्द्राः शरदि रवौ च वङ्किमे च
ये श्लिष्टाः सह खलु लेखिनीभिरेषाम् ।
प्रस्तब्धा चितिरधुनाऽपि कल्पनाभि—
र्दुष्प्रेक्ष्यं क्रथनमवेक्ष्य वङ्गभूमौ ।। २१.१७।।
स्वर्लोकादचकमतारविन्दघोषः
संपातं भुवि ससुभाषचन्द्रबोसः ।
यद्गात्रे पविभिरिवाञ्चिते स्मरारिः
सञ्च्यङ् स्वैर्वसतितरां स्म योगयोगैः ।। २१.१८।।
हंसानां परमतमः स रामकृष्ण—
श्चीत्काराननणुतनूनवासृजद् यान् ।
तद्गर्भे विनिहितमीक्ष्यते स्म काव्यं
वैयात्योल्वणकटु हन्त शारदाभिः ।। २१.१९।।

अत्र कवेः प्रबोधमन्त्रः—

सत्कर्त्तुं यममहिषस्य कण्ठघण्टां
स्वां नान्दीं यदि मुखरीकरोषि मर्त्य !

पूर्वं त्वां प्रियसुहृदं ततः परं हि
शत्रूँस्ते स खलु समादरिष्यतेऽद्धा ॥ २१.३५॥

नवतिसहस्राः पाकसैनिका इन्दिरादेव्या वन्दीकृताः— (२१.५७)

साहस्री नवतिमतीत्य पूर्य्यमाणा
योद्धॄणां भरतभुवा न हिंसिता यत् ।
पुंजातेर्विघसमहाव्रणे तदेतद्
भैषज्यं किमपि विरोपणं तदाभूत् ॥ २१.५७॥

प्रसङ्गेऽत्र सूक्तिमयानि भूयांसि भवन्ति पद्यानि। रथोद्धता तेषु वृत्तम्। स्वागतावृत्तमपि।

इदानीमेव लोकसभानिवचिनं जातम्। तत्रेन्दिरा व्यजयत। उच्यते—

गान्धी देवी व्यजयत पुनः संसदं संसदीये ।
तन्त्रे प्राणानिव निदधती लोकनिर्वाचनोत्थान् ॥ २१.८२॥

राष्ट्रपतिरासीद् डॉ० राधाकृष्णः। इदानीं भूयोऽपि राष्ट्रपति—निर्वाचनमकारि। तत्र डॉ० जाकिरहुसैनो राष्ट्रपतित्वेन स्थापितः। तत्र द्वयोस्तुलना—

निर्वाच्य राधाकृष्णस्य स्थाने सा जाकिरं बभौ ।
सिनीवालीव सूर्य्यस्य क्षेत्रे चन्द्रं जिघृक्षती ॥ २२.१॥

जाकिरोऽम्रियत। तस्य स्थाने गिरिर्वराहो निर्वाचने जयमापत्।

जाकिरे त्यक्तदेहे सा वराहं वृण्वती बभौ ।
महाप्रलयवेलेव वसुधोद्धरणोत्सुका ॥ २२.२॥

इदानीं काङ्ग्रेसदले बुद्धिभेद उदभिद्यत। ततो देवान्दिरा नवीनं दलं निर्ममौ। तत्र ध्वजचिह्नं सवत्सा गौः। गौरेषा कामधेनुरसिध्यत, यतो निर्वाचने पादत्रयमियं व्यलभत।

वाङ्ग्लादेशमासाद्यापि देवीन्दिरा व्यसृजत् तथैव यथा पञ्चापान् विजित्यापि शास्त्रिमतिस्तत्याज।

वाङ्गलादेशमासाद्य जहती तच्चितिर्बभौ ।
मुञ्चती प्राप्य पञ्चापाञ् शेमुषी शास्त्रिणो यथा ।। २२.९।।

कथमियं न: प्रवृत्तिरिति प्रश्ने सनातनस्योत्तरम्—

इयं हि भारतीयानां बुद्धानामुज्ज्वला मतिः ।
प्रतिरोपं समुत्खातानुजत्वे याऽभिषिञ्चति ।। २२.१०।।

प्रसङ्गेऽत्र शान्तेर्गौरवमगीयत प्राशस्त्येन।

इन्दिरादेव्या निर्वाचनं प्रयागस्थ उच्चन्यायालयोऽवैधममन्यत। २२.३६पद्यं दृश्यताम्—

प्रधानमन्त्रिताभाजोऽप्यस्या निर्वाचने तदा ।
अजूघुषदवैधत्वं न्यायपीठं प्रयागगम् ।। २२.३६।।

तत्र न्यायमूर्त्ति: श्रीमान् जगमोहन:। कविस्तमेनमेवं प्राशंसत्—

जगमोहनसंज्ञस्य न्यायमूर्त्तेरभीकताम् ।
वेण्यस्तिस्रोऽपि तत्रत्या वीचीवक्षःस्वलेलिखन् ।। २२.३९।।

अथाग्रिमै: ४०—४९पद्यैर्न्यायधर्मयोरन्वयस्य प्रशंसा। तेनैव हेतुना प्रयागस्य तीर्थराजत्वम् (२२.४९) इत: परिक्षीणाधिकाराया इन्दिरादेव्या: कष्टकष्टा दिवसा:। मुरारजीभाई देसाई जगजीवनराम इतीदृशा अपि महान्तो नेतारस्तां परित्यक्तवन्त: (२२.५८) अत्र राष्ट्रियायाश्चेतनाया: स्थितिं व्यवर्णयत् प्रबुद्ध: सुकवि: (२२. ५९—७१) तत: परम्—

इन्दिरा स्वां चितिं यद्वा संविद्भट्टारिकां पराम् ।
ययाचे मार्गमेतस्मिन् क्षणे, शय्यां न, गत्वरी ।। २२.७२।।

लब्धो मार्गस्तया संविधानसंशोधनात्मा। अजूघुषत् सा पूर्वं संपूर्णेऽपि भारतराष्ट्र आपत्कालम्। कारानिरुद्धानकार्षीत् सा

जयप्रकाशनारायणादीन् मनीषिणः। एकः कृपलानी तु मुक्त एव त्यक्तः (२२.७८) आपत्कालघोषणयाऽनुशासनमुच्छ्श्वास। रेलयानानि दविष्ठान्यपि स्थानानि यथासमयं प्रापुः (२२.८०) किन्तु, अत्याचारोऽक्रियत जनेषु शासनसेवकैः। बलादेव निरुध्य तेषां शुक्रनाड्योऽकृत्त्यन्त। पतिवत्न्यो या योषितस्ताभिर्हाहाकार आरब्धः।

शुक्रनाडीं बलादेव कर्त्तित्वा हन्त मत्पतिः ।
क्लीबतामापितः साहं सौभाग्येनास्मि वञ्चिता ।।

इति गेहिनीनां हाहाकाराः। विमृशन्तु भद्राः सौभाग्यशब्दार्थान्।

पुत्रः कुत्र पतिः कुत्र पत्नी कुत्र क्व वा सुहृत् ।
अवेदीदिति धातारं विहायान्यो न गेहिनाम् ।। २२.८४।।

कारागारेषु रुद्धानां भोज्यान्यन्धांसि विषमिश्राण्यक्रियन्त—

कारागारेषु रुद्धानां भोज्यान्यन्धांस्यरूरुजन् ।
अन्तश्चराणि गात्राणि विषयोगेन भूयसाम् ।। २२.८५।।

तत्र चतुरो राजनारायणसिंहनामा पृथूदरो नेता। विषयोगं मृषाकारयत जल—क्लिन्नानि चणकान्येवाचर्वयत —

राजनारायणः सिंहोऽप्यपूरयत मुष्टिभिः ।
चणकानां जलक्लिन्नगात्राणां स्वं पृथूदरम् ।। २२.८६।।

अथ माताऽन्नपूर्णा विश्वनाथमयाचत—'विभो 'गणं त्वेकमिमं मुञ्चे'—ति (२२.८७)।

आपत्कालस्य तां कन्थां मत्स्त्यादानीमिदंक्षणे ।
संजहारेन्दिरा सायन्तने सूर्या रुचं यथा ।। २२.८८।।

अथ— **पश्यन्ति स्म तदाऽऽकाशाद् भारतीयां वसुन्धराम् ।**
विस्मयेन समाविष्टा गान्धिशास्त्रिजवाहराः ।। २२.८९।।

एवमेव—

उत्प्लुत्योत्प्लुत्य काव्यानामक्षरेभ्यस्तदेन्दिराम् ।
प्रेक्षन्ते स्म रवीन्द्राद्याः कवयस्तां महीयसीम् ।। २२.९०।।
वसिष्ठप्रमुखाः सर्वे पुरोहितपुरोगमाः ।
नेतारोऽप्यक्षिकोषेषु व्याकोशीमद्भुतामधुः ।। २२.९१ ।।
विवेकानन्दमानन्दो जहौ मन्थक्षणे यथा ।
समुद्रं, शेषशय्यातः पलायिततमो हरिः ।। २२.९२।।
कालिदासः सचाणक्यः स्वकीयं युगवीक्षणम् ।
विपर्यासितमालक्ष्य दिवं बाष्पैरपिप्लवत् ।। २२.९३।।

इदानीम्—

गाण्डीवमर्जुनोऽस्प्राक्षीद् गदां भद्रः, परन्तु सः ।
शकुनिः कूटकाषायान् पाशान् भूयोऽप्यचीकृषत् ।। २२.९४।।

(भद्रो बलभद्रः कृष्णाग्रजः)। किन्तु—

स्वाध्यायव्रतिनः किन्तु प्रेक्षावन्तः कवीश्वराः ।
नापश्यन् कञ्चिदायान्तं न वा यान्तं तटस्थिताः ।। २२.९६।।

अथ सर्गावसानम्—

इति गतवति राहावैन्दवीव प्रभाऽस्मिन्
स्फुरति पुनरपि स्म क्ष्मातले भारतीये ।
जनमनसि तनीयान् प्रत्ययो येन भूयो—
ऽप्यलभत निजतायाः शासने लिप्सितायाः ।। २२.९७।।

पुष्पिकायां सर्गोऽयमापत्कालसंहार—नाम्ना लक्षितः।

अथाग्रे त्रयोविंशः सर्गः।

भारतेऽनटीनट्यन्ताद्भुतरसा नाट्यप्रयोगाः। वृत्तपत्राणि तत्र तन्त्राणि। २३.१—१४ पद्येषु नाट्यप्रयोगा इमेऽत्राप्युपस्थापिताः।

२३.१५ पद्येनोच्यते—

यच्च किञ्चिदभवन्निजं दलं न्यूनतामिदमशान संसदि ।
इन्दिरा न खलु तेन साम्प्रतं मन्त्रिणी, न च बभूव सांसदा ।। २३.१५।।

इन्दिरा देवी मृगाक्षीत्युच्यते। तत् सत्यमेवेति कवेरुत्प्रेक्षा—

सा मृगार्भकविशाललोचना सत्यमेव समभूत् किमन्यथा ।
प्रातिभासिकपदार्थमप्यसौ पारमार्थिकममंस्त वस्तुतः ।। २३.११ ।।

साम्प्रतं पं० द्वारकाप्रसादमिश्रादयो नूत्नं निर्वाचनं प्रास्तुवन्। इन्दिरया स एष प्रस्तावः स्वीकृतः। कारितनिर्वाचना च पराजयमुख—मपश्यत्—

सा ससंजयसुता महीयसी न व्यजेष्ट जनतन्त्रशासनम् ।
नाध्यगाच्च पुनरद्य संसदं यातुमुत्सुकतराऽपि भाविनी ।। २३.१४।।

ये निर्वाचनं जितवन्तस्तेषु चरणसिंहः अटलविहारी च वरयामासतुः श्रीमुरारजिभाईदेसाई नामकं प्रधानमन्त्रिपदाय। (२३.२२) इदानीम् —

राष्ट्रपतिः — नीलमसञ्जीवोरेड्डी,
प्रधानमन्त्री — श्रीमानटलबिहारी वाजपेयी,
स्वराष्ट्रमन्त्री — चौधरी चरणसिंहः,
स्वास्थ्यमन्त्री— श्रीमान् राजनारायणसिंहः,
शिक्षामन्त्री — डॉ० प्रतापचन्द्रश्चन्दरः एतस्य समयस्य प्रशंसा—

श्रीरेड्डी पतिरथ चन्द्र एष शिक्षा—
मन्त्री यद् भरतमहीतले ह्यभूताम् ।
वैदुष्यं श्वसिसितितरां स्म हन्त ताभ्या—
मेताभ्यां गुरुरिव केतुचन्द्रमोभ्याम् ।। २३.४३।।

अवसरेऽत्र काव्यमिदं विवेचयति—'को वा धर्मः कश्च नय' इति। वक्त्यसौ—

ये तु शास्त्रनयसंस्कृतान्तरा मेदुरा विविधतर्ककौशलैः ।
ते न धर्मनययोर्विवेचने बुद्धिमान्द्यमुपयान्ति कोविदाः ।। २३.३६।।

सेयं शास्तृणां संहतिर्यया‌ऽलम्भि शासनं तस्या दौबलीं लक्षयति सुकविरेषः—

सामुद्रे परिसर ईक्ष्यतेतरां वै
कर्काणां समज उदूढबन्धुभावः ।
तन्त्रं वै भवति तु तत्र बन्धुभावे
भङ्गोत्था प्रहतिरनेकदृक्पदानाम् ।। २३.४४।।

कर्कस्यानेकदृक्पथत्वमेवमत्र निरूपितम्—

कर्को वै क्षिपति दृशं दिशा यया
तां नो पादा अनुसरणेन भावयन्ते ।
तिर्यक्त्वं प्रतिनियतायते हि तेषु
वक्रत्वं भवति च वल्लभं सदैषाम् ।। २३.४५।।

सप्तर्षिकाङ्ग्रेसेऽपि सेयं सूक्तिरादृता—

सिन्धौ कुलीरा बहवो वसन्ति सर्वेऽपि तिर्यग्गतिका भवन्ति ।
तरङ्गभङ्गाहतिमात्रखेदातुराश्च ते संघटिता भवन्ति ।। इति।

श्रीचन्द्रशेखरो वायुयाने स एष श्लोकः श्रावितोस्माभिः।

एषैव जाता परिणतिः। विरुद्धवचसौ चरणो राजनारायणश्च मुरारजीभाइना बहिष्कृतौ। कृत बहुप्रयत्नावपि तेनैतौ न पुनर्गृहीतौ। अटलविहारिमहोदयस्य हठेन गृहीतावेतौ मन्त्रिमण्डलं पातयामासतुः। तत्राऽऽक्रोशोऽस्माकमेवं प्रकाशमाप—

को वै मूर्खश्चरमपरमो, कश्च राष्ट्रापराधी
स्वार्थे मग्नः क इव क इवोदग्रभाग्योऽद्य लोके ।
गान्धी देवी चरणविरुदश्चौधरी बाजपेयी

चूलीन्यायाद् विकलमतिको राजनारायणश्चे ।।'—ति।

पृथगिदं पद्यम्। अत्र त्यक्तम्।

पतनात् पूर्वमेतेन शासनेनैकः 'शाहायोग'—नामक आयोगोऽपि स्थापित, इन्दिरादेव्याः कार्यकलापस्य परीक्षणाय।

इदानीमेव जैनेनैकेन सञ्जये दोष आरोपितो महत उत्कोचस्य। इन्दिरादेवी द्वित्राणि दिनानि कारागारेऽप्येभिः पातिता। अत्र पद्यम्—

द्वित्रा इयं भगवती रजनीर्निनाय
श्रीकृष्णजन्मसदनेऽपि बलान्निरुद्धा ।
विश्वं तदा कलयते स्म तदेव सत्यं
चक्रस्य नेमिमुपसीदति यच्चलन्तीम् ।। २३.६३।।

'चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिरि'—ति एव्यम्।

शासनेन इन्दिरानिवाससभवनमपि परीक्षितम्। तत्र वराटिकापि न लब्धा।

इन्दिरया स्थापितं कालपात्रमपि शासनेनोत्खनितम् तत्रापि न किञ्चिल्लब्धमापत्तिजनकम्। २३.६७—६९पद्येषु पुनरपि यमनियम—योरुपनिबन्धः। सर्गस्यास्य नाम 'अन्तःकलह' इति।

अतः परं दुष्परिणामकथा। तस्या आरम्भः—

नारायणः स चरणश्च स भूय एव
देसायिना सपदि तेन यदा गृहीतौ ।
तत् संविदं परिपपात जलस्य बिन्दू
आसाद्य दीपक इव प्रकिरँस्तमांसि ।। २४.१।।

ततो रेड्डी चरणाय भारतानां प्राधान्यं ददौ। तदिदमालोच्यते—

रेड्डी मुरारिमवमत्य ददौ तदानीं
प्राधान्यमस्य चरणाय महीतलस्य ।

भीष्मो युधिष्ठिरमुपेक्ष्य सुयोधनाय
यस्मिन् खिलीकृतमतिः प्रदिदेश राज्यम् ।। २४.३।।

खिलीकृतिरत्र नूनं गूढार्था। अथ परिणामः —

सिंहोऽपि संसदि स नैव शशाक लब्धुं
स्वीयं समर्थनमिति क्षपितो विरेजे ।
वज्रो नु वारिददरीष्वनवाप्य भूमिं
भूमौ पतन् क्रकचवत् क्रथयँश्च काष्ठाः ।। २४.४।।

अत्र कवेः प्रतिक्रियाः। जनाक्रोश—नाम्ना सम्पन्नेऽस्मिन् १११ पद्यात्मके सर्गे

महार्हो न्यक्कारो गुरुकुलगतानामयमहो
महोपाध्यायानां जल इव हविष्यं प्रकिरताम् ।
इदं द्यावाभूम्योरुदरमतिमात्रं कलुषितं
सथूत्कारं युष्मास्वहरहरिदं वर्षति विषम् ।। २४.८४।।

चतुर्भिरेवाऽनुच्छेदैः एकादशोत्तरपद्यशतकेन मुद्रितस्य चतुर्विंशस्य तु सर्गस्यच्छटैव भिन्ना। अन्तिमेनैकेन पृथ्वीवृत्तेन सह ११० शिखरिण्योऽत्र तथा प्रवाहपूर्णा यथा केवलेनैकेनैव श्वासेन संपाठमपेक्षन्ते। विषयोऽत्र मनुष्यदुर्बलताया धिक्कारः। किन्तु कविराशावादी। वक्ति सः—

रुदन्तु ग्रावाणो मम तु निटिलेऽस्मिन् बत मुदा—
मसीमानां सिन्धुर्विलुठति, चिदात्मास्मि न जडः ।
जडत्वेन क्लिष्टा यदि परिजिहासन्तकि शुचः
प्रलीयेरँस्तेऽस्मिन् मयि शिवशिरःस्थे द्विजपतौ ।। २४.११०।।

अत्रानेकाः सूक्तिभूताः श्लोकाः। अन्तिमः श्लोको वीक्ष्यताम्—

सनातनतमानिमान् विषमभावहालाहलाऽ—
ऽनलार्चिरुदरान् महामनुजवंश—रोषस्वरान् ।

अमूर्च्छयदिदं नभोऽवनि—युगान्तरालं तदा
न मध्यममियं चिते रुतिरपेक्ष्यते वृद्धकम् ॥ २४.१११ ॥

सर्गस्य पुष्पिकायां दीयतेऽस्मै नाम 'जनाक्रोश' इति। सर्गद्वयात्मकमप्यसावेक एव सर्गो गणयितुं शक्यते। वाक्प्रवाहो विचारप्रवाहमत्रातिशेते। सेयं महती प्रौढिः कवेः।

पञ्चविंशे सर्गे ये चत्वारोऽनुच्छेदास्तेषु वैष्णवीनाम्ना प्रसिद्धाया भगवत्याः हिमशैलसुताया या या स्तुतयस्तासां वक्तव्यानि कविः स्वमुखेनैवोद्गिरन् ब्रूते—

भाङ्कारितेषु पवनैः शिखरेषु दिव्यां
स्तोत्रावलीं परमभागवतप्रगीताम् ।
शुश्राव सा भगवती प्रियदर्शिनी यां
शोकापहाञ्च सरसाञ्च सदर्शनाञ्च ॥ २५.२ ॥

स्तोत्रावलीयं फलं शोकापहेत्युच्यते, आस्वादे सरसेति, अर्थबन्धे सदर्शनेति च। तत्र हेतुः स्तोतॄणां गुणाः, ते हि भवन्ति परमा भागवता हृदयेन, उत्तमोत्तमाश्च गायनेषु। गीतिमयी हि भगवते रोचते स्तुतिरिति महाकवीनां परम्परा। तथाहि रामायणस्य गातारौ वाल्मीकिशिष्यौ शिष्यौ सीतायाः पुत्रावेव। तथाहि रघुवंशे—

गेये को नु विनेता वां कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ॥ इति,

गीतश्रवणस्य प्रभावोऽपि कविश्रेष्ठेन स्वयमूचे—

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिःष्यन्दिनी प्रातर्निर्वातेव वनस्थली ॥ ति।

दुष्यन्तो मर्त्यः, तस्य चरितं लिखन्ति पुनरमर्त्त्या दिवौकसः। कुत्र लिखन्ति? कल्पलतांशुकेषु लिखन्ति। गद्यबन्धेन वा लिखन्ति पद्यबन्धेन

वेति जिज्ञास्य उत्तरं 'गीतक्षममर्थबन्धं विचिन्त्ये'—ति। प्रकृते 'प्रगीता—मित्युक्ते त इमे सर्वेऽभिप्राया दर्शयन्तीवात्मानं प्रमुख उपस्थाय। अथ स्तोत्रावल्याः सूक्ष्मत्वं सदर्शनत्वं च दृश्येत। तथाहि 'मम प्राणेषु या पिपासा जागर्त्ति सा रूपहीनापि परमपरिमाणा सुरसाशतीवदनायते'—

उदन्या प्राणानां निजिगिरिषति द्यां भुवमिमां
परिव्याप्त्या युक्तां सकलकलयास्यास्तलमिदम् ।
अहो अस्याः कुक्षेः क्वचन कुहरे वामनतया
परिक्लिष्टा ह्येषा भ्रमति सुरसाया मुखशती ।। २५.३।। ति।

अहो कवेरतिशयकौशलम्! अग्रे दर्शनमपि—

महानाभोगोऽयं
गगनमपि पारेण रहितं, परब्रह्मप्रख्यं विभु
पवनदोलां निगिरति।
अमी सूर्याः
सर्वैः किरणविसरैः सार्ध—
मभितः, समस्तैर्ज्योतिर्भिः सह
दधति यात्रामिह पराम्।। २५.०४।। इति।

यमा अप्यत्रारुचिरा विभाव्यन्ते—

यमा!
यूयं रत्नैर् भुवनमिदमापूर्य ददते।
न मह्यं रोचध्वे,
ज्वलिति वृकनामा मयि तु सः, महानग्नी,
रोचिः परिलघु परं यस्य भुवनान्यमूनि द्राग् दग्धुं
प्रभवति लघीयस्यपि पले।। २५.०७।।

अथ दिक्पाला अनुयुज्यन्ते—

ब्रुवन्तु क्षोदिष्ठा इव ननु महिष्ठा अपि समेऽप्यमी
धिग् दिक्पालाः
सह निजनिजैः स्तोत्रकविभिः,
मदीयेऽस्मिन् गाढे/दीर्घे/घोरे/क्रूरे तमसि विकराले
क्व नु परो विलिल्ये श्रीजानिः,
क्व च पितृगणानामपि पिता।। २५.८।। इति,
समाधिं कैलासे श्रयति खलु यस्मिन्
स परमः शिवः
समं सर्वैः सार्धं प्रमथपतिभिः
सोऽपि सहसा हहा कर्पूरत्वं बत बत गतः,
स्वस्तिपरमा न दृश्यन्ते सन्तोऽप्यहह सनकाद्याः
वितम/रज—सः।। २५.९।।

आश्चर्यकरमिदं यत्—

शृगालोऽयं जीर्णो ननु शमकथां कायति
शिरः प्रकम्पन्
वात्याभिर्मनसि निभृताभिः प्रतिहतम्

अणुपरिमाणेऽपि मनसि नैका भवन्ति निभृता झञ्झावाता इति कोऽयमतिशयः। अथवा कस्तावद् विषमः, कश्चाधिक इत्यलङ्कारः।

अयं स्तेनश्चौर्यै रहसि मुषितान् हन्त मसृणान्
सुवर्णानां राशीन्
इह मयि हि गोपायति चिरात्।। २५.१०।।

मयीत्यर्थान्तरसंक्रमणकला—'दुर्लक्ष दुर्लक्षलक्षाणामि'—ति।

स्मरन्तु 'संघातपरार्थत्वादि'—ति पुरुषसाधकं सांख्यम्—

इयं मृत्स्ना (२५.१३), अमी शैला (२५.१४) अमी विश्वामित्रा (२५.१५), अमुष्या उर्वश्याः (२५.१६), विसृष्टिः सृष्टीनाम् (२५.१७)

इति पञ्चभिः शिखरिणीभिः प्रपञ्चितो यः संघातस्तद्रूपा शय्या कस्य वा भुवनकमनीयस्य कृते रचितेति काव्यमास्वाद्यताम्—

इमा मृद्वीकानां वृतय
इह पाकेन विदलन्त्यमुष्मिन्नुद्याने किमिति शिखिभिः पीतगरले
इयं शय्या
कस्मै
भुवनकमनीयाय रचिता त्रिलोकाङ्गी
दिव्या भुवि दिवि च वैचित्र्यसुभगा।। २५.१८।।

सर्वविधैरभावैः परीवृतानामपि श्वाससन्ततीनां रहस्यमत्र जिज्ञास्यते—

रथाङ्गानां द्वन्द्वाः किमिति तिमिरान्धीकृतचराऽ—
चरामावास्यायामहह तनुबन्धान्न जहति ?
किमित्याशापाशैरनशनपरास्त्यक्तजगती—
चमत्कारा एते दिनमणिमुदीतं प्रवृणते ।। २५.१९।।

सूर्योदयश्चक्रवाकदम्पतीनां रात्रिविप्रलम्भपूर्त्तिकालः।

'अमी स्वर्वैद्या० (२५.२०) इत्यस्मात् २५.२४तमं पद्यं यावद् विज्ञानवैभवं प्रस्तूय तमेन—

अमूषां पीयूषप्रतिभटरसानां द्युसरिता—
मणिष्ठेऽप्येकस्मिन् विलसतितरां विप्रुषि तु यः ।
विरावो रेवायाः श्रुतिललितमन्त्रावलिशुभं
तमेतं शृण्वन्तो निरुपधि लसामः समदृशः ।। २५.२५।।

इति यां सिद्धिं प्रस्तौति कविस्तत्र लुठन्तितरां दर्शनानि तत्तानि।

'मूमफली'—ति काचिद् भूमिगर्भे फलन्ती त्रिबीजा लता। तस्यास्तैलगर्भाणि बीजानि भर्जयित्वा रसयन्ति बालवृद्धयुवानः। तत्रोच्यते—

वपसि धरणीगर्भे त्वं यां हि भूमफलीमिमां
प्रतिशिफमलंभावैस्तैस्तैर्वृतां शतशाखिनीम् ।
अहह मसृणां स्निग्धां बीजत्रयीप्रविराजितां
किमिति भगवँस्तां वै त्वं नो विभर्जयसे रसी ॥ २५.२८॥

त्रिगुणात्मिकाया भोग्याया मायाया इदं कीदृशं चित्रम्।

समग्रता नोपहताऽत्र तात्त्विकी
समस्तलोकानुभवश्च सत्कृतः ।
सनातनस्यैव महाकवीनां
दासस्य सैषाऽस्ति चमत्कृतिर्वै ॥

इति तु केवलमत्र शक्यते वक्तुम्।

अत्रैव दाडिमीरूपकं रस्यतामार्यैः। सा ह्येषा चित्रतनुर्दाडिमी सरसा। तस्या अस्या भोगेच्छयाऽपि भवान् स्पृष्टः। तत्र भवानेवोचितः भोक्ता, किन्तु तस्या भोगस्य कर्तृत्वं निहितं मयि। इयं भगवतस्ते परात्परतैव—

अयि बत भवानेतां यां दाडिमीं खलु सृष्टवान्
अथ निहितवानस्या बीजेषु चित्रतनो रसान् ।
अधिरसमभूत् स्पृष्टो भोगेच्छया यदि कर्तृतां
मयि निहितवानस्या भुक्तेः परात्पर! किं भवान् ॥ २५.२९॥

अमृतविषयोर्युद्धं निर्विरामं प्रसृमरं दृश्यते। भवाँश्च सुदर्शनकरः। किमित्यत्र तत् सुदर्शनं न क्षिपति? अहह विदिहं 'द्वन्द्वगते युद्धेऽत्र भवानपि न प्रभवति इति—

अमृतविषयोर्युद्धे सान्तत्यतः प्रविसृत्वरे
किमिति भवता नास्मिन् स्वीयं सुदर्शनमस्यते ।
अहह विदितं द्वन्द्वे ह्यस्मिन् भवानपि न प्रभुर्
विनिगमयितुं धन्याधन्यत्वमस्य कृते मम ॥ २५.३०॥

मम च दशा का? दरिद्रस्य प्रसृताञ्जलिकस्य बुभुक्षाकबलितकुक्षे:। पद्यं—

स्वपिमि, विरतस्वापस्तूर्णं भवामि तत: पुन:
स्वपिमि दिवसानेवं रात्रीश्च संक्षपयाम्यहम् ।। २५.३१।।

अथ जीविकार्थं प्रसृतिपिटकस्य भवति प्रविसारणमुपाय:। भवन्तमेव प्रार्थये अत्र मम प्रसृतिपिटके किमपि निपातयेरिति।

स्वपिमि, विरतस्वापस्तूर्णं भवामि पुनस्तत:
स्वपिमि, दिवसान् रात्रीश्च संक्षपयाम्यहम् ।
प्रसृतिपिटकं चैतं नित्यं त्वयि प्रविसारयन्
किमपि निभृतं क्षेप्तुं तस्मिंश्च देव! विरौम्यहम् ।। २५.३१।।

अत्र कीदृशी 'विरौमी'—ति क्रिया? अनुच्छेदस्यास्य पर्यवसाने प्रार्थना—

अयि बत मया ज्ञातं त्वं मर्कटै रमसे प्रभो!
विविधविविधान् भावाँस्तॉस्तान् रसॉश्च विभावयन् ।
डमरुकमियं तस्मिन् रासे सनातनभारती
डमयति रसात् स्वैरं तां देवदेव! कृतार्थये: ।। २५.३२।।

सोऽयं गोकुलनाथस्य शिवशतकगत: शिवोपालम्भ एव। जगदम्ब!

त्वदीये पदाम्भोजद्वन्द्वे कति न चकोरन्ति कवय:?
त्वदीये त्रैलोक्यप्रसविनि! चमत्कारचरमावधेस्ताते कुत्रा—
प्यतिशयशतैरप्यकलिते ।
पदाम्भोजद्वन्द्वप्रसृतरुचि—चन्द्रातप—सुधा—
महाकूपारेऽस्मिन् कति न हि चकोरन्ति कवय: ।। २५.३५।।

आक्षेपचमत्कारमनुभवन्तु सहृदया:—

इमे पीयूषाब्दा वियति परमे मेदुरघटा
नटन्तो दृश्यन्ते प्रतिदिशम्,

अमीषामपि शिवे!
इमे धारासारा अहह विरसास्
त्वत्पदरजःसिताया माधुर्य्यं यदवधि न तत्र प्रसरति ।। २५.४६।।

कविर्विद्याध्ययनमेव जगदम्बिकासपर्यात्वेन गणयति—

न तन्त्रैर्मन्त्रैर्वा, न च कुसुमगन्धादिभिरसौ
सपर्यावैदग्धी—परिचितिमिदानीं विवृणुते ।
श्रुतिस्वाध्यायेषु द्रढिमरमणीयेन मनसा
रतेर्यावाँल्लेशः किमपि तमिदानीं विगणयेः ।। २५.४४।।

मिष्टमिष्टमास्वदमानस्य रसनानटी चिञ्चारसं स्प्रष्टुमीहते। एवमेव कवेरभिप्रायः—

तवैष स्वर्गङ्गातरलिततरङ्गेष्वविरतं
फलैर्मौक्तैर्ग्रासं विदधदपि मातः! सितगरुत् ।
कदाचिन्मच्चित्ताज्जडिमकलुषै रागिमभृतैः
स्वचञ्चूशृङ्गारं रचयतु तमःश्याममणिभिः ।। २५.५१।।

भक्तिसिद्धः कविः स्वा विभूतीर्दर्शयति—

परस्यामस्यां मे भुवनकमनीयस्य जननि!
प्रसिद्धायां सिद्धौ प्रणिपतति मह्यं सुरपतिः ।
अहं दृक्साहस्रीसरसिरुहदाम्न्यस्य विसृजा—
म्यथाऽऽमोदालीं स्वां परमशिवभूयाद्भुतरसाम् ।। २५.६२।।

२५.६३ पद्ये भक्त एव हेमानि वर्षित्वा शचीसीमन्तेषु स्वस्तिकलतां दधाति। शच्याः पत्युः सहस्रमप्यक्ष्णां तत्र लघूभवति।

भक्तस्य यन्निवासभवनं तस्य परिसरे सुवर्णानां राशयो विकीर्णाः। ते हि येन बहुकरकरेणापवाह्यन्ते तस्य स्थानं लभते आह्निककरः सूर्यः। सोऽपि तानेतानुल्लासेनापाकरोति। चिन्तामणयश्च सर्वे मातुस्तव दास्याय दत्तप्रार्थनापत्राः परस्परं सोत्प्रासं कलहायन्ते—

सुवर्णानां राशीनहह मम धाम्नः परिसरे
विकीर्णानुल्लासादयमपतनोत्याह्निककरः ।
इमे सर्वे चिन्तामणय इह भृत्याभृतिधनी–
भवन्तः सोत्प्रासं जननि कलहायन्ति रभसात्।। २५.६५।।

कल्पतरवः कामधेनूनां पयोभिर्मूलनिषेचनां तज्जनितमुपचयं च लभन्ते ममागारे। मधुकरविरावैस्ते स्तवनविधिचर्यां विदधते सतास्तास्ता विद्यावधूट्योऽपि यावकशुभा मामभितः क्रमन्ते। फलमिदं तव चरणपार्श्वे स्थितेः –

इमा दिव्यास्तास्ता यमनियमकोटिव्रतशतैः
समाराध्या विद्या अपि नववधूयावकशुभाः ।
क्रमन्ते मां मातस्तव चरणपार्श्वे स्थितिजुषं
प्रति प्रीत्यालीढा नवरसझरीभिर्वितमसम् ।। २५.६८।।

तवैव तत् कारुण्यं यद्धि कदाचित् परमशिवतां भजति, कदाचित् स्वर्गाधिपस्य या परा श्रीस्तत्तां कदाचिच्च विरिञ्च्युदरनिभृत–भुवनकोषताम्। वस्तुतस्तु हे मातः! तवायं महिमा विश्वोत्तीर्ण एव–

कदाचित् कारुण्यं फलति तव मातः! शिवतया
कदाचिन्नाकानामधिपति–परश्रीतनुतया ।
कदाचिद् वैरिञ्चोदरघटितविश्वात्मकतये–
त्यहो विश्वोत्तीर्णस्तव जननि! माहात्म्यगरिमा ।।२५.७१ ।।

अत्र भेदो वा भेदाभावो वेति दुर्निवारे चक्रे समाधात्री भगवती सादृश्यशक्तिरेव। तामाश्रित्य सनातन उदीरयति–(२५.७२)

बिम्बेन प्रतिबिम्बयोः, उदधिना कल्लोलयो–
स्तेजसा सूर्याचन्द्रमसोः, स्वरेण च यथा साहित्यसङ्गीतयोः ।

तत्तत्त्वेन परास्परेण शिवयोरद्वैतमुत्पश्यतां
व्याहार—व्यवहारयो रसमयीं सृष्टिं कवीनां नुमः ।।

अत्राद्ये सादृश्ये विवर्त्तवादः, द्वितीय—तृतीययोः परिणामोन्मुखो विवर्त्तवादः, तुरीये च विवर्त्तोन्मुखो परिणामवादः, आहत्य च चतुर्ष्वपि आभासवादः कृतपदो दार्शनिकानाम्। अत एवोच्यते—(२५.७३)

अभेद—भेदोभय—भिन्नगात्रीं प्रपञ्चमूर्त्या च परिस्फुरन्तीम् ।
पराम्बिकां वा प्रणमामि काञ्चिन्नैयायिकानां प्रतियोगितां वा ।।

प्रतियोगित्वावच्छिन्नावुभावपि भजतः भेदोऽभेदश्चेति। विशेषरूपा सा तदुभयीमतीत्य तयोरेव नृत्यति सम्बन्धतया। ततश्च सा तृतीया स्वतन्त्रात्मा, अनुयोगि—प्रतियोगि—समासाश्रिता चेति तदुभय—निघ्ना, नान्यत्रोपलभ्या चेति वाङ्मयी प्रातिभी वा मायैव, किन्तु नाविद्या। ओ अशक्य वर्णनाम्। अन्यदपि शैवागमिनां प्रातिभं परिस्फुरणं प्रतिपद्यतामार्य्यैः—(२५.७४)

सापेक्षतामात्रमुपाश्रिताना—मिदन्तदाकारतयाञ्चितानाम् ।
मयूरतद्वर्णसमानसीम्नां नमामि भूम्नां तनुमेकरूपाम् ।।

प्रसिद्ध एव मायूराण्डरसन्यायः शैवेषु। मयूरस्य कलापचक्रे यावन्तोऽपि नीलिमाश्रिताः श्वेतश्वेताश्चन्द्रकास्तेषामाकाराश्च सर्वेऽपि ते कृतपदा लसन्ति मयूर्यण्डगर्भस्थित हिरण्यवर्णे रसे, न च भासन्ते पृथक्तया तथैव चराचरात्मकं विचित्ररूपं सावकाशं सकालं च जगदिदं कस्मिंश्चित् परस्मिन् द्वैतसहेऽद्वये च वस्तुसति तत्त्वे। कविकर्मापीदं मायूरमण्डमेव। इतः परानपि श्लोकान् धयन्तु धन्यधन्या मूर्धन्या महान्तो मनीषिणः। उच्यते—

रे दण्डिनो यदिह दर्शनमस्ति 'मिथ्यै—
वैष प्रपञ्च इति' सा प्रतिसर्गभाषा ।

सर्गप्रयोगनिपुणेषु नटेषु या वै
लीला रसप्रसविनी, कविता तु सा नः ।। २५.७५।।
सर्पाऽपसर्प,
न हि रज्जुतनौ त्वमासीः
नो वा भविष्यसि तमःप्रतिभासमूर्त्ते!
सर्गप्रयोगनिपुणेषु नटेषु या वै लीला
रसप्रसविनी,
कविता तु सा नः ।। २५.७९।।

अथ दर्शनपरिणामः।

तस्य स्थावरपार्थिवस्य शिखरादाविर्भवन्तीमिमां
वाग्देवीं श्रवसोर्नभस्तल इयं कृत्वा स्थिरामिन्दिरा ।
नैवाकाङ्क्षदिलां, न वा दिवमहंभावेन रिक्ताऽप्यलं—
भावाढ्या कवितेव काचिदुदिताद्वैता रसैरान्तरैः ।। २५.८०।।

इन्दिरादेव्या आत्मनः कुलदेवता श्रीवैष्णवी माताऽगणि— मैश्वर्यैर्बलिभिः पूजितपदा सती किं ददौ? वैराग्यमिति समुत्तरमत्र कवेः। ततः परं सा देवी भूयोऽपि दिल्लीं प्रतीयाय।

समकालमेव वैद्यनाथधाम कवलितं जातं हिंसापिशाच्या। वर्षाकालेऽपि करभ—कलभावारुह्योपद्रवक्षेत्रं प्राप। उदियाय तस्यां कारुण्यपूरः। अश्रुपूर्णाभ्यां दीर्घाभ्यां सा तत्र बभौ। कीदृशीति प्रश्ने कविरुवाच— (२५.८३)

कारुण्येन, विनापि हेतुमुदयत्तारुण्यपूरेण सा
दीर्घाक्षी कमलानना च विशदां यां बाष्पमालां दधौ ।
सौभाग्येन जिगाय सा भगवतीं वाल्मीकिधाम्नि स्थितां
सीतामश्रुमुखीं सुतद्वयमुखादाकर्ण्य रामायणम् ।।

एषु दिवसेषु नितान्तं कठिनेष्वपि देवीन्दिरा धीरधीश्चेतसा शौर्यमपालयत्। एकलापि सा विषमामेतां घटीमतीतरत्।। २५.८४।।

तेजस्विनीन्दिरा राजीवसंजयसुतद्वयवती विगताधिकारापि तथा बभौ यथा कुशलवसुता माता सीता वाल्मीकिधाम्नि भाति स्म—

राजीवसंजययुता विगताधिकारा
रराजते स्म ननु सा तरसा ज्वलन्ती ।
वाल्मीकिधामनि विवासघटीं नयन्ती
वैखानसी कुशलवानुगतेव सीता ।। २६.०६।।

षड्विंशे सर्गे—

वेशन्तकाः खलु भवन्ति पृथग्विधास्ते
यानाश्रयन्ति ननु रोहित—राजिलाद्याः ।
पाठीनकच्छप—फणीश्वर—राघवाणां
निर्व्यूढिसासहिधुरन्धरता क्व तेषाम् ।। २६.४४।।

सप्तविंशो जवाहरपरिनिर्वाणो नाम चर्चितपूर्व एव।

अष्टाविंशे सर्गे भारतानां प्रधानमन्त्रिपदेऽभ्यषेचि राजीवगाँधी। तत्र प्रतिक्रिया —

राजीवं भरतभुवः प्रधानमन्त्रि—
प्रालेयाचलशिखरे विना विरोधम् ।
आरोप्य स्थविरतमास्त्रिपाठिमुख्या
नेतारः शिवमिव नाकिनः प्रणेमुः ।। २८.१।।

इतरे पुनराचुक्रुशुः—

आसिन्धोरियमवनिस्तदाऽन्वभुङ्क्त
न्यक्कारायुतसहिताँस्तु साधुवादान् ।
पाश्चात्त्या इह खलु भारते भवन्ति
प्राचार्या इति धियि यौवनं विभाव्य ।। २८.२।।

तत्रावसर आसीत् प्रणवस्य मुखर्जिमहोदयस्य य इदानीं राष्ट्रपतिः।—

आसीद् वै प्रणवमुखर्जिनामधारी
मन्त्र्येकः स नहि समर्थयाञ्चकार ।
राजीवप्रमुखपदाभिषेकमेतं
सद्यस्तं बहिरकरोद् दलात् स नेता ।। २८.४।।

राजीवगान्धिनः प्रधानमन्त्रितायां यीशुधर्मः समवर्धत, लङ्कायां लक्षाधिकं सैन्यबल प्रैषिसत्, बलमिदं शत्रुबलं पशुवज्जिहिंस। राजीवो न वेत्ति साहित्यं नाम किमिति, नरा वा, पशुर्वा, पक्षी वा, द्रुमो वा लतिका वेति। साहित्यस्रष्टॄन् महतः कवीनप्यसाववजानाति स्म।। २८.३४।। स्वकीये मन्त्रिमण्डले नासौ विशश्वास। उक्तमत्र—

सुप्तो यः स खलु न बोधितः प्रभाते
मन्त्री स्वं विषयमवाप शासनार्थम् ।
इत्येवं फलकगताक्षसारिकाख्यान्
नित्यं स्वाँश्चलयति मन्त्रिणो वराकान् ।। २८.३७।।

मातुः प्रभावादसौ पदं प्राप पितुः प्रभावाद् भुट्टोबेनजीर इव पाके। एतदुक्तम्—

पाकानामलभत बेनजीरभुट्टो
प्राधान्यं निजपितृगौरवेण यद्वत् ।
राजीवोऽप्यलभत भारतप्रधान—
मन्त्रित्वं निजजननीन्दिरामहिम्ना ।। २८.४१ ।।

राजीवो मातुरिन्दिराया हत्यां प्रमुखे कृत्वा तद्दयया निर्वाचनमजयत—

राजीवो निजजननीचिताधिरूढिं
संदर्श्याक्रथयत चेतनां जनानाम् ।
कालेऽस्मिञ् जनमतसंग्रहं च कृत्वा
चण्डांशुं शरदिव संसदं विजिग्ये ।। २८.६१ ।।

अब्दपञ्चकं शासनमकरोद् राजीवः—

पञ्चाब्दानतनुत निर्विशङ्कचित्तः
साम्राज्यं भरतभुवीन्दिरातनूजः ।
बोफोर्सज्वलन उदित्वरे तु सर्पि—
र्भावं सोऽव्रजदिह विश्वनाथधार्ष्ट्यात् ।। २८.६५।।

अत्र प्रकरणेऽन्यायधिक्कार एवं मन्त्रिति—

अन्याय्यं नय इति येऽपयातलज्जाः
कार्पण्यात् समुदमुदाहरन्ति धृष्टाः ।
धात्रि! त्वं किमिति रसातलं न यासि
स्वैरत्वे गतिमति सत्यहो तदीये ।। २८.६३।।

कालेऽस्मिन् परिणतिमाप पञ्चमोब्दः
नूत्नोऽभूज्जनमतसंग्रहस्ततश्च ।
काङ्ग्रेसोऽलभत न यत्र बाहुमत्यं
प्राधान्येऽव्रियत यतः स विश्वनाथः ।। २८.८३।।

राजीवः प्रियतमया तया सहासीत्
पाश्चात्त्यः खलु वपुषा चरित्रतश्च ।
लोकोऽभून्निरतिशयप्रसन्नचेताः
प्राधान्यं गतवति तेन भारतीये ।। २८.८४।।

चङ्क्रम्यां भजति परं स्म भाग्यचक्रं
नैभृत्यात् क्षण इह भारतीयतायाः ।
पौष्पीति स्रजमधिकन्धरं दधे यां
लोकोऽभूद् गरलमयी फणिप्रिया यत् ।। २८.८५।।

आगन्तृ त्वरितमवाप्य पत्रमेतां
तातीर्यो सरितमतिप्रचण्डवेगाम् ।
इत्येवं गणयति यात्रिणि प्रपन्नं
यत् पत्रं तदपि विभग्नमध्यमासीत् ।। २८.८६।।

माडानामधिपतिरेष मन्त्रिभावं
लब्ध्वैव प्रथममनीनमद् बुखारिम् ।
यस्तावद् गुरुरिति मुस्लिमेषु पूज्यो
हिन्दूनामभवदरातिरेव धर्मे ॥ २८.८७॥
आदेशादगमयदस्य गेहमन्त्रि–
भावं स प्रतिहतबुद्धिकः सईदम् ।
यः पुत्रीमपहरतो मुमोच दीनः
कश्मीरक्षिति–रुधिर–प्रियानरातीन् ॥ २८.८८॥
साहाय्यादभवदसौ प्रधानमन्त्री
येषां ते बत बत भाजपासदस्याः ।
तन्मिथ्याऽश्वसनशतानि हन्त सोढ्वा
निर्वेदं हृदि परमं बभार तस्मै ॥ २८.८९॥
साकेते मुसलिमदूषितामवाप्तुं
संपूर्णां पुनरपि रामजन्मभूमिम् ।
यैः कैश्चित् प्रणयितया प्रधानमन्त्री
संदृष्टश्छलजलधावमी न्यमज्जन् ॥ २८.९०॥
राजीवोऽप्यकृत सहायतां हि तेषा–
मासन् ये मुसलिमपक्षपातकष्टाः ।
भूरेषा व्यशपदमून् समान् सरोषा
नेत्राम्भः कथमपि संनिरुध्य चित्ते ॥ २८.९१॥
राजीवः स च खलु विश्वनाथसिंहो
हिन्दूनामपरतिमापतुर्गरिष्ठाम् ।
रामः क्व क्व च जननायकत्वमूर्ध्नि
प्रच्छन्नौ मलिनमुखाविमौ द्विजिह्वौ ॥ २८.९२॥

अडवानी नाम भाजपा दलस्य शीर्षस्थो नेता। तस्य रथः साकेतं प्रति प्रतिष्ठत।

अड्वानी परजलधेस्तटाद् रथं स्वं
साकेताभिमुखमचालयद् तदानीम् ।
यं द्रष्टुं भरतमही समापि हर्षा–
दौत्सुक्यं परममुवाह विस्मयाढ्यम् ॥ २८.९३॥
तद् दृष्ट्वा व्यचलदसौ प्रधानमन्त्री
स्वां पश्यन्नियतिमतीव भुग्नभुग्नाम् ।
अड्वानीमरुणदसौ विहारराज्ये
लालूत्थां पुलिससहायतामवाप्य ॥ २८.९४॥
साकेते पुनरपिबत् सहस्रषट्क–
भक्ताऽसृक्सरितमहो मुलायमाख्यः ।
यो गोलीः शिरसि ववर्ष रामभक्तव्रात–
स्याञ्जलिगत–पुष्प–माल्यकस्य ॥ २८.९५॥

विश्वनाथप्रतापसिंहस्य स्थाने चन्द्रशेखरसिंहः प्रधानमन्त्रित्वं भेजे। तस्य चित्रं

श्रीचन्द्रशेखर इति प्रथिताभिधानः
प्राधान्यमाप्य भरतावनिशासकेषु ।
रेजे तथा शरदि राजति नृत्तशीर्ण–
पिच्छो यथा गिरिशिरःस्थितिमान् मयूरः ॥ २८.११७॥

सर्गस्य नाम पुष्पिकायां दीयते 'प्राधान्यसंक्रम' इति।

अथ राजीवस्य शरीरपातः। नवीनस्य निर्वाचनस्य समये मतं भिक्षमाणो राजीवो दक्षिणां दिशं जगाम। कृत्या पुनस्तमन्वसरत्। आरक्षिणस्तां लक्षयितुं नाशकन्। पेरम्बुदूर नगरीं प्रयातः स जनमञ्चं

यावदारोहति तावदेव कृत्ययाऽसौ चरणयोरस्पृश्यत। विश्वमिदं पश्यति। अस्मिन्नेन विद्युन्निहृदि ध्वनिरिवोच्चचार। राजीवगान्धिना सह चतुर्दश जना कीर्त्तिष्वेवावाशिव्यन्त, स्थूलैर्देहैस्त्वनङ्गतां ययुरिमे। कृत्यापि सा मृतेषु तेष्वन्द्यतया। मुखमात्रमस्या अवशिष्टम्। अन्वसरत् सा राजीवं बहुभ्यो नगरेभ्यः।

इदानीमन्वेषणा भवति, मृतेषु के वाऽवशेषा राजीवस्य। अन्ते तस्य उपानहोर्वैशिष्टचेनाभ्यज्ञायत एषोऽवशेषोऽस्येति। स एव दिल्लीं नीत्वाऽग्रयेऽभ्यरितिः। विददार हृदयानि तरलचेतसां कवीन्द्राणाम्। विलापानसृजत् तेषां प्रतिभा। सनातनकवेस्त्रोत्प्रेक्षा—

रामानुजेन कृतरामविरोध एष
श्रीरामजन्मभुवि रोषकषायितेन ।
दष्टो नु वासवजितो गतिमाशु पेदे
राजीवगान्धिरिति भावयते स्म धीरः ।। ३०.४४।।

अन्येषामपि राजपुरुषाणामीदृश्येव गतिः—

भुट्टोऽसुदण्डमभजद् यिरशादनामा
वङ्गस्य राष्ट्रपतिराप दशाब्दकाराम् ।
उत्थानपातपरिकण्डितसन्धिबन्धे
को वा प्रशासितरि पश्यति धन्यभावम् ।। ३०.४८।।

'राजीवगान्धिविशसन'—नामनि सूक्तिजुषि सर्गरत्नेऽस्मिन् पद्यानां सप्ततिरघटत, यद्यप्यत्र बहलावकाश काव्यप्रतिभा।।

अग्रिम एकत्रिंशे सर्गे 'नरसिंहरावः' काङ्ग्रेसदलाध्यक्षतां प्रापितः। नवे निर्वाचने काङ्ग्रेसदलं बाहुमत्यं नालब्ध। इदानीं श्रीनरसिंहराव एव प्रधानमन्त्रित्वेन वृतः। श्रीमान् वेङ्कटरमण स्तदा राष्ट्रपतिः। नरसिंहराव—वेङ्कटरमणयोशश्लेष एष कविना सादृश्यविशेषयोगेनैवं स्पष्टीकृतः—

श्रीवेङ्कटेन संश्लिष्टो नरसिंहो व्यराजत ।
आश्लिष्टः पश्चिमाम्भोधिर्यथा प्राच्येन सिन्धुना ।। ३१.५५।।

भारतं राष्ट्रम् ऋणग्रहणशौण्डीर्यशालि। विश्वनाथोऽसकृदुदाजहार 'भग्ना वयमाधमर्ण्यसागरे नितान्तं गभीरोदरे, राजीवः पुनस्तत्रैव समृद्धतम इव दर्शितव्ययः। जनता नैक्षिष्ट विप्रतिषेधेऽस्मिन् गतिम्। समय एष विषसाम्राज्यस्य। तदुक्तमत्रैव—

पीनाः पयोधराः कुत्र सर्पिणीनां विषात्मनाम् ।
का श्रद्धा तत्र जीवातोर्लेशमात्रेऽपि देहिनाम् ।। ३१.८५।।

अन्यदपि—

बध्नीमः सेतुबन्धान् यान् कपिकच्छूकृषिस्तु तैः ।
सिच्येत यदि खर्जाणां कृते दूष्येत कः परः ।। ३१.८६।।

किञ्च—

स्वैरतामात्रसाम्राज्ये स्वतन्त्रीकृतचेतनः ।
स्रावः क्लेशस्य यस्तत्र नाद्यत्वे मोक्षधीर्न किम् ।। ३१.८९।।

अपि च

वाचाटा लैङ्गिकाश्चैव यत्र श्रद्धेयसत्तमाः ।
नटवाराङ्गना—गानवाद्य—यागेऽत्र केऽपरे ।। ३१.९०।।

सर्गोपसंहारे मालिनी—

इति मनसि कवीन्द्रा भावयन्तोऽपि दोषान्
न खलु वदितुमैच्छन् वीतरागायमाणाः ।
भिषजि भजति मौनं का सृतिः कामुकाना—
मपभयमवसातुं सौस्थ्यसौभाग्ययोगम् ।। ३१.९१।।

सर्गस्य संज्ञा 'नरसिंहसंभावन' इति।

अथ द्वात्रिंशे सर्गे—

नृसिंहरावं तमशोककक्षे श्रीवेङ्कटार्यः खलु हिन्दिवाचा ।
अग्राहयन्मन्त्रिपदस्य मन्त्रान् संसत्प्रधानत्वसमेधितस्य ।। ३२.१।।

हिन्दिवाचेति ध्येयमत्र पदम्, ग्रहीतृग्राहयित्रोरुभयोरप्यहिन्दीक्षेत्रीयत्वात्। इदमप्यत्र निध्येयं यत्–(३२.१५)

आसीत् स कश्चित् समयो यदानीं गृहीतवन्तः शपथं सदस्याः ।
प्रायेण षष्टिः सुरभाषयैव प्रीत्या प्रतीत्या च निसर्गसिद्ध्या ।।

कालेऽत्र शरत पवारो रक्षामन्त्री,
चवानः स्वराष्ट्रमन्त्री
शेषन् शङ्करः मुख्यो निर्वाचनाधिकारी
शेषस्य विषये कविरेष सविशेषं वक्ति।
३२.४१–५४ पद्यान्यत्र द्रष्टव्यानि।

भारतस्य भूगोलसीमाऽत्र प्रदीयते– (३२.५९–७०)

सह्यो महेन्द्रो मलयः सविन्ध्याः सदण्डकाश्चापि ससागराश्च ।
यमार्यदेशं परिपालयन्ते तस्मिन् प्रमाणन्ति न दिग्विभेदाः ।।

उच्यते च–

एकं नभो भूतलमेकमेकं दिशां वितानं क्षितिजान्वितानाम् ।
एकं वचः संस्कृतिचक्रमेकं यस्मिन्ननेकत्वमिहाभ्रपुष्पम् ।।

परन्तु–

उपप्लवं ये जनयन्ति तेषां भागीरथीवारिणि नक्रयूनाम् ।
यद् भेषजं तत् खलु कालनेमौ न दृष्टपूर्वं न मरुत्सुतेन ।।
यूकाश्च लिक्षाश्च सरक्तबीजाः समत्सराश्चापि सपल्लिकाश्च ।
वसन्ति देवायतनेष्वमीषामस्माकमेभ्यः क्व समाधिभेदः ।।
पञ्चाननानामपि पञ्चतायाः प्रसिद्धये स्मो न न सिद्धमन्त्राः ।
व्याघ्रस्य कृत्तौ हि हिमाद्रिजायाप्राणेश्वरः साधयते समाधिम् ।।
नारायणं पाशुपतं च किञ्चिद् ब्राह्मेण पाशेन युतं यदस्त्रम् ।
अस्माकमस्ति प्रतिभा तदीक्षाक्षमा न तूत्सेकविषं पिबामः ।।

एवमेव

सामैव दानाग्रजतां प्रयाति दानं च सामानुजतां क्षितौ नः ।
यौ भेददण्डौ चरमौ हि तौ नः स्वतन्त्रतायास्तु कृतेऽभ्युपायौ ।।
उपार्ज्य विश्वस्य समा विभूतीर्वितीर्य ता अर्थिषु दीक्षितेषु ।
मृत्पात्रशेषत्वविधानदीर्घसत्राध्वराचार्यवरा इमे स्मः ।।
आदानमात्रं परमं न येषां कृत्वाधिकं वर्षितुमात्तदीक्षाः ।
अस्माकमेषां दिवि संभ्रमन्तो बलाहका एव भवन्ति मित्रम् ।।
उत्सर्ग उत्सर्गत एव येषां गृहेषु दूर्वादलवत् प्ररूढः ।
तेषां निधानैः परिपूरितानि क्षेत्राणि गोत्राणि च जाग्रतीह ।।
लक्ष्मीश्चलेत्याश्रमिणां प्रवादो यथार्थतामक्षरशो दधाति ।
त्यागाय यागाय च दीक्षितानामातिथ्ययोगाय च लिप्स्यते श्रीः ।।
रत्नानि रत्नाकरवत् प्रसूते शास्त्राणि शस्त्राणि च धीर्यदीया ।
यादृच्छिकस्तेषु विभूतियोगो राष्ट्रे विभूतीः प्रविकल्पयेत।। ३२.७०।।

समाजवाद इति साम्यवाद इति ये परिभाषे इमेऽपि यमनियमरूपमनुशासनं विना न भवतश्चरितार्थे। यमनियमावेव तु भारतीयानां समेषामेव मार्गाः बौद्ध—जैन—वैदिकानां सदाचारिणाम्। उक्तमेवेदमत्र।

अन्ते च भर्त्सना—

यः कश्चिदारटति वाङ्मयकुल्यकासु
भेकीभवन् नवसमाजविधान—शब्दान् ।
रज्जुं निकृत्य कलशं च विभज्य सोऽपि
कौपीरपः परिपिपासति घर्मदग्धः ।। ३२.७९।।

अथ कृत्तपुच्छेभ्यः कविभ्यस्तर्जनाशब्दाः—

यो वै कविर्जनयते चलतां जनेषु
सोऽयं कविर्न, स हि कश्चन जालिकोऽस्ति ।
तस्य ग्रहेण परिपाशितचेतनानां
मोक्ता भवेद् यदि कदाचन मूलदेवः ।। ३२.८०।।

संविन्नटी स्फुरति यत्र शिलाऽपि तत्र
मूर्त्तिर्भवत्यनुपमाऽऽङ्गिक–भङ्गिमाऽङ्का ।
या वै श्रुतिर्व्रजति साऽपि कलां विशुद्धा–
मातोद्यसङ्गतिशुभा स्वरयोगविद्याम् ।। ३२.८१ ।।

आशंसापदानि–

स्वातन्त्र्ये नरसिंहसङ्गतिमिमे वीक्षामहे तृष्णया
सौराज्यस्य परात्परस्य वसुधामेतां स्वरातन्वतः ।
आकल्पं भरतावनिः परिचयान् कुर्वीत सर्वंसह–
प्राग्भारोदयसंविधास्वनुपमानस्य प्रसासत्तये ।। ३२.८२।।

सर्गपूर्त्तिश्च 'सौराज्यशंसन' इत्यस्य नाम ३२ सर्गस्थ। अथ द्वितीयस्य विक्रमस्य चरमो विक्रमः ३३–तमः सर्गः।

नरसिंहरावमहोदयाः पाञ्चवार्षिकं शासनसूत्रं पूरयितुं क्षमा असिध्यन्त। पश्चादसौ राष्ट्रपतिमयाचत निर्वाचनम् (३३.१)।

तस्मिॅश्च निर्वाचने काङ्ग्रेसपक्षे क्षपिते श्रीवाजपेयी नरसिंहरावपदमध्यरुक्षत्। झटित्येव च तस्य रेचितं पदं श्रीदेवगौडाः समारूढः। तं सीतारामकेसरी निकृत्तमूलं चक्रे येन श्रीमानिन्द्रकुमारो गुजरालः प्रधानमन्त्रिपदं व्यभूषयत। अचिरादेव च तस्य स्थाने भूयोऽपि श्रीमानटलविहारी बाजपेयी लब्धुमशकत् (३३.६)। एतस्मिन्नेव काले डॉ० शङ्करदयालशर्म्मणः स्थाने श्रीनारायणो राष्ट्रपतिर्जातः (३३.०५)।

श्रीवाजपेयी परमाणुपरीक्षणकार्ये साफल्यमवाप। परमाणु–परीक्षणस्य संपन्नतायां जातायामेव कॉश्चित् क्षणानतीत्यैव अमरीकादयः सिद्धिमिमामबुध्यन्त (३३.८)।

अमेरिका व्यरुद्ध न्यरुद्ध च भारताय दीयमानमनुदानम्। श्रीचन्द्रशेखरादयो भारतीया अपि तत्र विरुद्धवाचोऽश्रूयन्त (३३.१०)। साम्यवादिनोऽप्यत्र शक्तिसाम्यवादं विस्मृता विपथीना एवादृश्यन्त

(३३.११)। किन्तु सनातनेनाऽत्र 'परमाणुशक्तियुगायात्मनः प्रणामाः प्रकाशिताः। प्रकाशिता इमेऽत्रैव ३३.१३—३५पद्यात्मना।

एतस्मिन्नेव काले पाकस्तानेन कारगिलं ग्रसित्वा क्षोभितः श्रीबाजपेयी। तदानीमेव च संसदे त्रयोदशं निर्वाचनं प्रारभ्यत। तत्र जितकारगिलाभियोगी श्रीबाजपेयी सहयोगिभिर्दलैः सार्धं बाहुमत्यमवाप्य। स्वयं बाजपेयिना डॉ० कर्णसिंहो पराजिग्ये लखनऊतः (३३.४४)। सोनिया देवी द्वाभ्यां क्षेत्राभ्यां विजयिनी जाता, उत्तरेषु रायबरेलीतः चिकमग्लूरतश्च दाक्षिणास्येषु (३३.४५)। साम्प्रतं सोनिया संसदि प्रतिपक्षनेतृपदं भेजे (३३.४६)। सोनियया नरसिंहरावः काङ्ग्रेसतः प्रायेण बहिष्कृतः। तत्र कारणम् अयोध्यायां बाबरीमसजिदस्य ध्वंसः (३३.४७)। कवेरुद्गारा अत्र प्राणानिव स्पन्दयन्ते पाठकानाम्। श्री शेषन्नामा ज्योतिर्विद् भूतपूर्वः प्रमुखो निर्वाचनायोगाध्यक्षो राष्ट्रपतिपदाय दत्तनिर्वाचनप्रत्याशिप्रार्थनापत्रो वैफल्यं ददर्श।

बाजपेयिमहोदयैः केन्द्रीयस्य शासनस्य प्रधानमन्त्रित्वं साफल्येनोढम्। तस्य मन्त्रिमण्डले अड्वानी गृहमन्त्री, जोशी श्रीमुरलीमनोहरः शिक्षामन्त्री, विदेशमन्त्री बभूव श्रीजसवन्तसिंहः, जार्जफर्णाण्डिसो रक्षामन्त्री, पूर्वं नीतीशः पश्चाच्च ममताबैनर्जी रेलमन्त्री, मुख्यन्यायाधीशः श्रीमान् रङ्गनाथमिश्रः। अस्मिन्नेवावसरे सनातनस्य स्वातन्त्र्यसंभवाय (१—२८सर्गात्मकाय) श्रीवाणीन्यासः **श्रीवाण्यलङ्करणं** वाजिपेयिमहोदयानां निवास एव तेषामेव हस्ताद् दापितवान् (३३.९६—९७)। ९८पद्यैः सर्गः पूर्णः। नामास्यासीद् **'बाजपेयिप्राधान्य'** इति।

श्रीबाजपेयी प्रधानमन्त्रिपदस्य पाञ्चवार्षिकीं धुरमुवोढ साफल्येन। अथ निर्वाचनं जातम्। तत्राबहुमतस्तत्याज प्रधानमन्त्रिपदम्। मुखबिम्बेऽस्य तदानीमपि स्मितिलेखैव। राष्ट्रपतिः श्रीकलामो बाजपेयित्यागपत्रं स्वीकृत्या समार्थयत् (३४.३)। इयं हि राहुकषायितस्य सूर्यबिम्बस्य

तात्कालिकी अस्तङ्गमितता। भूयोऽभ्युदयस्तत्र निश्चितः। वाममार्गिणः प्राहृष्यन्। सोनिया साम्प्रतं भिन्नैरपि दलान्तरैर्दत्ततटस्थसमर्था नेतृत्वं प्राप्ता। तटस्थं समर्थनं नाम कवेर्मते अपाणिग्रहो विवाहः (३४.०६)। सेयं सकम्पस्थिरता। फलं त्विदं स्वतन्त्रताया वा दारिद्र्यपराजितचित्तताया वा–

सेयं सकम्पस्थिरता च काचित् स्थितिः फलं धिङ् निजतन्त्रतायाः ।
यद्वा दरिद्रत्वपराजितायाश्चितेर् जनस्याधिकृतिं गतायाः ।। ३४.७।।

अत्र कविर्दण्डपाणिरपि दृश्यते वामदलीयेषु सांसदिकेषु। तेषां भाषा 'शासकं दलं भाजपादलं सांप्रदायिकमि'–ति। तत्र कवेः पदार्थविज्ञानं कथमिति प्रश्ने 'दलेऽत्र भारतीयमि'–ति पदमस्तीति। तत्र प्रश्नः 'भवदीये दले 'भारतीयमि'ति नास्तीति किं भवन्तो 'न भारतीयाः, एवं च सति भग्ना भवतः सांसदत्वलतिका'पि। इति ३४.०९पद्यतः ३४.११ पद्यं यावत्। श्रीमतो बाजपेयिनःकार्याणामेकत्र समुल्लेखोऽत्र व्यधापि सुकविना ३४.१३–२०पद्यैः।

सोनियादेवी स्वहस्तमुपगतं प्रधानमन्त्रित्वं न स्वीचकार। तत्र यत् कारणं तद्धि विधिरेव विजानीत (३४.२३)।

तस्याः प्रधानमन्त्रित्वकल्पनया विचलिता राष्ट्रिया चेतना। सुषमादेव्या घोषितम् 'भूमौ स्वप्स्यामि मुण्डनं च कारयिष्यामि, तत्पत्या राज्यसभातस्त्यागपत्रं समर्पितम्, मध्यप्रदेशमुख्यमन्त्रिपदे विराजमानया उमाभारत्या मुख्यमन्त्रित्वात् त्यागपत्रदानं प्रातिजज्ञे। भाजपादलस्थैः गोविन्दाचार्यप्रभृतिभिरान्दोलनं प्रतिज्ञातम् (३४.३१)।

सोनियादेव्या स्वयमपि व्यचारि, अमानि च नोचितं तस्यै प्रधानमन्त्रित्वमिति (३४.६३)। डॉ०मनमोहनसिंहस्य नाम तु तया प्रधानमन्त्रित्वाय प्रास्तावि (३४.७५)।

अथ पञ्चत्रिंशः सर्गः। हिन्दूनामैक्यं नास्तीति भाजपापराजये कारणमिति केचित्। अत्र ३५.२९, ३५.३१–३३,३५,३८, ३९ पद्यानि

हृदयस्पृंशि। तत्र ३९तमं पद्यम्—

इयमद्यतनी निशास्ति कृष्णा
स—रवाप्यस्ति नितान्तनीरवेयम् ।
कवितापि विरौति झिल्लिकेव
न तु तां कोऽपि शृणोति दुन्दुभिघ्नः ।। ३५.३९।।

इदानीमेव समुद्रः प्रलयमातनिष्ट। ३५.५०—५४।। इदानीमेव—

पीठद्वयाचार्यो भगवान् शङ्कराचार्योऽयोध्यां प्रति प्रातिष्ठत तत्र राममन्दिरस्य शिलान्यासं कर्त्तुम्। स हि भगवान् काश्या नातिदूरे पथि मुलायमसिंहेन निगृहीतः। चुनारस्य दुर्गे स महात्मा प्रातः क्रियां चक्रे। दिष्ट्या न मोचितः प्राणेभ्यः (३५.६०)।

दाक्षिणात्त्येषु पुनः काञ्चिधामाचार्याः श्रीमन्तो जयेन्द्रसरस्वतीपादा निगृहीताश्च स्थापिताश्च पातकिनां मध्ये कारासु।। ३५.६१।। एभ्यो जमानतमपि दुर्लभमासीत्। यदा सर्वोच्चेन न्यायालयेन जमानतं दत्तं मोचिताश्च तदैषामुत्तराधिकारिणः श्रीविजयेन्द्रसरस्वतीपादा निगृहीताः (३५.६४)। अस्मिन्नेवावधौ पोपपालः प्राणान् जहौ। तस्यान्त्यायां गर्त्तप्रतिष्ठायाम् अमरीकाया राष्ट्रपतिर्बुशो भागमग्रहीत्, भागमग्रहीत् ब्रिटेनप्रधानोऽपि (३५.८०)।

अथ पञ्चत्रिंशतः सर्गस्यान्तिमं पद्यम्—

क्षणेऽत्र विषमे मुहुर्मुहुरुपास्यते श्रीशिवः
स एव गरलं पिबत्यथ सुधां प्रवर्षत्यलम् ।
निधाय गरलं गले सहित एष संसक्तया
हिमाचलतनूजया नटति मङ्गलं ताण्डवम् ।। ३५.९७।।

अथ षट्त्रिंशः सर्गः। दिल्लीपार्श्वे जघन्यतमं निठारि—काण्डम्, यत्र मनुष्यबालिकानां प्रलोभनेनाऽऽकर्षणं, गतसंज्ञानां गुह्याङ्गनिषेवणं, मृतानां च हृद्ग्रन्थि—भक्षणम्, तासाव शिष्टानामस्थ्यादीनां यत्र कुत्रापि

निखननं प्रक्षेपणं वा। महदेवैकं भवनं कृत्यस्यास्य केन्द्रम्। पतिश्च भवनस्यास्य महानर्थपतिः।

अस्मिन्नेव सर्गे ईराकराष्ट्रपतेः सद्दामस्य बलात् पाशेन वधः। अन्येऽप्येवंविधा नृशंसा मनुष्याचारा अत्राघटन्त। ९२पद्यात्मा सर्ग एष–'नरपशुता'–संज्ञकः।

अथ सप्तत्रिंशः सर्गः।

जगद्गुरुर्हरिहरकृपालुर्भक्तिमात्रं भगवद्रसलिप्सायां पूर्त्तिसाधनं भवतीति प्रमाणयति(३७.१)।

सोऽयं नवतिवर्षीयो जर्जरत्वगपि महात्मा तैस्तैः कौलीनैरधरीक्रियते, किन्तु नापचीयतेऽस्य यशः (३८.२–१२)।

लालूप्रसादयादव एकोऽपरो नेता यो विहारान् स्ववशे कृतवान् कारागृहे सप्तविंशति' मासानतीत्य बहिरागतः स भूयोऽपि विहारेषु मुख्यमन्त्री, पश्चाच्च रेलमन्त्री जातः।

चुर्हटक्षेत्रे लाटरीद्यूतापराधी अर्जुनसिंहः पङ्गूभवन्नपि केन्द्रे प्रभावातिशयं बिभ्राणो मनमोहनसिंहराज्येऽलब्धसिंहासन एव लोकलीला–मपूरयत् (३८.१८)। एवंविधास्ति स्थितिर्भारतानाम्। पाकस्तानेऽपि जनान्दोलनं प्रचलति, तत्र नार्योऽपि नारा–पद–वाच्यान् हुङ्कारानुच्चैः कुर्वते (३८.२२)। तत्र विद्यार्थिनोऽपि धृतदुर्धर्षास्त्राः (३८.२३)।

एतस्मिन्नेव समये ईराकस्य प्रधानपुरुषो भूतले प्राच्छदत्। तथापि स गृहीत एवामेरिकासैनिकैः (३८.२४)।

नेपालराज्येऽपीयमेवोपद्रवस्थितिः।

कविनाऽनेन ग्रहस्थितिं विचार्य घोषितमासीत् शेखावत–पाटिलयोः पाटिलाया एव संभाव्यते राष्ट्रपतित्वमिति (३८.४४)।

काशीराजा डॉ० विभूतिनारायणसिंहा दिवं गताः (३८.७७)। तानेवानुससार पं०विद्यानिवासोऽपि (३८.७८), तमेवानुससार

पं० सीतारामचतुर्वेदी (३८.७९), एवमेव डॉ० भोलाशङ्करव्यासोऽपि (३८.८३–८९)।१०३ पद्यात्मकोऽयं सर्गः **'विषभक्षणं'** नाम्ना युक्तमेवोक्तः।

एकोनचत्वारिंशे सर्गे द्वासप्ततिः श्लोकाः। तत्र पाकस्तान–दुर्दशायाश्चित्रम्। संयमहीना विनश्यन्त्ये वेत्येकमेव वक्तव्यमत्र सर्गे।

चत्वारिंशत्तमे च सर्गे एकत्र राष्टपतिनिर्वाचना चलति, अपरत्र च श्रीमान् चन्द्रशेखरसिंहः परलोकातिथिर्जातः। अत्र पञ्चसप्ततिः पद्यानि बलियाक्षेत्रस्य गौरवं च विषयः।

एकचत्वारिंशत्तमे सर्गे सप्ततिः पद्यानि। अनियन्त्रितिश्च चारित्रे वस्तु।

द्विचत्वारिंशे सर्गे अमृतसरस्यां भिण्डरवालोपद्रवः। तस्य बलाच्छान्तिः। विपर्ययोऽत्र विषयः। हरिणी छन्दः सप्तसप्ततिश्च पद्यानि। सुभाषितप्रायाण्येव सर्वाणि।

त्रिचत्वारिंशे सर्गे काशीहिन्दूविश्वविद्यालये डॉ०पञ्जाबसिंहः कुलपतिः। तस्य समये महती समृद्धिः, विनष्टिश्च योग्यगता (७० पद्यानि)।

चतुश्चत्वारिंशे सर्गे प्रतिभादेव्या राष्ट्रपतित्वेन स्थापना। अस्य सर्गस्यान्तिमां हरिणी पश्यन्तु–

व्रजतु पृथिवि! त्वं वै पातालकुक्षिमिदंयुगे
न खलु मनुजः संप्रत्यास्ते शुचिव्रतभास्वरः ।
शिरसि न युगं तस्य प्रादुर्भवत्यधुना नवं
निशितशिखरं शृङ्गोच्छ्रायस्य, किन्तु न सोऽपशुः ।। ४४.८१ ।।

'अशुचिते'–त्यस्य संज्ञा।

पञ्चचत्वारिंशे सर्गे वसन्त तिलकेन रचितैः ७५ पद्यैः 'कटुविपरिणाम'-नाम्ना परिणते ४७ तमं जुगुप्सातिशीतिजनकं बन्धं धयन्तु–

भीष्मो बभूव जितमृत्युरथापि मृत्युं
वव्रेतमां प्रकटमेव शरे शयालुः ।

शय्या शरेषु गतमृत्युभयत्वशक्ति–
योगश्च सोच्छ्वसनमृत्युमुखैकवासः ।। ४५.४७।।

अन्तिमां मालिनीमपि निर्वर्णयन्तु–

इह विषमविपाके साधयन्तो विकल्पान्
यदि दधति विरामं निःसमाधानदीनाः ।
प्रकृतिरिति वदन्तो वा गुणाँस्त्रील्लभन्ते
कथमपि परितोषं चेतसा तापवन्तः ।। ४५.७६ ।।

षट्चत्वारिंशे ७०पद्यात्मके सर्गे विविधैश्छन्दोभिर्मध्यप्रदेश–भूमिर्वर्ण्यतेऽन्तिमेन च मालिनीवृत्तेनोच्यते–

अतिविषममुपैति नः समीपं
युगमधुना द्रुतिमास्थितो गरुत्मान् ।
स हि भुजगकुलं स्वचञ्चुघातैः
क्षपयति चैव गिलत्यथो क्षणेन ।। ४६.७० ।।

मतिपरिष्कारोऽस्य संज्ञा।

सप्तचत्वारिंशे ७०पद्यात्मके सर्गे माखनलालचतुर्वेदी नाम्नो हिन्दी–कवि तु श्चित्राणि 'अतीतस्मृति'–रिति नाम्ना। वृत्तमत्र वैतालीयप्रायम्।

अष्टचत्वारिंशे ७०पद्यात्मके सर्गे पाकस्तानदुर्गतिः। 'दुर्योधनास्थिवह्निज्वाले'–तितुलाक्षणिकी संज्ञा। मार्मिकातिमार्मिक–कमिदं रसयन्तु सन्तः।

एकोनपञ्चाशे ७२पद्यात्मके सर्गेऽत्राभीद्धतपः प्रभाव–नाम्नि भगवान् श्रीकृष्ण उपालभ्यते–

रासं तनोतु भगवान् व्रजगोपिकाभि–
स्तेनैव कंसहननं भवितेति मत्वा ।
नो चेद् विहाय मथुरां व्रजवल्लरीः स्वं
चक्रं सुदर्शनमिदंक्षण आददातु ।। ४९.१ ।।

वंशीरवेण विनिमोहितचित्तकोषा
मत्ता इवोच्छ्वसितनीवि–नितम्बवस्त्राः ।
कृष्णाभिसाररसिका व्रजगोपिकाः स्युः
संसारचक्ररथनेमिभुवं प्रपन्नाः ।। ४९.२ ।।
कृष्णः सुदर्शनमपास्य विहाय किञ्च
कौमोदिकीमपि गदां, यदि शब्दशब्दैः ।
पद्मेन वा मधुकरप्रियतापरेण
धुन्वीत कंसकटकं ननु तच्च युक्तम् ।। ४९.३ ।।

सङ्गीतरसनिमग्ने जगति वम आपतति चेत् किं वा भविष्यति

ता ताकधिन् धिनक संकुलितं नभश्चेद्
शस्त्रैः पराणुविहितैः परिपूरितं स्यात् ।
किंवा भविष्यति तदा मनुजस्य किञ्च
विश्वम्भरावलयगस्य चराचरस्य ।। ४९.४ ।।

वेदानामभ्यासः शुद्धमुच्चारणं च चण्डालैर्न संभवतीति साम्यवादशासने वज्रप्रहारः— **चण्डालकुक्षिजनितश्च परम्परातः**
शुद्धान्वयश्च मुखजो यदि साम्ययुक्तौ ।
वेदः पुनः किमु गमिष्यति सिन्धुतोयं
कोलः प्रभुःपुनरिमं न समुद्दिधीर्षेत् ।। ४९.५ ।।

पञ्चाशत्तमे सर्गे ६९वैतालीयवृत्तप्राये ''शृङ्गारप्रकाश'— ग्रन्थस्य दुर्दशा समुद्धारश्च वर्ण्येते। अन्तिमाभ्यां च पृथ्वीभ्यां भगवती 'सुमतिशारदा' प्रार्थ्यते —

अथेन्दुविशदीकृताननरुचिर्हिमाद्रेः सुता
ललाटतटविस्फुटद्युतिनि बीतिहोत्रार्चिषि ।
स्मितं हविरुपादधात्यतिरसं तदेकं क्षमं
शमाय तपनस्य वै शिशिरशान्तये चोष्मणे ।। ५०.७० ।।

सनातनकवीरितां जनकथामिमां शृण्वतां
ककुप्पतिपरिप्रियां ननु सचेतसां चेतसाम् ।
स्फुरेन्मणिमयीं रुचं विकिरती प्रभाभास्वरा
परात्परतया स्थिता सुमतिशारदा सारदा ।। ५०.७१ ।।

एकपञ्चाशत्तमे सर्गे ७२पद्यैः विडम्बनाख्या प्रवृत्तिवैषमी दृढं निरूपिता अन्तिमेन च पद्येन धर्म एव रक्षकत्वेन घोषितः—

अलमधिकनियोगोच्चारणैः शासनं न
प्रभवति नरि बुद्धिं क्षालितुं तत्र शक्तम् ।
भवति ननु समर्था धर्म—जाताऽनुशास्तिः
स्वहृदि कृतनिवासा सर्वशः प्राणभाजाम् ।। ५१.७२ ।।

द्विपञ्चाशत्तमे सर्गे मानुष्यकस्य दौर्बली चित्रिता। तथाहि—

किंवाऽस्ति सन्ततमिदं हृदयं समेषा—
मेषां विशृङ्खलितसूर्पणखाभिरुच्चैः ।
मिथ्यात्वमात्रपरमार्थसमीरणासु
संप्रत्ययाहितचिति त्वमुपेयुषीभिः ।। ५२.१७।।
सीताऽस्ति सूर्पणखया प्रतिपादिता प्राक्
दुष्टैर्गुणैर्बत समन्वितदेहयष्टिः ।
रामायणे तदनु सैव निरूपिताऽसौ
सौन्दर्यसौभगशतातिशयस्य राशिः ।। ५२.१८।।

उत्कोचादीनां फलं लक्ष्मजातं भवनयानादिकम्। अद्यापि तत् तथैवास्ते प्रतिपत्तिमद् यथा पूर्वमासीत्—

यद् विद्युतां पतिरिहास्ति कनिष्ठकोऽपि
तस्यास्य चुम्बति गृहं गगनाङ्गणं वै ।
यः शास्त्ररक्षणविधानगृहीतदीक्षा—
दाक्षिण्यवर्त्मविधृतः स कुटीचरो हि ।। ५२.५२।।

अन्ते प्रोच्यते—

इति विगलितचेतोग्रन्थिरार्योत्तमोऽस्मिन्
विहरति रसयोगादाश्रमेष्वेक एव ।
अपि नगरनिवासाॅस्तीव्रमुच्चैर्धयन्तो
न खलु दधति तोषं चित्तकोषेऽपि धन्याः ।। ५२.७१ ।।

अस्य सर्गस्य शीर्षकं भवति 'यमपरिग्रह' इति पुष्पिकायाम्।

त्रिपञ्चाशत्तमे सर्गे काश्यां भूम्ना साद्रियमाणस्य कश्मीर—शैवदर्शनस्य कृते कतिपये प्रश्नाः ७१ पद्यैः —

बाला भवन्तु यदिवा वनिता, भवन्तु
शूद्राधमा यदि भवन्तु च विप्रमुख्याः ।
सर्वे शिवाः खलु शिवत्वविहीनमत्र
नास्त्येव कश्चिदपि जागतिके प्रपञ्चे ।। ५३.२।।

अपि च— **देवः शिवः स हि सदैव विकासयुक्तः**
शश्वत् प्रकाशमय एव चकास्ति, तस्मात् ।
विश्वम्भरावधि समे प्रसवा विमर्श—
कुक्षेः स्वतो सृतिमुपेत्य चकासतीह ।। ५३.३।।

अवमेव—

शक्त्युच्चयस्तमिह संवृणुते विकार—
मुक्तं परात्परमथ प्रविभासनाम् ।
ईशं विभुत्वकलितं शिवमेष शश्व—
च्चान्द्रीं कलां रसमयीं हि बिभर्त्ति शुद्धाम् ।। ५३.६।।
कामो यदि प्रसभमुन्मथितः शिवेन
तद्वै स्वमेव ननु तेन वपुर्ममन्थे ।
कामो बहिर्न हि कदाप्यवतिष्ठते स्म
योऽन्तश्चरोऽस्ति स तु हन्त शिवः स्वयं हि ।। ५३.१२।।

अत्रैव सर्गे काशीहिन्दूविश्वविद्यालयस्य संस्थापकस्य पं० मदनमोहनमालवीयस्य वर्णनम्। सर्गनामास्ति मालवीयाचार' इति

कालेऽस्मिॅंस्तापसानामपि परममहद्ध्यानयोगश्रितानां
रागोत्तीर्णान्तराणामपि निखिलदिशो व्यावृतिं प्रापितानाम् ।
उत्तिष्ठासां समाजो व्यधृत हृदि परान् प्रापयामासुरेतेऽ–
प्याशीर्वादान् स्वकीयान् धनमिदमिह वै श्रेष्ठमस्यां धरित्र्याम्॥ ५३.७१ ॥

चतुष्पञ्चाशत्तमे सर्गे श्लोका। तत्रानुष्टुन्वृत्तैर्लालबहादुरशास्त्रिणां प्रधानमन्त्रितायां या दृढता मिष्टता च तयोर्द्वयोर्मृशुमनुध्यानम्। पाकस्तानिनां द्विपादानां तुवानरकल्पता चित्रिता–

यत्र कुत्रापि सुप्तानां यत्र कुत्रापि जाग्रताम् ।
वानराणामिवामीषां द्विपादानां तु को निजः ॥ ५४.३८॥

अथ च–

भुजयोर्जङ्घयोर्यद्वद् बलं येषां कृपाणिनाम् ।
अर्ववद् धावतामेषां को देशः कश्च ना निजः ॥ ५४.४१ ॥

किञ्च–

एकस्मिॅंस्तु मृते यत्र तिस्रः स्युर्विधवाः स्त्रियः ।
को वा समाजस्तेषां वै तत्क्षणार्थभुजां नृणाम् ॥ ५४.४३॥

अत्र नियतेर्निन्दा–

नियतिः कुक्कुरीपुच्छं सदैककुटिलं मतम् ।
सरला यदि सा तत्र कुक्कुरत्वं वृकायते ॥ ५४.५४॥

नियतेरद्संतं वर्णनं–

अहो नियतिकालयोर्निभृतनिर्वृतिं प्राप्तयोः
समागममहोत्सवे भजति पौष्करित्वं विधिः ।
भजन्ति च सुरेचकैर्महितमङ्गभङ्गैर्युतं
विधेः प्रथमवल्लभा नृतिगतानां शतीम् ॥ ५४.५७॥

वृषस्यति महेन्द्रकः श्रितपुलोमजापाणिक—
स्तदा नटपटीवृतः क्वचन गन्तुमुत्कायते ।
समाश्रयति चोर्वशीं स च सनारदस्तुम्बुरू
रसाष्टकसमाश्रितं ह्यभिनयं विधातुं त्वरी ।। ५४.६० ।।
विधेरपि वयो भवत्यथ मनुष्ययोनिक्षणः
प्रयात्यपरकल्पकोऽप्यतितरां त्वराढ्यैः क्षणैः ।
कविप्रतिभयाऽञ्चिता इह हि कालिदासाः शतं
शतं दधति सुस्वरा स्तवशतीं सुवैतालिकाः ।। ५४.६२ ।।
इमाश्च ननु मेनकाप्रभृतयः सुराणां प्रिया
नटन्ति ननु वत्सलं रसमुदित्वरस्वेदकाः ।
इमे च निखिला महातपसि बद्धनद्धोद्यमा
सकण्वसहगौतमा मुनिवराश्च सामाजिकाः ।। ५४.६६ ।।
भवतु न घटस्फोटः कुत्रापि हन्त जनुर्जुषि
क्षणपरिमितेऽप्येतद्द्वन्द्वेऽप्यनेहसि कुत्रचित् ।
सुभगतुतरां विश्वं विश्वस्य जन्मभृतः कृते
कलिरुपजनिं नाप्नोत्यल्पीयसीमपि गेहिनोः ।। ५४.७० ।।

'सौभाग्यशंसन'—नाम्नः सर्गस्यास्य संज्ञा।

पञ्चपञ्चाशे सर्गे ७२मन्दाक्रान्ताः सौन्दर्यं च विषयः। पद्यमेकं दृश्यताम्—

मुक्तिं भुक्तौ परिणमयते, निष्क्रियं, यच्च दष्टं
यच्च स्फीतं स्मरविषधरेणोग्रसंतापकेन ।
तच्चाञ्चल्यं भजति, भवति स्मर्यमाणानभीष्टान्
स्प्रष्टुं कामी बत बत यतस्तद्धि सौन्दर्यमेकम् ।। ५५.३ ।।
तद्वै सत्यं भवति, न मृषा यद्यपि प्रत्यपादि
प्रत्यग् दर्शैरपि ननु तथैवेदमव्याहतत्वात् ।
मिथ्याभूतोऽप्यतनु मनसा स्पृश्यमानोऽपि चेतो
यद्वै प्रत्याहरति कुहचित् तत्र सौन्दर्यमास्ते ।। ५५.६ ।।

अथ दृश्यताम्—

नतिस्तस्मै सर्वंसहविभव—सर्वस्वगुणिने
गुणानामेतेषां विनयनिभृतानां रसमयी ।
पदान्यर्थेभ्यः किं दधति नमनं नार्थकलना
पदानां पादेभ्यो यदि नमति काव्याकलनया ।। ५५.७० ।।

प्रणमनकलया परीतचित्ताः
कवय इमे निखिलाः स्वविश्वसृष्टौ ।
प्रसृमरगतयो विभान्ति धन्या
धयत समे प्रभवस्तदस्य काव्यम् ।। ५५.७१ ।।

किञ्च— **अयि सहृदयताढ्या वीतरागा महान्तो**
भवत निहितचित्ता अत्र कोषे महार्हे ।
इह रणनमिदानीं श्रूयते शारदाया
नटनगृहगताया नूपुराणामपूर्वम् ।। ५५.७२ ।।

प्रणतिरहस्यमितिसर्गस्यास्य संज्ञा।

षट्पञ्चाशत्तमे सर्गे विश्वस्य स्वस्त्ययनम्। हिंसा पूर्वं धिक्क्रियते—

मत्स्यान् यथा सुरभिसंहननानि कर्त्तं
कर्त्तं नितान्तनिघृणत्वमुपेयिवांसः ।
कं वा पुमर्थमुपलभ्य शमं लभेर—
न्नित्येतदस्ति विदितं न सनातनेभ्यः ।। ५६.१६ ।।

वाल्मीकि कारुण्यमिदं भिन्नाऽप्येषा दिगवालोच्यते—

क्रौञ्चे हते मृगयुना यदि कश्चिदार्त्तो
रामायणं ग्रथितवान् कविरादिमश्चेत् ।
हंसे हते तु किमु तेन बतारचिष्यदा—
र्त्तेन दाशरथये कविताविधात्रा ।। ५६.३९ ।।

अथ प्रवृत्तिभेदः—

स्वत्वं विनाश्य सुगता विरुवन्ति, तीव्रे
वेगे चरन्ति च शमं परमैः पदार्थैः ।
सर्वैर्निजैः परिवृतश्च सहिष्णुताढ्यो
धर्मं सनातनमभीक्ष्णमुपाददाति ।। ५६.४५ ।।
रासं करोति मुरलीधर ईप्सिताभि—
र्गोपीभिरिष्टतमतां गमितोऽपलज्जम् ।
किं राम इत्यभिधयाऽन्वित एष रासं
नैवातनोत् सुतनुकाभिरवाप्य लङ्काम् ।। ५६.४६ ।।

अन्ते च काम्यते—

विश्वम्भरे! त्वमसि सर्वशरीरभानां
धात्री विधात्री च कुरुष्व रक्षाम् ।
कुटीचराणां नगरौकसां च
प्रशस्तपद्माश्रयिणां समेषाम् ।। ५६.८३ ।।
सर्वोऽपि दुर्गाणि तरेत् समोऽपि
भद्राणि भद्राणि सदा हि पश्येत् ।
उषःक्षणत्वं वृणुयुश्च सन्ध्या—
क्षणाः समे स्वस्त्ययनेन सिद्धाः ।। ५६.८४ ।।

सप्तपञ्चाशत्तमे ७५पद्यात्मके सर्गरत्नेऽत्र स्वरूपदर्शनं विषयः। अत्र स्वरूपाणि क्लिण्टलीदानामिव भारतीयानामपि। तत्र प्रथमा वसन्ततिलका—

स्वातन्त्र्यमस्ति यदि चेच्चिति नो न चिन्ता
कस्यापि किञ्चिदपि भाषितुमुत्सुकस्य ।
यत् तन्त्रणं तदिह कामधुगस्ति लोके
स्वस्मादुदित्वरपदक्रमणस्य शश्वत् ।। ५७.१ ।।

विपदपि तत्रैव वर्षति—

यन्नो नियन्त्रणगुणे भजति प्रियत्वं
तस्य स्वयंवरसभां गमितस्य कण्ठे ।
वध्वाः स्रगापतति, हन्त तदीयशीर्षे
मृत्योर्लुलायखुर एव किरन् विभाति ।। ५७.२।।

लोकसभाया हीनां दशां निरूपयति कविः—

संसत्सभासु नहि किञ्चिदवाच्यमेव
वाक्यं समस्ति तु समस्य सुसांसदस्य ।
एतां स्वहस्तविधृतां रशनां विसृज्य
केचित् विशृङ्खलगुणाः प्रभवो रटन्ति ।। ५७.४।।

कविरत्रापि काव्यमिदमुपसमजिहीर्षत्। तथा च पद्यम्—

नत्वा तां निजहृदयस्थितां पराम्बां
स्वातन्त्र्यं विषयतया विभाव्य गीताम् ।
गीतां मे समुपहृतां स्वकाव्यरूपे
संहर्त्तुं कथमपि यत्नवान् भवामि ।। ५७.७१ ।।

अष्टपञ्चाशत्तमे ७२पद्यात्मके 'मृत्युजृम्भोद'—नामनि सर्गे गुजरातराज्यस्य मुख्यमन्त्री नरेन्द्रमोदी वर्णितः। महत्त्वपूर्ण एष सर्गः काव्यदृशा। अन्तिमं पद्यम्—

रे रे सिन्धुतटस्थिताः शृणुत वै सर्वे भवन्तः क्षणे—
नैकेनैव विशेयुरत्र विवरे मृत्योर्मुखे जाग्रति ।
यां रज्जुं समुपाश्रिता वयमिमे तत्सूत्रजातं क्रमाद्
विश्लेषेण कषायितं बत बताद्यत्वे समालोक्यते ।। ५८.७२।।

एकोनषष्टितमे सर्गे ७०श्लोकाः। अत्र बेनजीरभुट्टोनाम्न्याः पाकिस्तानप्रधानायाः शरीरनाशो वृत्तान्तः। प्रथमं पद्यम्—

पाकिस्ताने वेनजीराऽद्य जाता कालग्रासः पञ्च संप्राप्य गोलीः ।
ग्रीवारन्ध्रे भग्नभुग्ना स्वकारान् नीता वैद्यांस्तत्र नो रक्षिता तु।। ५९.१ ।।

सा गौराङ्गी गौरवस्त्रा च मूर्ध्नि धृत्वा नीलं हन्त किञ्चिन्निचोलम् ।
प्राप्ता कारं स्वं वदातं च सार्धं विस्फोटश्च प्रोच्चकैरुद्बभूव ।।५९.३ ।।
विश्वं स्तब्धं विद्यतेऽद्यातिमात्रं दौर्जन्येनामूर्च्छि तेनाविकल्प्यम् ।
सार्धं त्रिंशत्संख्यकैर्मृत्युमाप्तैः पाकस्तानस्यावनिर्दूषिताऽभूत् ।। ५९.२ ।।
यदुद्गतं तद्वपुषः प्रणाल्या प्रवाहितं नु क्षतजं जपाभम् ।
तन्नीलवर्णे तु निचोलरत्ने व्यभासता वीरवधूटिकेव ।। ५९.५ ।।

अत्र सत्या उद्‌गाराः–(५९.६–१९)

अद्य क्षणे ये विरुवन्ति तस्यै नेतार उच्चैः पदवीं श्रितास्ते ।
अमित्रचित्तामपि तां लपन्ति मित्रं महद् भारतवार्षिकाणाम् ।।
प्रियं न मिथ्यात्वकषायितं चेद् विवर्जितं वक्तुमिलातलेस्मिन् ।
या वेनजीराऽनुपमैव साऽऽसीच्छत्रुत्वयोगे प्रतिवेशिनां नः ।।
सा वै यदाऽभून्निजराष्ट्रपृष्ठे प्रधानमन्त्री निखिलान् ययाचे ।
पार्श्वस्थितान् मुस्लिमराष्ट्रनेतॄन् साहाय्यमर्थस्य विजेतुमस्मान् ।।
ददौ न कश्चिन्मरुभूमिराष्ट्राधिपस्तदीये प्रणये वधानम् ।
सा भग्नदन्तेव तु सर्पजांया व्याहिण्डताऽस्थैर्यनदीं श्रयाणा ।।
दन्ता अजायन्त पुनर्यदा सा निर्वाचनं जेतुमियेष शीघ्रम् ।
प्रद्वेषवह्निः खलु तद्धृदिस्थस्तदैव तां वै निजिगाल नान्यत् ।।
पिता मृतः पाशितकन्धरः सन् घाताभियोगे नियते विधानात् ।
पुत्री मृता भीषणनाडिकाया विस्फोटनाद् गोलकपञ्चकैश्च ।।
यः साम्प्रतं राष्ट्रपतिश्च पाकस्ताने चकास्ते तु मुशर्रफाख्यः ।
स एव कस्माच्छ्वसितीति लोकश्चित्तेन धत्ते ननु विस्मयं स्वम् ।।

अद्य प्रसारणपरा निखिलाश्च यन्त्र–
राजाः भवन्ति बत केवलवेनजीराः ।
नो दूरदर्शनमथो न हि रेडियोऽपि
नो वृत्तपत्रमपि तामतिवृत्य लभ्यम् ।। ५९.१३ ।।

विश्वेन सैनिकमयेन च शस्त्रपूर्णे–
नैवाद्य हन्त भवितव्यमिलातलेऽस्मिन् ।
नान्या सृतिर्भवति काचन मानवात्म–
दुर्दानवादवितुमस्ति मनुष्य! तुभ्यम् ।। ५९.१४।।
अन्तःपुराणि यदि वा निखिलस्य जन्तो–
र्भूयासुरस्त्रभरितानि सशिक्षणानि ।
शय्यासु शस्त्ररचितासु च कामनामा
वामक्रियासु निपुणः सफलत्वमृच्छेत् ।। ५९.१५।।
प्रत्येकमेव नु रजःकणमग्निगर्भं
वीक्षामहे निखिल एव महीतलेऽद्य ।
दक्षः करः प्रहरति प्रसभं स्वमेव
वामं करं धृतकरालकृपाणवृन्तः ।। ५९.१६।।
किं वा हलाहलमिलावलयेऽतितीव्र–
वेगं प्रवृष्टमधुना निभृतं कुतश्चित् ।
हा हन्त हन्त निखिला अपि मानवाः किं
दैत्यत्वमाप्य बत ताण्डवितुं प्रवृत्ताः ।। ५९.१७।।
कौक्षेयकेण परुषे बत पाणिदण्डे
नाशः फलत्यतितरां मनुजान्वयस्य ।
वैवस्वताननगताजिरगा इमे वै
मुग्धाः स्वकौशलमुदित्वरयन्ति शत्रौ ।। ५९.१८।।
भैक्ष्येण सञ्चितबला मनुजा नटन्ति
धिग् विस्मृता नियतिमात्मन एव कृच्छ्राम् ।
एतेषु बालधिमृते पशुषु क्रियेत
किं वा शमाय बत दुर्विधदुर्विधेषु ।। ५९.१९।।

अत्र वंशवाद उपस्थितः। तस्य गर्हणम्—

पाकेऽपि नास्ति गणशासनमस्ति
तत्राप्यत्रेव कश्चन पुरातन एव मार्गः ।
यस्मिन्नपत्यमुपयाति पितुः स्वतो हि
सर्वाधिकारमिदमेव तु राजतन्त्रम् ।। ५९.२२।।
भुट्टो यदाऽभवदिलातलगर्भलीना
तद्राजनीतिदलनेतृधुरं तदीयः ।
पुत्रो हि वक्ष्यति विलिख्य तयेदमेव
संस्थापितं बत समीहितपत्रमेकम् ।। ५९.२३।।
भर्ता चतुर्षु नृपनीतिविनायकेषु
जर्दारिसंज्ञक उदित्वर एक आसीत् ।
तद् वेनजीरकुलमेव मुशर्रफस्य
स्थानाय सक्षममिति प्रमितिस्तदीया ।। ५९.२४।।
अत्रापि नेहरुकुलाङ्कुरकत्रिकेण
शास्तृत्वमापि ननु साम्प्रतिकेऽपि राज्ये ।
तद्वंश्य एव बत राहुलगान्धिनामा
राजीवगान्धितनयोऽस्ति समुद्धुराङ्गः ।। ५९.२५।।

अत्र वंशवादे कवेराघातः — (५९.३२)

साम्यं वैषम्यबीजं वपति भरतभूमण्डले साम्प्रतं यद्
यद् वै निर्लज्जमुच्चैः—पदचय उररीचर्करीत्येष दुष्टम् ।
बीजं तत् स्वैरतायाः भवति बत यदा स्वैरतामात्रराज्यं
मात्स्यन्यायः प्रवृत्तिं भजति बत तदा विश्वनाथोऽत्र साक्षी ।।

मनुष्यरूपा काचित् काष्ठपुत्तलिका नृत्यति नर्त्तकेच्छया—

कालोऽस्य कोऽपि परिणाम ऋतुत्वदिग्ध—
स्तस्याऽस्य कापि परुषा ललिता च भुक्तिः ।

सुप्तिस्ततश्च परिबोध इति क्रमेण
श्वासावसानमुपयन्ति समेऽपि मर्त्याः ।। ५९.३६ ।।

सर्गेऽसमाप्तिं ये श्लोकास्तेषु निवसति काचिद् बलवती उक्तिदेवी। अन्तिमं पद्यद्वयमत्रावश्यमास्वाद्यत्वम्—

साहित्यं कविपाठकद्वयगता या हार्दिकी संविदा
तत्राप्यस्ति सनातनस्य कविताचार्यस्य दृग् वञ्जुला ।
तामुद्वास्य नटन्ति ये बुधवरास्तेषाममीषां भवे
प्रातः पत्रशते प्रकाशनमिदं नो कल्पते धीमते ।। ५९.६९ ।।
गौरीशङ्करशैलराजशिरसि स्थित्वा वयं ब्रूमहे
शृण्वन्त्वब्धिजलावधि प्रसृमराः कृत्स्ना अमी प्राणिनः ।
खर्जोत्तेजनया कृतं सुरसया तुल्यैव सा स्वाननं
द्वैगुण्येन युतं करोति; न ततो निर्वेदमापद्यते ।। ५९.७० ।।

सर्गस्य नाम 'चक्षुरुन्मीलन' इति।

षष्टितमे सर्गे नयपाल(नेपाल)—वृत्तान्तः। तत्र वीरेन्द्रविक्रम—शाहस्य राज्याभिषेके प्रेषिताः श्लोकाः वि.सं. २०३१। पश्चात् तत्पुत्रेण जितेन्द्रेणैव तन्मुख—धारिभिर—यैर्वा तेषां सामूहिको वधः। ८३पद्यात्मके करुणकरुणे सर्गेस्मिन् ७८—८३पद्यान्**युद्बोधना**ति।

या गङ्गा हिमशैलतो धृतवती धारां समुद्रोदरा—
पूर्त्तिं कुर्त्तुमुदित्वरां प्रदधतीं मोक्षं मनुष्येष्वपि ।
तां वै वारितवारिकां कृतवतो मर्त्त्यस्य कुक्षिः कदा
पूर्णो हन्त भविष्यतीति कलयेत् कश् चित्रगुप्तं विना ।। ६०.८० ।।
हे श्रीकृष्ण! यदा पुनश्च धरणीं संप्राप्य वृन्दावनं
गन्ता स्थास्यसि साश्रुरेव भगवान् भूत्वापि सर्वङ्कषः ।
लुप्ता संप्रति तत्र कापि यमुना; वंशीवटो नैकतां
प्राप्तः श्रीहरिदासधाम्नि कपयो राजन्ति रात्रिन्दिवम् ।। ६०.८१ ।।

पुरीं कोणार्कं वा यदि गतवतां भुक्तिलतिका
सरीसर्तुं बाध्या भवति ननु तत् तर्कविशदम् ।
अहो प्रस्थानं ये दधति ननु भक्तेरिह समे
वराकास्ते मूर्ध्नाऽवनितलगतेन प्रणमिताः ।। ६०.८२ ।।
मनोऽनड्वांसं वै विदधतु बलादेव वृषणौ
वृथाकृत्वाऽनङ्गव्रतविरहितं केचन बुधाः ।
अथोऽसौ सर्वं वः कृषिविधिविधानं क्षमतया
करिष्यन्निष्टं वः सफलयति भोक्ताऽपि च बुसम् ।। ६०.८३ ।।

एकषष्टितमे सर्गे

ईराकराष्ट्रपतेः सद्दामहुसैनस्य प्राणदण्डो विषयः, ७१श्लोकाः।
अन्तिमं पद्यं पुनरेवम्—

यमा न नियमान् विना शृणु भवन्ति धर्मोत्तमः
सनातन इति श्रुतो मनुजभूतधात्री—प्रभुः ।
श्रयस्व ननु शीघ्रतां तदवलम्बने मानुष!
त्वमेव भविता जगत्त्रयमहाप्रभुर्निर्भयः ।। ६१.७१ ।।

सर्गस्य नाम 'परिपोषमार्ग' इति।

द्वाषष्टितमे ७७पद्यात्मके सर्गे पुनरपि पाकवृत्तान्तः। तत्र पद्यानि ७७ तेषु—

कृतघ्नतामेव गुणं ब्रुवन्तः कृतज्ञतां चावगुणं य एते ।
तेषां क एवास्ति निजः क एव परः स्वयं ते हि परात्परन्ति ।। ६२.२९ ।।

हे भूतधात्रि! वसुधे! भवती वराहे—
णाद्येन वारिधितलादुदधारि मिथ्या ।
त्वामाश्रयन्ति कृकलासकुलानि वर्णां—
स्ताँस्ताननुक्षणमिमान् परिवर्त्तयन्ति ।। ६२.३० ।।
त्वं विष्णुपत्नीति मृषैव, विष्णु—
र्लक्ष्मीपतिस्त्वामथ सैव लक्ष्मीः ।

विहाय सत्यं त्विदमाश्रयाय
बम्भ्रम्यमाणा प्रचकास्त्यधन्या ।। ६२.३१ ।।
रे पाक! किं पाकति किं भवान् नः
सुहृद् भवन्नैष सुनीतिमार्गः ।
रे भारताः पाकति पाकदेशे
विपाकमुच्चैः कटुमाप्नुवन्तु ।। ६२.३४।।
केचिद् भवन्ति निपुणाः परिशोषणाय
केचिद् भवन्ति च पणे लिखितेऽपि मूकाः ।
ते स्वं गृहं धनचयैः परिपूरयन्ति
यो ग्रन्थकृत् तमिह लुञ्चितुमात्तधाष्टर्याः ।। ६२.४१ ।।

अन्तिमं पद्यम्—

भूयासुर्जलजन्तवो नु पृथिवीजाताः सवृक्षाः समे
वीतासुत्वगतास्तथैव च नभोमार्ग—स्थिताः जन्तवः ।
एतेषां मतिरीदृशी हि, वदत क्वामी भवन्तस्तदा
भूयासुर्भवदीयकश्च भविता क्वासुव्रजो ब्रूथ धिक् ।। ६२.७७।।

सर्गनाम 'महाविभीषाधिक्कार' इति।

त्रिषष्टितमे सर्गे ९५पद्यानि। वृत्तं पाकस्तानस्य।

मुशर्रफः पाकभुवः प्रधानात् पदात् परिच्यावित ईक्ष्यते स्म ।
उपत्यकातो महतस्तु शृङ्गाद् शैलस्य कस्यापि यथा महाद्रुः।। ६३.१ ।।
औपम्यतीर्णा—पतिराप तस्य पदं स जर्दारिवरो रफस्य ।
रेजे यथा भैरवकुक्कुरस्य पृष्ठे स्थितः काकवरो विभाति ।। ६३.२।।
एकादशाब्दानवसत् स कारागृहेऽपराद्धो विषमेषु सिद्धः ।
अद्यासकौ लालुवदत्र देशे लेभेतमां पीठमतद्द्वितीयम् ।। ६३.३ ।।
भयं भयाद् रेचितमेव नित्यं विभीषिकात्वं भजतेऽद्वितीयम् ।
या वै विभीषा ननु कालिका सा तस्याः कुतो हन्त भयं विभाव्यम्।।६३.४।।

यो वै समर्थो नहि सोऽसमर्थो न्यायालयेऽपीति विडम्बनैव ।
सा ह्येव देशेऽत्र चकास्ति, सैव पाकेऽपि नूनं नय एव पङ्गुः॥ ६३.५॥
नयो हि धर्मः स हि गौः शिवो यं समाश्रितो गत्वर आविभाति ।
नो चेत् स निष्पन्दशुचिश्ममानद्रुमायतां स्थाणुतया प्रशुष्कः ॥६३.६॥
नयोऽस्ति पङ्गुर्यदि कोऽपि देशो विपत्समुद्रेण निगीर्ण एव ।
न तस्य रक्षार्थमुपाददाति सन्नाहमुच्चैरपि सूकरेशः ॥ ६३.७॥
न मातृभूमिं न च तस्य मृत्स्नामन्नं जलं वा प्रति ये कृतज्ञाः ।
तेषां कथं सार्थकमस्ति जन्म नराधमानामधुनातनानाम् ॥६३.३२॥
यस्मिन् कपिर्यापयते तरौ स्वां निशं प्रभाते कथमत्र लब्धे ।
फले द्वितीयं परिहृत्य भोक्तुं प्रवर्त्तते भोक्तुमिह प्रवृत्तम् ॥ ६३.३४॥
ये सूकरा ये च महागजेन्द्रास्तयोर्द्वयोरस्ति भिदा करेण ।
कायेन मानाधिकतां गतेन कथं तयोर्नैव समोऽधिकारः ॥ ६३.३५॥
आरक्षणं स्यादथवा वराहजातेः कृते यत्र न साधिकाराः ।
स्तम्बेरमाः स्युः सह शूकरीभिर्विवाहिताः स्युश्च गजेन्द्रजात्याः॥ ६३.३६॥
एषा यदीया प्रतिपत्तिरेषां लोकायतानां जननेतृकाणाम् ।
साम्राज्ययोगे धरणि! त्वदीया तनुः क्व वै स्थातुमलं भवित्री॥६३.३७॥
नाम्नो विरुद्धा अपि केचिदस्यां भवन्ति भूमाविति संविदानाः ।
वयं जरीदार—इति प्रसिद्धे राष्ट्राधिपे पाकगतेऽपि भक्ताः ॥६३.६३॥
मनुष्यमेधा कृपणायते चेद् विस्मृत्य पारम्परिकं विधानम् ।
तस्याश्चिकित्सां सहते विधातुं विभूतियोगः परमेश्वरस्य ॥ ६३.९४॥
सनातनो वाञ्छति काङ्क्षितं नुः प्रसिध्यतु क्लेशलवं विनापि ।
नृत्वं तु रक्ष्यं प्रथमं यदेकं सर्वाधिकं प्रीतमुमेश्वरस्य ॥६३.९५॥

'मनुष्यमतिसंशोधन' इति सर्गस्य संज्ञा।

चतुष्षष्टितमे ८५पद्यात्मकेऽत्र सर्गे राजनीतिदलानां छलस्य परिणामा उपस्थापिता:। इदानीं पाकस्ताने तालिवानानामुपद्रवा:। भारतेषु पुनर्नवीनं निर्वाचनं भवति। मेनकासुतो वरुण इदानीं कटु भाषणं कृतवान्। सत्येऽपि तत्र शासनं तं विरुरुधे (६४.४१)। संप्रति राजनाथसिंहो रामस्यायोध्यामस्मरत्। अत्र निर्वाचनस्य प्रक्रियावस्त्रं बहुच्छिद्रमन्वभूयत (६४.५९)। उच्यते– (६४.६०)

अपि मार्जनकारकृत्यहेतोर्नियता काचन योग्यतास्ति राष्ट्रे ।
न हि सांसदिकस्य किन्तु कृत्ये नियत: कश्चन साक्षरत्वयोग: ।।

अपि वामकरस्य योङ्गुलीश:
प्रतिलेखोस्य कृती समे विधाने ।
विहिता: किमिमे प्रशिक्षणानां
निलयास्तर्हि पदाधिका: पृथिव्याम् ।। ६४.६१ ।।

कृपणा: श्वपचा महामहार्ह–पदवीका परितो लसन्ति राष्ट्रे ।
न तु कश्चन तेषु वित्तवर्षारहितां कृत्यधुरं स्पृशेद् दृशापि ।। ६४.६२ ।।

क्रियतां तप उत्तमं जनेन कतमेनाद्य सुखेन निश्वसत्सु ।
तपसे सुखमेव गर्हणीयप्रवरत्वं वृणुते–भियोगि–सार्थे ।। ६४.६३ ।।

युगस्यालोचना द्रष्टव्याऽत्र–

प्रतिगृहमटत्येक: काङ्ग्रेसराजदलप्रिय:
शपति च वरान् स्मारं स्मारं पुराणनरोत्तमान् ।
न च दशरथापत्यं स्मर्तुं क्षम:, स हि भारतान्
कुशलतितरां काङ्ग्रेसीभूय शासितुमद्य धिक् ।। ६४.७९ ।।
इह हि समये नो वै शक्तो नरो भुवि शासने
न च हरिरपि प्रत्यक् कुर्वन् हिरण्यकशायिकान् ।

नरहरितया ख्यातिं लब्ध्वा तु चेद् भवितुं क्षमो
यदि, हरिनरो भूत्वा यद्वापि सङ्घटितान्तरः ।। ६४.८० ।।

खेला साम्प्रतमतीव प्रिया—

ये खेले जयिनो भवन्ति बहवो राष्ट्राधिपा मूर्धनि
त्वेषां वर्षितुमञ्जसा निरवधीन् हेम्नां चयान् सस्पृहाः ।
ये गीतेष्वथ वाद्यवादनकलास्वाश्चर्यचर्याः समा—
नेतांश्चापि परार्ध्यराशिभिरिदंकाले प्रवर्षन्तकि ।। ६४.८३ ।।

साहित्ये शासनमिदमेव मीलितनेत्रम्—

साहित्यं यदि काननेषु विचरेन्नास्ति व्यथायै तु तच्
छास्तॄणामधितस्थुषां प्रमहतो—धीकारमार्गोत्तमान् ।
संगीतं पुरतो निधाय कवयो ये शारदां दूनय—
न्त्वेषां शासकता स्थिता, यदि परे कुर्युः कृपां मूर्धनि ।। ६४.८४ ।।

सम्प्रति विरोधे शारदायि न क्षमते—

धिक्कर्तुं कटु शारदापि विषमे कालेऽत्र नैव क्षमा,
तेभ्यस्ते हि परात्पराः विदधते काराः स्वकाः साहितीः ।
अद्यत्वे यदि कौरवा हि बलिनः, स्वैरं सुखं शेरतां
ते, तेषां कुटिलान् क्रमान् कलयते नो नो स गीताकविः ।।६४.८५ ।।

सर्गस्य संज्ञा 'विषमताभिषङ्ग इति।

पञ्चषष्टितमे ९३पद्यात्मकेऽत्र सर्गे २६ शार्दूलविक्रीडितानि अमरीकाराष्ट्रस्य वर्णनम्। सौराज्यमत्र मूर्त्तिमदालोच्यते। भारतीयस्य निर्वाचनस्य फलानि प्रसार्यन्ते।

षट्षष्टितमे सर्गे पुनः ८७पद्यानि। तत्र निम्नलिखितं निध्येयम्—

अद्यत्वे खलु कश्चनापि न जनो विप्रः, पिशाचोत्तमाः
सर्वेपि क्व नु पातु शापवचनं सिद्धिं कृशामप्यहो ।

पैशाचीं हि गिरं ब्रुवत्सु कलना स्यात् कीदृशी याज्ञिक–
व्रातेष्वेषु गिरं जपत्सु भगवद्वाक्यत्वमासेदुषीम् ।। ६६.८३।।

सर्गस्य नाम 'झञ्झादुर्दिनः'।

सप्तषष्टितमे ८६श्लोकात्मके सर्गे

यो भाजपायी हृदि मुस्लिमानान् संमानभाजो मनुते स मान्यः ।
धिक् पाजभेयीति पदस्य वाच्यो विपर्ययैकाश्रितदृक्पथीनः।। ६७.८२।।

पद्यमिदं सविशेषं निध्येयं भवति।।

अष्टषष्टितमे ७५श्लोकात्मके सर्गे डॉ० मनमोहनसिंहः प्रध ाानमन्त्री जातः (६८.५–५०) –

श्रीमान् मनोमोहनसिंहदेवः प्रधानमन्त्रीति वृतः पुनश्च ।
मुलायमं लालुमथ न्यषेधीत् साह्याय दत्तप्रणयाशिळ्ौ सः ।। ६८.१२।।

तालिवानानामुपद्रवो भूयोऽप्युत्थितः। अत्र पद्यम्

हाहाकारं विधते मनुजवसुमती तालिवानाभियोगान्
दृष्ट्वा लाहौरभूमावथ च पुरि पुरि व्यश्नुवानान् प्रतीच्याम् ।
पाकस्तानस्य टैङ्कैरनल–वममुखैरुद्गिरद्भिर् विनाशान्
ध्वस्तस्वस्वाश्रयास्ते परगृहमभितः सञ्चरन्तो विभान्ति ।।६८.६०।।

पुनश्च–

एतैराणवशक्तिरप्यधिगतेत्यासीद् गतेद्युः समा–
चारो दूरदृशा प्रसारित इदंदेशेपि कर्णेशयः ।
सत्यश्चेदसकौ सृते! भव झटित्येवाद्य सज्जाऽचिरा–
न्मोक्षस्ते भविता समापि कलना ध्वंसं वरं लम्भिता।।६८.६३।।

चतुरनुच्छेदेऽत्र सर्गे

येऽम्रीकीया धनबलमदाध्मात–शौवापदीन–
क्षुद्दिग्भ्रान्ता इह नरमहीभोगसर्वंसहास्तान् ।
वञ्चित्वा ये मुहुरभिनवै राशिभिर्डालराणा–
माढ्यंभूष्णव उच्चकैरलममीषां प्रत्ययैः पाकिनाम् ।। ६८.७२।।

इत्येवंममरीकाणां नीतौ संशयाना विद्यामहे। 'नियतिताण्डव' इत्येतस्य संज्ञा।

एकोनसप्ततितमे सर्गे १—६३पद्येषु पृथ्वी, शेषेषु च १४पद्येषु हरिणीप्रभृतीनि छन्दांसि। नियतिविपर्ययोऽत्र सर्गनाम। अन्तिमं पद्यं ध्येयम्—

स खलु न वरो मार्गो यत्रास्ति बुद्धिरपेक्षिता
यदपि ललितं सर्वं तन्मात्रमस्तु तु साधितम् ।
इति खलु यदा काचित् प्रज्ञावतां मतिरद्य किं
श्वसितु विदुषां कश्चिन्मार्गः पुरातन उज्ज्वलः ।। ६९.७७।।

सप्ततितमे सर्गे श्लोकाः ७२। अत्रैवासीत् सर्गबन्धस्यास्याभीष्य पूर्त्तिः। तत एवाऽत्र श्लोकः—

कृष्णेनार्जुनवत्सलेन यदिदं युद्धे महाभारते
रूपं किञ्चन दर्शितं भवतु वै तच्चापि संतोषितम् ।
यत् किञ्चिन्निरवद्यमत्र यदपि स्वस्थं परं सुन्दरं
यत्, तस्यार्चनमेव कापि कविता सानातनी मङ्गला।।७०.७२।।

'विश्वस्वस्तिवच' इत्यस्य सर्गस्य संज्ञा।

एकसप्ततितमे सर्गे ७५पद्यानि। तत्र 'शत्रुप्रेमा' इति नाम। अत्र भाजपादलस्य पराजयः। अत्र श्लोकाः—

यो ब्राह्मणः स खलु शूद्रति यश्च शूद्रः
स ब्राह्मणं नयनरेणुकणं विभाव्य ।
न्यक्कार—गर्त्त—परिपातन—कर्म—भावं
वाढं निनीषति शृणोति न तस्य वादम् ।। ७१.७३।।
ये वै कुलाधिपतयः कुलपाश्च मूर्ध्नि
न्यस्तं करं विविधमन्त्रिण आत्मनस्ते ।
निर्भीति योग्यजनमाशु विलङ्घ्य हेतोः
कस्मादपि प्रियजनं च निवेशयन्ते ।। ७१.७४।।

द्वासप्ततिमे सर्गे ७८श्लोकाः। अत्रायोध्याण्ममन्दिरस्य वादे निर्णयः। स चामान्यः। रामजन्मभूमिवादनिर्णयोऽस्य नाम। अत्रेदं पद्यमवश्यमेव निध्येयम्—

स्वातन्त्र्यमस्ति सकलार्थविधानदक्षं,
तत् तत्स्वरूपमपि वर्त्तत एव नित्यम् ।
यश्चेदमर्थपरमत्वहठस्तदीयाः
पान्थास्तु मीलितदृशश्च पलायिताश्च ।। ७२.७० ।।

त्रिसप्ततितमे सर्गे ८३पद्यानि। अन्नाहजारेमहोदयस्य योगिनः श्रीरामदेवस्यान्दोलनम्। तत्र रामदेवः पलायितः। अन्नाहजारे पुनः शासनं विफलयाञ्चकार। तस्य प्रस्तावः विचारणीयेषु विषयेषु संसदा निवेशिता इति तस्यार्थस्यार्धं साफल्यं घोषयित्वा १२ दिनानि विहितमनशनं त्यक्तवान्। चतुःसप्ततितमे च सर्गे च ७०पद्यानि। अत्र पद्यम्—

अस्मिन् संक्रमणामये भगवतः कालस्य सांवर्तिके
पर्यायेऽस्ति विपर्ययस्य विशदंकारायमाणः क्षणः ।
सामुद्री विपदेकतोऽपरदिशि व्योम्नो ग्रहाणां ग्रहै—
र्भूमौ वारिविनाशपूरविषमीभावश्च धिग् धिक् क्षयः ।। ७४.६८ ।।

पञ्चसप्ततितमे सर्गे श्लोकाः १४७। एषु अन्नाहजारेनाम्नः महाराष्ट्राभिजनस्यानशनस्य परिचयः—(७५.७५—७८)

अन्ना ब्रवीति क्वचनापि नाहं भवामि निर्वाचनलाभलिप्सुः ।
राष्ट्रस्य सौस्थ्याय समृद्धये च श्रितव्रतोऽहं तु जनेषु वर्त्ते ।।
आवश्यकं मेऽस्ति दिनावसाने रोटीद्वयं तु द्विदलेन युक्तम् ।
निवासहेतोश्च मम प्रकोष्ठमेकं हि पर्याप्तमितोऽधिकं नो ।।
नास्ते तु किञ्चिद् व्यसनं मदीयं धूमं धयाम्येष कदापि नैव ।
पीतं न चायं, न तमालपत्रं स्पृष्टं मया गोपयसाऽस्मि पुष्टः ।।

न मच्छरीरेऽस्ति तु रक्तचापबाधा न वै काचन माधुमेही ।
चित्तेन चाप्यस्मि सदैव रागद्वेषापरागामृतसेकसिक्तः ।।७५.७८।।
आकाशाख्यं वितानं दधति मम समे भूमिलोके निवासः
सोऽयं सर्वोऽपि लोको भवति मम बृहत् सद्म तस्मिन् वसामि ।
नास्ते चिन्ता च काचिन्मयि सुतदयिताद्यस्य पाल्यस्य, वित्तं
षट्साहस्रीमितं मे प्रतिनियतमथो वेतनं मासपूर्तौ ।।७५.८१।।
स्वीकुर्वन्तुतरामिदं, यदि न तत् कुर्वन्तु रिक्तं पदं
घोषं त्वेतममी स्मरन्ति यदि चेत् सुस्थान्तराः सांसदाः ।
भ्रष्टाचारविरोधिनां स्वर इह ध्यानं प्रदद्युर्न चेत्
कुर्वीरन्नपरं हि षोडशममी निर्वाचनं सांसदाः ।।७५.९८।।

अन्ते शान्तिपाठः –

शान्तिः स्याद् दिवि, शन्तिरस्तु मरुतां, मार्गेऽस्तु शान्तिर्भुवि,
स्याच्छान्तिः सलिलेषु, दिक्षु च भवेच्छान्तिर्नितान्तं स्थिरा ।
शान्तिः कर्मसु, शश्वदस्तु, करणग्रामेषु शान्तिर् भवेच्–
छान्तिः स्यादमरेषु, शान्तिरसुरेष्वास्ता च शान्तिर्नृषु।। ७५.१३९।।
शान्तिर्धेनुषु, शान्तिरूधसि, पयोधारासु शान्तिर्, घटे
शान्तिः, पाणिषु शान्तिराननचये शान्तिः सवैश्वानरे ।
शान्तिर्भुक्तिषु, शान्तिरोजसि, दृशोः शान्तिः, श्रवःशष्कुलौ
शान्तिर्वाचि नु, शान्तिरात्मसदने शान्तिर्धरित्रीतले ।। ७५.१४०।।
शान्तिर्भूतचये, कलापरिकरे शान्तिः सविज्ञानके,
शान्तिः शक्तिषु, शान्तिरर्थनिचये, शान्तिः क्रियाकौशले ।
शान्तिर्नौषु च नाविकेषु च पयोराशौ च शान्तिर्, दिशां
व्राते वायुषु गत्वर–स्थिर–नरेष्वास्तां च शान्तिर्मतौ ।। ७५.१४१।।

अन्तिमस्तु श्लोको ध्येयः—

षट्साहस्रीतिहासोऽयं महाकाव्यतयोद्गतः ।
सनातनस्य मे भूयादामोदाय सचेतसाम् ।। ७५.१४७।।

सर्गस्यास्य नाम 'जनान्दोलन' इति।

०००००

मुक्तकाव्यसंवेदनाकविः सनातनो रेवाप्रसादद्विवेदी

– मिश्रोऽभिराजराजेन्द्रः

यथा कश्चिदशरीरी आत्मा कस्मिंश्चित् शवे प्रविश्य, वेतालीभूय तास्ता आत्मसंवेदनाः स्फुटमभिव्यनक्ति तथैव सन्ति केचन कवयो ये प्रबन्ध-काव्यपात्राणां माध्यमेनैवाऽत्मानमभिव्यञ्जन्ति। परन्त्वन्ये सन्ति ते कवयः ये स्वयमेव साक्षाद्रीत्या स्वमुक्तकपद्यगीतादिमाध्यमेन स्वानुभूतिचयं स्फटतरमभिव्यञ्जन्ति। यथा तावद् भर्तृहरिः स्वमुक्तकैरेव जीवनस्य तिक्तमिष्टानुभवं नतोन्नतप्रवाहं प्रकाशयते। वस्तुतस्तेषां तत्काव्यमेव भवति तदुद्घोषणम्। ते च ऊर्ध्वबाहुर्विरौम्येष इति व्यासाभिमतशैल्या किञ्चिद्विरुवन्ति। तद्विरावं कश्चिच्छृणोतु न वा। तथापि ते विरुवन्ति। यतो हि विरवणमेव कविधर्मः। स्वयुगोत्थापनं, स्वयुगप्रबोधनं, स्वयुगप्रेरणमेव कविधर्मः।

साम्प्रतिकेषु संस्कृतकविष्वपि सन्ति केचन समाजप्रबोधयितारः सरस्वतीपुत्रा येषामग्रेसरः परिलक्ष्यते सनातनो रेवाप्रसादः काश्यपोपाह्वो द्विवेदिकुलभूषणम्। भोपालोपकण्ठस्थे सीहोरनाम्नि जनपदे नादनेराख्येऽग्रहारे लब्धजन्मा, काश्यां समवाप्तोच्चशिक्षः विपश्चिदुत्तमो रेवाप्रसादः सम्प्रति सारस्वतप्रतिष्ठाया धुरि राजते। भाषात्रय (संस्कृतहिन्द्याङ्ग्लीति) पाण्डित्येन लेखनेन च स्वेन प्रणीतपुष्कलग्रन्थकदम्बकः निर्भयमुखरवक्ता, असत्यासहिष्णुः प्रतिवादिभयङ्करः विनतेषु वत्सल उद्धतेषु विकराल आचार्यप्रवरस्सनातनोऽनन्वयेनैवाऽलङ्क्रियते। समवाप्त- महामहोपा-ध्यायादिपदवीको राष्ट्रपतिसम्मानितश्चाऽयं विद्वान् युगनिर्मातैव प्रतीयते।

विपुलोऽस्ति रेवाप्रसादस्य रचनासंसारः। सीताचरितम्, स्वातन्त्र्य-सम्भवम् कुमारविजयञ्चेति महाकाव्यत्रयम्। शतपत्रप्रमथश्रीरेवाभद्र-पीठ-संस्कृतहीरक-शरभङ्ग-मतान्तर-शरशय्याअवदान-लतिका-अमरीकावैभव-शकटार-रामपरिसंख्या-हरिहरावदानादीनि खण्डकाव्यानि। यूथिका सप्तर्षिकांग्रेसमिति च नाट्यकृतिद्वयम्। काव्यालङ्कारकारिका नाट्यानुशासनम् (1. नाट्यानुशासनम् 2. भरतदर्शनम् 3. नाट्यशारीरकम् 4. कलासमाधिः 5. रसभोगः) साहित्यशारीरकञ्चेति शास्त्रग्रन्थाः। सम्पादितानां समीक्षितिनाञ्च ग्रन्थानां भूयसी संख्या। वस्तुतः यथा जगत्स्रष्टेति विरञ्चिपर्यायस्तथैव ग्रन्थस्रष्टेति रेवाप्रसादपर्यायः।

यायावरीयो राजशेखरः कवेस्त्रिविधत्वं प्रतिपादयति- काव्यकविः शास्त्रकविर्नाट्यकविश्चेति। काव्यकविर्यथा कालिदासः। शास्त्रकविर्भट्टिः। नाट्यकविर्यथा भवभूतिः। क्वचिदुभयोः सङ्गमोऽप्यवलोक्यते। यथा कविकुलगुरुः कालिदासः काव्यकविः नाट्यकविश्चापि। स्वयमपि यायावरीयः शास्त्रकविरपि नाट्यकविरपि। पण्डितराजो जगन्नाथोऽपि शास्त्रकविरपि काव्यकविरपि। परन्तु क्वचित् त्रयाणामपि सम्पृक्तिरवलोक्यते। यथा साहित्यदर्पणकारो विश्वनाथः शास्त्रकविरपि (साहित्यदर्पणकर्तृत्वात्) नाट्यकविरपि (चन्द्रकला-कर्तृत्वात्) काव्यकविरपि (नैषधानन्दमहाकाव्यकर्तृत्वात्)

सनातनो रेवाप्रसादोऽपि विश्वनाथाऽनुग एव। एकतस्त्वसौ काव्यालङ्कारकारिकां नाट्यानुशासनं साहित्यशारीरकञ्च प्रणयत्यपरतो यूथिकानाम्नीं नाटिकां सप्तर्षिकांग्रेसाभिधञ्च नाटकम्। अपरतश्चाप्यसौ त्रयाणां महाकाव्यानां चतुर्दशमितानाञ्च खण्डकाव्यानां यशस्वी रचनाकारः। एवं हि कवित्वस्य सर्वेऽपि प्रकारा विशेषा वा तन्माध्यमेन प्रत्युज्जीवन्तो दृश्यन्ते।

महीयते व्यौत्पत्तिकं कवित्वं रेवाप्रसादस्येति ममास्था। किञ्चिद्व्याख्यासापेक्षमिदं मन्तव्यम्। जानन्त्येव सहृदया यत् प्रतिभा, व्युत्पत्तिरभ्यासश्चेति त्रयोऽपि मिलित्वैव काव्यहेतुर्न तु हेतव इत्याचार्यमम्मटः। कोऽपि प्रतिभाबलेनैव कवित्वशिखरमारोहति, कोऽपि व्युत्पत्ति–बलेन, कोऽपि पुनरभ्यासबलेन। परन्त्वेषां त्रयाणां कवीनामप्युभयी स्थितिः। प्रथमस्थितौ एक एव कोऽपि हेतुः कवित्वकारणं भवति। स एव प्रभवति अन्यौ द्वौ प्रसुप्तौ भवतः। द्वितीयस्थितौ यद्यपि विलसन्ति सर्वेऽपि हेतवः परन्तु कोऽप्येक एवाऽन्यौ द्वावतिशयानो भृशं चकास्ति, कवित्वहेतुश्च प्रसह्य प्रतीयते।

यदाऽहं कथयामि यद् व्यौत्पत्तिकमेव कवित्वं सनातनस्य महीयते तदाऽयमेवाऽशयो ग्राह्यो यद् बलवद् विद्यमानेषु सत्स्वपि त्रिषु कवित्वहेतुषु व्युत्पत्तिरेव तस्याऽन्यौ द्वौ खिलीकुर्वाणा चमत्कारसृष्टिं कुरुते। सैव तत्कवित्वरसायनभूता प्रतीयते। परन्तु नेदं कथमप्यवगन्तव्यं यन्नासौ प्रतिभाधनिकः कविः। वस्तुतस्तत्प्रतिभाऽपेक्षया तद्व्युत्पत्तिरेव समधिकप्रभविष्णुः प्रतीयते। भवतु, दृष्टिरियमभिराजस्य, न तावदन्येषां समेषाम्। व्युत्पत्तिकवी रेवाप्रसाद इति ममास्था।

व्युत्पत्त्यभावे प्रतिभाऽप्यकिञ्चित्करी प्रतीयते। पङ्गुर्जायते। स्ववैभवं प्रकटयितुमक्षमा जायते। अतएव द्वितीयाऽनुक्रमत्वादेव व्युत्पर्त्तिर्न खलु प्रतिभातो हीनगुणाऽवमन्तव्या। सामदानदण्डभेदानां किं कस्याप्यन्यतमस्य नैयून्यं कल्पितुं शक्यतेऽनुक्रमदृष्ट्या, न कदापि। यतो हि सर्वेऽप्यात्मपरिवृत्यसहत्वं बिभ्रति। प्रथमस्थाने गणितत्वादपि साम तत्कर्तुं न क्षमते यद् दण्डेन भेदेन वा साध्यं स्यात्। अतएव व्युत्पत्तेर्महत्त्वं न कथमपि प्रतिभातो न्यूनम्। कियन्त एव प्रतिभापटिष्ठाः कवयितुमुत्कण्ठिता जायन्ते। परन्तु हा हन्त! व्युत्पत्त्यभावे तेषां मनोरथोऽपार्थक एव जायते।

वस्तुतः काव्यप्रतिभाऽपि द्वेधा भवति केवला प्रतिभा, व्यौत्पत्तिकी प्रतिभा च। द्वितीया तावद् बलवत्तरेति मे मतिः। आचार्यप्रवरो दण्ड्यपि वागनुग्रहे श्रुतं (व्युत्पत्तिं) यत्नं (अभ्यासं) चैव कारणभूतं मन्यते, न तावत्प्रतिभाम्। सिंहीदुग्धपानं प्रायेण स एव शावकस्समधिकं कुरुते यो भवति श्रमशीलोऽभ्यस्तश्च। श्रुतं नाम विविधशास्त्राध्ययनोपलब्धं पाण्डित्यम्। यत्नो नामाऽभ्यासः। ताभ्यामेव वागुपासनं सम्भाव्यते–

श्रुतेन यत्नेन च वागुपासिता

ध्रुवं करोत्येव कमप्यनुग्रहम्।

केवला प्रतिभैव कमपि महाकविं न विदधातीत्यपि निश्चितम्। खनिजं हीरकमिव प्रतिभाऽपि काऽपि दिव्योपलब्धिः। परन्तु यथाऽशाणोल्लीढं हीरकं स्वदीप्तिं न बिभर्ति सर्वथा तथैव व्युत्पत्तिं विना प्रतिभाऽप्यदीप्तिमत्येव तिष्ठति। प्रतिभायामपि विशेषो व्युत्पत्त्यैव सञ्जायते। तद्यथाऽऽनन्दवर्धनः,

सरस्वती स्वादु तदर्थवस्तु निस्यन्दमाना महतां कवीनाम्।

अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।।

प्रतिभायाः विशेषस्य, परिस्फुरणस्य वा कोऽभिप्रायः? व्युत्पत्तिजः प्रभाव एव।

सैव व्युत्पत्तिसंवलिता प्रतिभा सनातनकवितायां हेतुभूता संलक्ष्यते। भवतु, अवसरेऽस्मिन् मयाऽपरमपि किञ्चिदसंस्तुतं (नूतनं वा) तथ्यं प्रस्तूयते यत्सनातनो मुक्तककाव्य- संवेदनाकविर्वर्तते। किमभिप्रायकमिदं तथ्यम्? किमसौ प्रबन्धकाव्यसंवेदनाकविर्न वर्तते? उताहो प्रबन्धकाव्ये भवत्येव नो मुक्तककाव्योपलभ्या संवेदना?

तदुच्यते सविस्तरम्। वस्तुतः प्रबन्धकाव्यं (महाकाव्यं खण्डकाव्यं वा) निसर्गत एव भवति विशिष्टलक्षणोपेतम्। तत्पात्राणां भूमिका चरितं वाऽपि भवत्येव कथानुरोधानुकूलम्। कोऽपि कविः पुराणपात्रस्य कस्यापि संवेदनामन्यथा सम्भावयितुमक्षमः। सर्वात्मना वाञ्छन्नपि कोऽपि कविः स्वकाव्ये रावणं रामभगवत्त्वसमर्थकं सीताहरणपश्चात्तापग्रस्तं वैदेहीप्रत्यर्पणकातरं वा दर्शयितुमक्षमः। यतो हि परवशोऽसौ प्रबन्धकाव्ये।

परन्तु स्वोपज्ञे प्रत्यग्रकाव्येऽसौ स्वसंवेदनां मूर्तां विधातुं सर्वथा स्वतन्त्रः। तस्मादेव मयोच्यते यत्सनातनो रेवाप्रसादो वर्तते एव मुक्तकाव्यसंवेदनाकविः। राष्ट्रविषयिणी समाज- विषयिणी व्यक्तिविषयिणी निसर्गविषयिणी विश्वविषयिणी वा तस्य संवेदना यथा विशदीभवन्ति तत्स्वतन्त्रमुक्तककाव्यैर्गीतैः पद्यबन्धैर्वा न तथा तदुपज्ञमहाकाव्यसन्दर्भैः। अनेनैतदुक्तं भवति यत् तदुपज्ञं मुक्तककाव्यमेव तत्कवित्ववैभव-साधकं, न तावत् महाकाव्यम्। कामं महाकाव्यैस्तस्य महाकवित्वं सिद्ध्येत्, तदज्ञानगाम्भीर्यं, तदखण्डपाण्डित्यं, तदबहुश्रुतत्वञ्च भास्वराणि स्युः, परन्तु न तैर्महाकाव्यैस्तस्य मनोजगत्प्रकाश्यते। तन्मनोजगतस्तु प्रकाशनं भवति तत्प्रणीताभिः स्फुटरचनाभिरेव। तत एव सनातनसमीक्षार्थं मया विषयोऽयमवचितः।

भवतु। सम्प्रति विचारणीयोऽयं विषयो यदाचार्यरेवाप्रसादद्विवेदिनो मुक्तकवितानां विषयः कः? किं विषयमहिम्नैवाऽसौ स्वीया विविधाः संवेदना अभिव्यनक्ति, उताहो प्रतिभा-महिम्ना व्युत्पत्तिमहिम्ना वा?

प्रश्नस्याऽस्योत्तरं नाति कठिनम्। वस्तुतो लोक एव सनातनस्य कवितानां विषयः। को नु लोकः? मन्ये दृश्योऽपि लोकोऽदृश्योऽपि। यद्वा भौतिको दैविकोऽथ चाध्यात्मिको लोकः। यतो ह्यप्रतिहतगतिः कविः सर्वत्र। मतान्तराख्ये काव्ये स्वयमेव कथयति कविः-

इदं मम मतान्तरं मम युगस्य संवीक्षणं
यथार्थमयविग्रहं ननु कलाविलासादिवत्।
निधीयत इदं विषामृतयुगीसमानाशने
शिवे परमभैरवे पशुपतौ कृपाम्भोनिधौ॥

अस्मिन् यदस्ति नवमस्य कृते नमामो
देवाय कालपुरुषाय परात्पराय।
तत्काव्यमेव न भवत्यनुबिम्बितानि
यस्मिन् भवन्ति न निजस्य युगान्तरस्य॥

सुस्पष्टं सर्वं कविमुखेनैव। यथार्थमयविग्रहं युगस्य संवीक्षणमेव काव्यस्य विषय इति सनातनः। यस्मिन् युगान्तरमनुबिम्बितं न जायते तत् काव्यमेव न भवतीत्यपि सनातन एव।

वस्तुतः कविवचनमिदं प्रमाणीकृत्यैव मयाऽत्र तत्कवित्वं यथामति यथाशक्ति च समीक्ष्यते। काव्यमपि सनातनस्य। काव्यमूल्याङ्कनमान-दण्डोऽपि सनातनस्यैव।

कवितायां तत्त्वद्वयाऽस्तित्वं परिलक्ष्यतेवर्ण्यम् (वर्णनीयं वस्तु) वर्णयिता कविश्च। उभावेव मूलतः पृथक् तिष्ठतः। परन्तु काव्योपक्रमे कविकर्मणि वा उभयोः सङ्गमो जायते। उभयोस्तादात्म्यं सञ्जायते। कथम्? कविः स्वयमेव वर्ण्यपात्राणां काये प्रविश्य तत्संवेदना अभिव्यनक्ति। यथा मेघदूते कालिदासः स्वयमेव यक्षो जायते कथयति च सव्यापारामहनि न तथा पीडयेन्मद्वियोग इत्येवमादि। कुमारसम्भवे स एव भूयोऽपि त्रियम्बककाये प्रविशति तद्भावनाश्च व्यनक्ति। वस्तुतः परकायप्रवेशं विना वर्ण्यवर्णयित्रो- र्मिथस्सम्पृक्तिरेव न सम्भवति।

कविताप्रक्रियायां, यथाऽहमनुभवामि, अयं परकायप्रवेशोऽपि द्विविधे भवति। परस्य काये आत्मनः (कवेः) प्रवेश इति प्रथमम्। यथा

सद्दामाऽस्मीतिशीर्षकं काव्यम्। अत्र सनातनकविः परस्य सद्दामस्य (सद्दाम्नो वा) काये प्रविश्य तस्य तास्ता अनुभूतीः प्रकाशयति। अपरत्राऽसौ आत्मशरीरे एव समग्रमपि विश्वं प्रवेश्य, विश्वानुभूतीः विविधा एकैकशो व्याहरतीति द्वितीयम्। अहं स्वतन्त्र इति शीर्षकं काव्यमस्य निदर्शनम्।

प्रकृतसद्दामस्य किमासीच्चिन्तनमिति केन वा ज्ञातम्? तावन्मात्रमेव ज्ञातं लोकेन यावत्तेन प्रकाशितं वचसा वा, कर्मणा वा। परन्तु यदा कविस्तत्काये प्रविशति तदा विलक्षणमेव किञ्चिच्चिन्तनं तस्य प्रकाश्यते। तद् भवत्यलोकसमान्यमेव। अतएव काव्यम्। पश्यन्तु तावत्–

पाणौ स्वे विहितस्त्वया यदि भुवो भागो महान् रत्नसू–
गर्वं किं नु करोषि मानव! महाऽम्रीकानिवासिञ्छृणु।
साफल्यं तव शक्तिसम्भृतमिदं नास्त्येव नास्त्येव ते
साफल्यं बत मानुषस्य कृपणां बुद्धेः कथां कायति॥

मत्स्यः खादति मत्स्यमेव गृहताकारेण चेदाणवं
सामर्थ्यं जगदण्डमेव गिलतीत्याकारदर्पो हि ते।
यत्कोशादिबलं क्षयिष्णु ननु तत् क्षेत्रे च या वैपुली
सा संघस्य तवान्तरात्मनि समाविष्टस्य वै भूभुजाम्॥

स्वजीवने सद्दामः केषाञ्चित् प्रियोऽप्रियश्च केषाञ्चिदासीत्। परन्तु याऽक्षतस्वाभिमानता तदीयाऽत्र प्रकाश्यते कविना सा विलक्षणैव प्रतीयेत। बले पौरुषेऽध्यवसाये प्रयत्ने विफलीभूते प्रायेण सर्वोऽपि लोको नियतौ विश्वसिति, अदृष्टबलं स्वीकरोति। कमपि जगन्नियन्तारञ्चाप्यनुभवति। स जायते दार्शनिकः। सद्दामोऽपि जीवनस्यान्तिमे क्षणे दार्शनिक एव प्रतीयते–

एतत्सर्वमवाप्य भूमिकुहरे कस्मिंश्चिदावासितो
विद्ये जीवित एव हन्त मृतवत्खाते नु दस्युव्रजैः।
एषा मे नियतिर्न मेऽत्र मनसि क्लेशोऽस्य सर्वस्य वै
सायं प्रातरहो विपर्ययमयीं लीलां प्रभोः पश्यतः॥

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेणेति प्रथितो भारतीयदर्शनोद्घोषोऽत्र चरितार्थः परिलक्ष्यते। अत्रेराकदेशसम्भूतः सुन्नीमत–स्थस्सद्दामो भारतीयदृष्ट्या समीक्षितस्तिष्ठति न खल्विस्लामदृष्ट्या।

अन्यत्र कविः समाजं राष्ट्रं विश्वमेव वाऽत्मनि प्रवेशयन् परिलक्ष्यते। तदासौ विश्वानुभूतीनां स्वयमेवाऽश्रयो जायते। तद्यथा–

अहं स्वतन्त्रः परं निन्दितुं
यदि वाऽऽत्मानं स्तोतुं
तर्पयितुं मम मानसगृद्धं
पोषितुं मम कायं धातुमात्रसङ्कायम्।

अहं स्वतन्त्रः

परस्य कण्ठे करपत्रं चालयितुं
अर्थः सिद्ध्यतु न वा मदीयः
परस्य मार्गं रोद्धुं, जननेतृत्वं वोढुं
बहुमतलब्ध्यै यथाकथञ्चित्
कूटगवीमपि दोग्धुम्॥

अहं स्वतन्त्रः पटु प्रवक्तुं
यमनियमानामर्थान्
लब्धुं ततो दक्षिणाद्रव्यम्

निर्माक्षिकमिदमत्तुं
बलीवर्द इव किञ्च
गृहिणीं समासमीनां कर्तुं
गोत्रं स्वं वर्धयितुम्
अहं स्वतन्त्रः स्वके मस्तके
पादौ निजौ निधातुं
मुक्त्वा प्रियां सुधामपि हालाहलं गले पातयितुं
स्वैरं मोक्षतया रे देवाः मृत्युं शृणुत वरीतुं
अमृतत्वं दलितयितुं
मम द्रव्यमिति वृत्तपत्रके मम प्रियं मुद्रयितुं
अप्रियमपहस्तयितुम्॥

आधुनिकसमाजस्य यदुच्चावचाचरणं तत्सर्वमत्र व्यङ्ग्यशैल्या प्रस्तुतम्। आत्मप्रामाण्येनैव महाकविस्सनातनः स्वकाव्य-प्रतिपाद्यवैशिष्ट्यं पुरस्कुरुते प्रमथस्य प्रावेशिक्याम्-

'अत्र नवरचनाः संगृहीताः। तासु प्रथमा परमाणुयुगे विषमविषमान् विपाकानुपलक्ष्य शान्तिकामनया निष्पन्ना भावमयी रचना, द्वितीया चतुर्दशीति रचना वैराग्यमयी, तृतीयाऽर्थिके वैषम्ये जीवदृष्ट्या दृढं प्रहरन्ती, चतुर्थी मात्सर्यप्रतिशोधमयी, पञ्मी नियतिचक्रस्य वैपरीत्यमुदाहरन्ती, षष्ठी समाजसमीक्षाचणा, सप्तमी दार्शनिकी, अष्टमी मनोवैज्ञानिकी, नवमी चान्तरिकं द्वन्द्वमुपनिरूपयन्तीति सङ्ग्रह एष विश्वजनीनः।

किमतः परं स्फुटतरं स्यात्सनातनकाव्यप्रतिपाद्यविषये? तत्कवितायाः कियान् विस्तार इति स्वयमेवाऽसौ प्रतिपादयति स्वोपज्ञे शतपत्रकाव्ये। तद्यथा-

कविता न सनातनस्य काचिन्मधुवल्ली
मदनाय मद्यसूतिः।
ननु साऽस्ति शिवप्रियाङ्गयष्टित्रिदला
काऽप्यमृताङ्गबिल्वपत्री॥

कविता मम पायसाभिषेकैः परितृप्ते
शिवयोर्युगे प्रसक्ता।
हरिचन्दनकल्पिता सपर्या त्रिदलै-
र्बिल्वदलैः कृतातपत्रा॥

कवितेऽसि रुतिर्न वायसानां
त्वमहो शब्दमयी कदापि नासीः।
त्वमयेऽनुभवो विनापि शब्दं
हृदयेनानुभवन्ति कामिनो यम्॥

कविता नहि राजनीतिभाषा
छलनाऽसीत् कविता कदापि नैव।
तदिदं द्वितयं विमिश्रितं यत्
कवितायामिति दूयते चितिर्नः॥

कविता हृदयस्य कापि वाणी
क्वथितस्य प्रणयेन चिन्मयेन।
यदि वा हृदयास्थिता विपञ्ची
कविता स्वप्नकथा विमुक्तमौना॥

अद्भुतमिदं काव्यं सनातनकवेः। स्वोपज्ञकाव्यस्य यादृशमानन्त्यं वैविध्यञ्च निरूपयत्यत्र कविः पद्यशतकेन तदाधुनिकसंस्कृत-काव्यपरिधावन्यत्र दुष्प्राप्यम्। एतत्पठित्वैव सनातनकवित्वं सम्यक्तयाऽव-बोद्धुं शक्यते।

किं नु करोमीति शीर्षके काव्ये विलक्षणमेव वाचिकं दृश्यते। काव्येऽस्मिन् पुरुषार्थस्य वैफल्यं नियतिनटीविलासः, जगतः कुटिला गतिः विधीच्छाया अवश्यम्भावित्वमिति विविधा विषयाः समवलोक्यन्ते। शिल्पसंवेदनोभयदृष्ट्या काव्यमिदं प्रशस्ततमं परिलक्ष्यते। कानिचन पद्यानि समुद्ध्रियन्तेऽत्र,

प्रविरोहति नैव पूर्णमेषा मम
गेहेऽपि विशुद्धिमत्यलाबूः।
यदि रोहति दैवदुर्विपाकात्पि-
चुमन्दायति सा क्व हन्त यामि॥

चणकांश्च हरेठुकांश्च यान्वै
मम दाराः प्रवपन्ति गेहसीम्नि।
अपि तान् कलविङ्ककाद्रमूष्यः
शिखिनश्चाङ्कुरतां न लम्भयन्ते

जरती मम गौरियं करीषं
कुरुते प्रत्यहमप्यदृष्टशष्पा।
उपलीकृतमेतदेषरौप्यैः प्रति-
वेशी विनिमाय लब्धराज्यः॥

मम तर्कुटिका विनिर्ममे वै
प्रतनून् यस्य कृते तु हन्त तन्तून्।
पट एष शवाय कल्पते मे,
न तु मह्यं प्रहसन्ति बान्धवा धिक्॥

ननु यां जपमालिकेति पाणौ
मम कुर्वे स्रजमन्वहं मणीनाम्।

अयि सैव हि सर्पिणीत्वमाप्य
दशति क्रूरमिमं हि मां, क्व यामि।। –प्रमथः

पत्राय तस्मै नमः इति शीर्षके काव्ये कविः धनक्रीतान् पत्रकारान् प्रति साधिक्षेपं वक्ति किञ्चित्। सचेतसामनुभवसिद्धमिदं तथ्यम्। सत्यं तु सत्यमेव। सत्यं न कमपि समर्थकं रक्षितारं पुरस्कर्तारं वा मार्गयते। मनुष्यः यस्यपक्षधरः स्वयमेव तमाश्रयं विन्दते। तथाप्येते पत्रकारास्तदेव सत्यं कदाचिदमुकस्य कदाचिच्चाऽमुकेतरस्य पक्षे साधयन्ति। तादृशमेव तच्चरितमुपकल्प्य कथयति कविः।

मिथ्या वक्ति कुलाधिपः कुलपतिः
प्राध्यापकोऽध्यापकः
छात्रः छात्रपिता कवी रचयिता
द्यौर्भूर्दिशां मण्डलम्।
कामं मित्र! बिभेमि। किन्तु विवशो
वक्तुं, वदाम्येव यत्
सत्यं केवलमेक एव वदति
श्रीपत्रकारः प्रभुः।।

श्रीमतां सनातनवर्याणां संवेदनाभिव्यक्तिशैली नूनमेव हृद्या, उक्तिवैचित्र्य-भङ्गीभणितिविन्यासविदग्धरीतिमण्डिता च संलक्ष्यते। लक्ष्मीं सम्बोधयन् कविः कथयति।

यदि पाचयसेऽत्र कोद्रवाणि
मयि जाम्बूनदगात्रकेऽपि पात्रे।
अयि लक्ष्मि! विवेकशून्यतायै
भविता ते गणना कनिष्ठिकाग्रे।।

यदि पात्रमिदं भनक्षि कोपात्
करुणा सा परमा रमे! त्वदीया।
अनुपाधिनि गात्रगोत्रशून्ये
किमु मर्मव्रण एव वा च कीदृक्?

वस्तुतः सनातनकाव्यवर्त्मनः समीक्षा बृहद्ग्रन्थेनैव कर्तुं शक्यते, न पुनर्लघुना निबन्धेन केनचित्। मया तु स्थालीपुलाकन्यायेनैव सन्दर्भोऽयमीषदुन्मीलितो नव्यानां सरणिनिर्देशनाय। ते चाऽग्रेसरीभवन्तु क्षेत्रेऽस्मिन्। साम्प्रतिकेषु कविषु प्रतिष्ठायाः, पाण्डित्यस्य, सामर्थ्यस्य, बहुश्रुततायाश्च धुरि समादृतानां सनातनपादानां कवित्वं निश्चप्रचमनन्यकल्पं प्रतिभाति। तदभिव्यक्तौ पाथोधिगाम्भीर्यं व्योमविस्तारश्च दृश्येते। नीलनदीमधिकृत्यापि यल्लिखति कविस्तद् भवति मननीयमैतिह्यम्। कविप्रणीतमैतिह्यं कियन्मार्मिकं भवति इति काव्यं पठित्वैव ज्ञातुं शक्यते। पश्यन्तु,

हिमशैलसुता अपीह धाम्नि
भरतानां सरितः समुद्रपत्न्यः।
तपतां प्रवरास्ततस्तदीयां
तटभूमिं हि समाश्रयन्ति तप्तुम्॥

तव नील समञ्जसा प्रवृत्ति-
र्ननु सेयं पृथुता च तादृशी ते।
वद किन्तु, परन्तु तोयपानां
तव तीरे वसतां च दृक् स्थविष्ठा॥

अन्ते च कवेर्निर्भयवक्तृता समुदाह्रियते। राष्ट्रावमानकरीं विभ्रष्टराजनीतिमुपलक्ष्य कविः कथयति विपरीतलक्षणया।

निर्लज्जोऽस्मि गतत्रपोऽस्मि विहतव्रीडोऽस्मि नक्तन्दिवं
निर्वैलक्ष्यमहं भ्रमामि परितः कौलीनमालावृतः।
मन्दाक्षेण निमीलिताक्षमधुना तच्चञ्चलापि स्थिरा
भूत्वा श्रीर्मयि रज्यतीति स हरिर्मग्नः क्वचिद्वारिधौ॥

का वै लोकसभा ससंसदधुना, निर्वाचनं कीदृशं
काष्ठीः पुत्तलिका इमाः अहमिदं क्रीणामि सच्छोटिकः।
एताः गड्डरिकाः पतन्ति सुतरां गर्ते स्वतो वायसाः
श्वानः कङ्ककुलाङ्कुराश्च रसयन्त्यद्धा शृगालीगिरः॥

भारतराजनीतिविषये किमतः परं नग्नसत्योद्घाटनम्?

सनातनस्य लघुकाव्यानि नाट्यसाहित्यं च

प्रो. सदाशिवकुमारद्विवेदी

अथ विंशति लघुकाव्यानि—

१. **प्रमथः** (३५० पद्य, १९८८)

प्रमथः (२०), चतुर्दशी (१४), प्रलापाः (१०६), निसर्गः (५१), किं नु करोमि (४३), नमो विषाय (२५), मृत्यो! (५२), कस्त्वं काम! (१३), भावाः (२६)

२. **शतपत्रम्** (१५३ पद्य, २०००)

३. **संस्कृतहीरकम्**

४. **श्रीरेवाभद्रपीठम्** (१५३ पद्य, २०००)

५. **मतान्तरम्** (११३ पद्य, २००१)

६. **शरभङ्गम्** (१११ पद्य, २००१)

७. **शकटारम्** (१२१ पद्य, २०००)

८—१०. **शरशय्या** (३४९ पद्य, २००२)

सुगतो ब्रवीति(११७ पद्य),

वृद्धकुमारि!(१२९ पद्य),

शरशय्या (१०३ पद्य)

११—१३. **अमेरिका** (३२१ पद्य, २००८)

अमेरिका (२४६ पद्य),

एतत्तु याचामहे (५५ पद्य),

विधिर्होमो निषेधानले (२० पद्य)

१४–१६.रामपरिसंख्या (५४७ पद्य, २००८)

रामपरिसंख्या (२२१ पद्य),

अहमस्म्यहमेव (२०२ पद्य),

अयि शकुन्तिके! (१२४ पद्य)

१७. **अयि नीलनदि!** (२४२ पद्य, २०१०)

१८. **अवदानलतिका** (२३० पद्य, अप्रकाशित)

त्रीणि अवदानकाव्यानि –

१९. **हरिहरावदानकाव्यम्** (२६१ पद्य, २००९)

२०. **रत्नस्वरूपावदानकाव्यम्** (३०७ पद्य, २०१०)

२१. **जयेन्द्रसरस्वतीपादावदानकाव्यम्** (१२३ पद्य, २०११)

१. प्रमथः

'प्रमथः' इत्यस्मिन् १९८८ ख्रीष्टाब्दे कालिदाससंस्थानेन प्रकाशिते ३५० पद्यात्मके काव्यसंग्रहे आचार्यरेवाप्रसादद्विवेदिनां नवसंख्याकाः विविधाविषयकाः रचनाः संगृहीताः सन्ति एवम् – **प्रमथः, चतुर्दशी, प्रलापाः, निसर्गः, किं नु करोमि, नमो विषाय, मृत्यो!, कस्त्वं काम!, भावाः ।**

एतासु प्रथमा **'प्रमथः'** इति परमाणुयुगेऽस्मिन् विषमविषमान् विपाकानुपलक्ष्य शान्तिकामनया निष्पन्ना भावमयी विंशतिपद्यात्मिका रचनाऽस्ति। अत्र प्रमथ इति प्रदाभिधानोऽस्ति परमाणुः शस्त्रत्वमुपात्तः विनाशायोद्यतः सृष्टिचक्रस्य क्षणमात्रेणैव। कविः विज्ञानवधूं मनुते तस्यैतस्य परमाणुप्रमथस्य जननीं। कामयते अस्य सार्वत्रिकीं स्थितिं शान्तिपूर्णां न च विनाशायोद्यताम्–

भगवन् न हि ताण्डवस्य वेला ननु विज्ञानवधूः सकौतुकैव ।
इयमद्य सयावका कथञ्चित् क्रमते कौतुकवेश्मने वराकी ।।१।।
भगवन् कुरु ताण्डवं, परन्तु, प्रियया सार्धम् अहो न वीरभद्रैः ।
जगतीवरवर्णिनीयमद्य शयनीयं भजते समिद्धरागा ।। २।।
भगवन् परमाणुभिस्त्वदीये रचित भस्म ललाटचत्वरे यत् ।
तदिदं परिकर्म रोचतां ते ननु विज्ञानमिदं तवैव भूतिः ।। ४।।

भारतवर्षस्य प्रतिवेशिनः दशकन्धरसदृशाः परमाणुशस्त्रसम्पन्नतां भजमानाः भारतमेव निगिरितुमुत्सहन्त इति दृष्ट्वा कविः कथयति—

दशकन्धर एष सावधानो भव शम्भो! स्तवने कविः स दक्षः ।
दयसे यदि तत्र हे दयालो! विषपानं कुरुषे कथं मृषैव ।।१२।।

प्रतिवेशिनां वैखरी कटुनां नाश्रयति मनसा विनाशायोद्यतानाम्। सा नित्यं माधुर्यमेव विकिरति सौजन्यप्रकाशकम्। न तत्र क्वचिदपि विश्वासः करणीयः। सन्त्येते दशकन्धरसदृशाः।

चतुर्दशीऽति नाम्ना प्रसिद्धा द्वितीयाऽत्र रचना वैराग्यमयी। चतुर्दशीपदेन पद्यचतुर्दशी अत्र विवक्षिताऽस्ति। पूर्णिमारूपाय शिवाय ततोऽधिकश्लोकनिर्माणासम्भवात्।

भगवन्तं शिवमेवाभिलक्ष्य कविः स्वभावान् प्रकटयत्येवम्—

फणिनो यदि नाथ कङ्कणं भवते किञ्चन रोचतेतराम् ।
हृदयं क्व ममोपयोक्ष्यते, शरणं ते चरणावुपेयुषः ।। ६।।
भवतः करपुण्डरीकयोर्डमरुर्यः शिव! डण्डमायितः ।
लभतां क्षणविश्रमं स च प्रतिपत्त्यां मम वैखरीगिराम् ।। ७।।
शवभस्मनि तेऽस्ति चेद् रुचिः कुरु देहं मम भस्मसादिमम् ।
स्मर एव स नूनमात्मवान्, प्रतिरोधो यदि वा स्तुतेर्महान् ।। ८।।

'प्रलापाः' इत्यस्मिन् १०६पद्यात्मके खण्डकाव्ये कविः धिक्करोति लक्ष्मीं यया असावनालिङ्गित एव स्थितः चिरम्। कविरत्र आर्थिकं वैषम्यं दृढं प्रहरति। लक्ष्मीं संबोध्य कविरसौ कथयति—

अयि लक्ष्मि! कथं विमन्यसे मां ननु जानासि क एषको भवामि ?
अहमस्मि सुदर्शनं त्वदीशे पविरेषोऽस्मि तदग्रजे च भीष्मः ।।१।।
अहमस्मि वृषः सनातनाख्यो मम वर्षा हि चराचरस्य सर्वम् ।
यदिदं कमलं तवास्ति धाम ननु सौरभ्यमहं हि तत्र वर्त्ते ।। २।।
निगमागमवर्ष्म यद्धि काव्यं प्रथमानं प्रविभाति मर्त्यभूमौ ।
शृणु लक्ष्मि! तदस्ति मामकीनं श्वसितं यत् खलु मङ्गलं त्रिलोक्याः ।।४।।

'<u>निसर्गः</u>' इति एकपञ्चादशपद्यात्मके काव्ये महाकविरसौ मात्सर्यप्रतिशोधनाय स्वभावानुपनिबध्नाति वृषदंशकेन निष्कारणं दष्टं प्रचलाकिनमभिलक्ष्य—

उटजं परितो भ्रमन् कदाचित् प्रचलाकी वृषदंशकेन दष्टः ।
विरुवन् प्रखरेण चञ्चुकेन प्रजिहीर्षंश्च स चिन्तयाञ्चकार ।।१।।
अयि सुन्दर! कश्चिदेव लोकेऽभ्युदयं वीक्ष्य परस्य हर्षमेति ।
इतरेऽनुभवन्ति तप्तसूचीविनिवेशं नु दृशोः स वै निसर्गः ।। २१।।
परिपश्यत कस्य वाऽद्य वृद्धिः शिखिनां वा यदिवा विडालकानाम् ।
अयि पश्यत कस्य वा समृद्धिस् तमसां वा यदि वाद्य तापसानाम् ॥४४॥

'किं नु करोमि' इत्यस्यां ४३पद्यात्मिकायां कवितायां सनातनकविः नियतिचक्रस्य वैपरीत्यमुपदीकरोति —

ननु यां जपमालिकेति पाणौ मम कुर्वे स्रजमन्वहं मणीनाम् ।
अयि सैव हि सर्पिणीत्वमाप्य दशति क्रूरमिमं हि मां, क्व यामि ।।१०।।

वृषभो मम मन्दिरस्य शम्भोः खरभावं प्रतिपद्य नर्नृतीति ।
अपि तस्य च पुच्छमेष तुच्छं प्रतिवेशो निभृतं दहत्यहो धिक् ।।११।।
मम कोकिल आगते वसन्ते ननु काकध्वनिमेष धिक् करोति ।
अयमेष च राजहंससूनुर्मम कारण्डवभावमादधाति ।।१२।।
कुशलः खलु यस्तु चौरकर्मण्यपि यज्ञे घृतपात्रकं निगीर्य ।
स हि मह्यमहो पुरोहितत्वे सुलभः संप्रति हन्त किं करोमि ।।१५।।
धिगसौ निगमागमाभिमानी मम बन्धुः कुरुतेतरामिहापि ।
जगता द्रविणैः समर्च्यमाने शिवगात्रे द्रविणस्य चौर्य्यमद्धा ।।१६।।
इयमद्य शची त्रिलोकलक्ष्मीं त्रिदिवात् सारयतेतरां सशक्रा ।
पविना ससुदर्शनेन पन्थाः हहहाऽस्या न खिलीकृतो न धिग् धिक् ।।१८।।
सहकारकिशोरको ममैष मुकुलोल्लासमुवाह यत्र रात्रौ ।
तमिमं क्षपयाञ्चकार सद्यः करकावृष्टिरतीव घोरपाता ।। २७।।
मम कुण्ठितकुण्ठिताऽस्ति संवित् परितोषं न लभे दिवा न रात्रौ ।
कृशरेष्वपि मामकेषु रूक्षेष्वधुना यत् प्रपतन्ति काकराजाः ।। ४३।।

'<u>नमो विषाय</u>' इत्येतत् पञ्चविंशतिपद्यात्मकं काव्यम् अस्त्यन्वर्थसंज्ञम्—

कुम्भोद्भवेन च भवेन च यस्य गोत्रे
गात्रे च दर्शितचरा ननु नाशशक्तिः ।
तत्रापि यस्य महिमाऽनुदिनं कुमारस्
तस्मै नमो बत विषाय परात्पराय ।।१।।

'मृत्यो!' इत्यस्मिन् ५२पद्यात्मके काव्ये महाकविरसौ ध्रुवसत्यत्वेन मर्त्येषु विजृम्भमाणं मृत्युमभिलक्ष्य तत्स्वरूपोद्घाटनपरान् विचारान् प्रकटयत्येवम्—

मृत्यो! त्वं खलु कः, प्रमीलनकला द्राघीयसी किं दृशोर्
दीव्यद्दीपदशार्च्चिषोः क्षणमितः किं विप्रयोगोऽसि वा ।
ब्रूहि प्रस्फुटमद्य मित्र! भवसि त्वं किं चितागर्भयोः
सन्धिर्, ज्ञातमहो नवीननटने नान्दीनिनादो भवान् ।।१।।

कीदृग्विधं तव मुखं वद मित्र मृत्यो!
किं भीषणं ज्वलनजालपरीतगर्भम् ।
यद्वा मनोज्ञमुषसि प्रविभिद्यमान–
कह्लारकोपममथो विमुखायसे किम् ।। ३।।

'<u>**कस्त्वं काम**</u>!' इत्यस्ति कविता त्रयोदशपद्यात्मिका। सम्पूर्णाऽप्येषा कविता कामस्य प्रभावं विशदं निरूपयति एवम् –

कस्त्वं काम! स वामनस्य चरणः किं येन वर्धिष्णुना
तीर्णं विष्णुपदं मिता वसुमती श्रान्तो न यद्विक्रमः ।
यद्वा किं पवनात्मजोऽसि शतशो बद्धोऽप्यबन्ध्योद्यमः
सर्वां स्वर्णपुरीं पितृव्य इति वै शोचिष्मते यो ददौ ।।१।।

काव्यसंग्रहेऽस्मिन् अन्तिमं काव्यमस्ति '**भावाः**' इति षड्विंशति–पद्यात्मकं यत्र महाकविरसौ जीवनस्य आन्तरिकं द्वन्द्वं निरूपयति एवम्–

भावाः भवन्त उपसन्नतमाः परन्तु
व्यावृत्तसर्व्वकरणप्रसरा इमे स्मः ।
निद्रां गते प्रणयिनि स्फुरदङ्गकान्त्या
किं कान्तया मिलितयाऽपि रहो निशान्ते ।।१।।
विद्यामहे निखिल-वाङ्मय-पिण्डितार्थ-
व्याहारसारकृतिनः खलु पण्डितेन्द्राः ।
चित्तं मनागपि न मुञ्चति किन्तु चेत्य-
माध्वीकवैभवमिदं परिभोगमुग्धम् ।।११।।

२. शतपत्रम् —

शतपत्रम् इत्यस्मिन् ११३ पद्यात्मके खडकाव्यरत्ने सनातनकविः कवितामुपवर्णयत्युपमानततिभिः। प्रतिपद्यमत्र प्रतिभाति नवीनोपमानगर्भितत्वं कविताविषयकम्। काव्यरचनायां प्रवर्तमानस्य कवेरत्रास्ति भूमिका औपनिषदी। कविता कविहृदयस्य संविधानं भवति यस्यामसौ आत्मवृत्तमुपनिबध्नाति नैकशः—

कविता हृदयस्य संविधानं तरलस्य प्रणयेन मुक्तबन्धम् ।
वृणते परतन्त्रतां स्वतन्त्राः सुहृदो यत्र विना पराभियोगम् ॥१॥

संविधानं जनान् प्रतिबध्नाति नियतरूपेण व्यवहर्तुं किन्तु कवितारूपं प्रणयतरलं कविहृदयोद्‌भूतं यत् संविधानं वर्तते तत्तु सर्वथा मुक्तमेव भवति। अत्र नियतिकृतनियमराहित्येन स्वतन्त्रोऽपि कविः परतन्त्रतां वृणुते यत्र परापरयोर्विद्ययोर्नास्ति अभियोगः। विरोधमुखेन कविरत्र कवितायाः अनितरसाधारणं स्वरूपमुपस्थापयति। कविरत्र आत्मनः चितिशक्तेश्चित्ते जायमानस्य प्रतिबिम्बस्य प्रतिबिम्बनमेव मनुते कवितां, यत्प्रवहति मृत्युतन्त्रमुदस्य अनन्यलभ्य आत्मविलास इव, अमृतस्रोत इव यच्च प्रददाति विश्ववैभवं पराम्बायाः ममतेव प्रवहमाणा सर्वसहृदयेभ्यः।

कविता स्वगतं कवेः स्वबिम्बप्रतिबिम्बप्रतिबिम्बनं वचःसु ।
अत एव तु तां विभावयामोऽपरलभ्यं परमाऽऽत्मनो विलासम् ॥ ३॥
कविता चितिसीमनि स्वताया अमृतस्रोत उदस्तमृत्युतन्त्रम् ।
उपदीकृतविश्वभूतियोगो ममकारः कविता पराम्बिकायाः ॥४॥

कविहृदयं ब्रह्मतां भजते स्वस्वरूपिणं सर्गबन्धमुपनिबद्धुम्—

कविता हृदयाभिधस्य धातुः स्वरितः कश्चन शब्दसर्गबन्धः ॥ ८॥
कविता मणिपञ्जरे चिदाख्ये विधृता कापि शुकी हिरण्यवर्णा ॥१०॥
कविता सुरभेः सुता सवत्सा ननु मैत्रावरुणस्य नन्दिनी सा ॥११॥

कविता प्रतिमूर्च्छते विकारोदधये कश्चन वाडवः कृशानुः ।
कवितौषधमुत्तमं चिकित्सावधितीर्णाय महाक्षयाय लोके ।।१६।।
कविता स कपर्द ईश्वरीयो विधुना लाञ्छितविग्रहात् तु यस्मात् ।
प्रभवत्यमरापगा त्रिलोक्याः परमं मङ्गलमम्मयीव गौरी ।।१९।।
कवितोच्छ्वसितं त्रयीपुरन्ध्र्याः कविता स्वस्तिवचो मनुष्यजातेः।
कविता परमो विभूतियोगो विरजस्कस्य परात्परस्य पुंसः।। ३२।।

कविरत्र कवितां परमसात्विकभावेन स्थितां सर्वकल्याणप्रदात्रीं जनकात्मजां मनुते यां प्रति शैत्यमवाप अनलोऽपि लंकापुर्याम्—

कविता जनकात्मजा नमस्या न दशग्रीवभुजाटवी न लङ्का ।
सुहृदः कविता स कोऽपि वह्निः शिशिरोऽजायत यो विदेहपुत्र्यै ।।४७।।

जनकात्मजायाः प्रसादेन अनलो न ददाह पवनतनयामिति प्रसिद्धमस्ति रामायणस्य सुन्दरकाण्डे। कविता नोपाददाति क्वचिदपि भावान् तान् यैः दशकन्धरात्मकता परिपुष्टिं प्राप्नोति।

कविताया आधारभूमिरस्ति निगमागमसम्मतममृतमयं तत्त्वं कविप्रतिभया प्रसूतम्। सनातनमते कविता तत्त्वविशेषेऽस्मिन्नस्तित्वं भजमाना प्रतिभाया कन्यकैवास्ति एवम्—

निगमागमसंज्ञकौ सुतौ द्वौ प्रतिभापुंसवनी पुरः प्रसूयः ।
प्रवयास्तपसा तु यां विलेभे तनयां तां कवितेति भावयामः ।।१०६।।

कविरत्र विरचयति सानातनीं कामपि पारम्परानुप्राणितां काव्य—भूमिकां या खलु नैरन्तर्येणास्त्यनुस्यूता अपौरुषेयाद् वाङ्मयात् संस्कृतकाव्यपरम्परायाः प्रत्येकस्मिन् कवौ।

कविता सर्वदा नर्मदैव भवतीति कवेरुद्गारः काव्यस्यास्य भरतवाक्यात्मभूते अन्तिमे पद्ये एवम्—

शिवयोर् दुहिता, तयोर्हि नित्यं विलसन्ती, सततं हि नर्मगर्भा ।
प्रलयेऽप्यलया प्रसादसौम्या कविते! त्वं ननु नर्मदा, नमस्ते ।।११३।।

कविता कथमपि प्रलयं न प्राप्नोति सम्पूर्णायामपि जगत्यां प्रलयं गतायाम्।

'शत्रपत्रम्' इत्यस्यस्मिन् काव्ये दर्शनम्, ऐतिह्यम्, उक्तिश्चेति त्रितयमपि समरसम्। अतश्चार्थवाद एष प्रतिभाति कविताया:। प्रतिपद्यं सनातनकवि: कवितां लक्षयति ताटस्थ्येन। अत एव आरोहत्येतत् काव्यरत्नं लक्षणशास्त्रपदवीं कविताया:। **स्वतन्त्राणामपि वैवशीरूप–पारतन्त्र्यजनकं बन्धमुक्तं प्रणयद्रुतहृदयसंविधानं कवितेति** तु अत्र सर्वत्राऽनुगतम्।

३. संस्कृतहीरकम्—

१९१८ वर्षे स्थापितस्य काशीहिन्दूविश्वविद्यालयीयस्य संस्कृत–विद्याधर्मविज्ञानसंकायस्य हीरकजयन्तीवर्ष–(१५.८.१९८८–१४.८.१९८९)स्य पूर्त्तौ १८.७.१९८९ तिथौ प्रकाशितस्य 'संस्कृतहीरकम्' इति काव्यस्य भवन्ति १३३पद्यानि स्रग्धरादिवृत्तात्मकानि येषूपनिबद्धोऽस्ति काशीहिन्दूविश्वविद्यालयस्येतिहास:, विशेषत: संस्कृतविद्यायै कृतां व्यवस्थामधिकृत्य। तत्र सर्वेषां कुलपतीनां (डॉ० रघुनाथप्रसादरस्तोगीं यावत्), संस्कृतसंकायस्य विख्यातनाम्नां प्रत्ननूत्नानां विदुषां संस्तव:। अयमस्य प्रथमो भाग:। द्वितीये च भागे भवन्त्यभिनन्दनपत्राणि।

अभिनन्दितानां नामानि—

१. गोवाराज्यपालमहोदय: श्रीगोपालसिंह:।

२. भारतोपराष्ट्रपति: डॉ० शङ्करदयालशर्ममहाभागा:।

३–५. शृङ्गेरीजगद्गुरुशङ्कराचार्या: श्रीअभिनवसच्चिदानन्दभारतीतीर्थ-पादा:।

६. द्वारकाबदरीपीठद्वयशङ्कराचार्या: स्वामिश्रीस्वरूपानन्दपादा:।

७-९. काञ्चीजगद्गुरव: श्रीजयेन्द्रसरस्वतीपादा:।

१०-१२. स्वामिन: श्री(हरिहरानन्द)करपात्रपादा:।

१३. काशीसुमेरुपीठाधीश्वराः स्वामिश्रीमहेश्वरानन्दसरस्वतीपादाः।
१४-१६.स्वामिश्रीमदखण्डानन्दसरस्वतीपादाः।
१७. स्वामिश्रीशङ्करानन्दसरस्वतीपादाः, सुमेरुशङ्कराचार्याः।
१८. डॉ० विद्यानिवासमिश्राः, सांसदाः।
१९-२०.डॉ० मण्डनमिश्रः।
२१. पं० बदरीनाथशुक्लः।
२२. श्रीमान् उमाकान्तमिश्रः सांसदः।
२३. श्रीसत्यदेववर्मा।
२४. डॉ० रघुनाथसिंहः सांसदः।
२५. श्रीमानतुलकृष्णगोस्वामिमहोदयः।
२६. श्रीनिरीक्षणपतिमिश्रः।
२७. पण्डितराजराजेश्वरशास्त्रिद्राविडः।
२८. डॉ० रामज्युपाध्यायाः।
२९. पं० पट्टाभिरामशास्त्रिणः।
३०. डॉ० सीतारामशास्त्री।
३१. पं० बलदेव उपाध्यायः।
३२. पं० रामाधीनश्चतुर्वेदी ।
३३. श्री जगजीवनराममहोदयः सांसदः ।
३४. श्रीदेवकान्तबरुआमहोदयः सांसदः ।
३५. श्रीमन्नेपालनरेशाः ।
३६. आनन्दमयी माता ।
३७. ताम्रपत्राभिलेखः ।
३८. स्वतन्त्रताभवनशिलालेखः ।

अत्र संस्कृतभाषाया: प्रशस्तौ श्लोका:—

माता संस्कृतभारती विजयते यद्वर्णमालागतं
प्रत्येकं घटकं विराजतितरां दिव्येन मन्त्रात्मना ।
वेदा यं समुपासते मधुकरा यद्वन्मधुच्छत्रकं
वल्मीकस्य कणाश्च यत्र कवितामूर्त्तिं भजन्तेतराम् ।।१।।
आर्या संस्कृतभारती विजयते यस्या अकारे परं
ब्रह्म स्फूर्जति राजते च परमा माता हकारे सदा ।
'त्वं तत्, तत् त्वमि'-ति स्फुटं जपति या मन्त्रं स्वरै: सप्तभि-
र्या पीयूषघटायते च भुवनस्वास्थ्याय भव्यात्मने ।।२।।
काशीयं सुरभारती चिरनवोढाकौतुकागारता-
मञ्चन्ती जयति, प्रवर्षतितरां यस्यां स धाराधर: ।
यन्मध्ये चपलायते हिमवत: पुत्री श्रयन्ती करे
दर्व्वीं काञ्चन निर्झरैर्मधुमयै: प्रह्लादयन्ती जगत् ।। ३।।
यस्यां राजति काचिद-द्वयकथेवाध्यात्मकारुण्ययो-
स्त्रय्या राजतमेखलेव यदि वा भागीरथीसन्तति: ।
यत्पाथ: सलिलं न, तद्धि सुमहन्नैष्कर्म्यशुद्धं तपो
राजन्यस्य परात्परस्य च, परा काचित् कवीनां च दृक् ।।४।।
विश्वस्वस्तिविधानमेतदखिलं रिक्थं स्वके मानुषे
भूय: स्थापयितुं प्रयागवसति: कश्चिद् द्विजन्मोत्तम: ।
प्रत्यस्थापयदत्र नीवृति महान्तं विश्वविद्यालयं
वर्षे षोडश ऊनविंशशतकस्यैतस्य यीशुप्रभो: ।।५।।
अस्मिन् संस्कृतवाङ्मयाय सुमहान् संकाय आविष्कृतो
विष्णोर्वक्षसि वत्सवद् द्युतिमहान् यो मालवीयै: स्वयम् ।
चैत्रेन्दो: स हि सप्ततिं ददृशिवान् सम्प्रत्यमुं मङ्गलं
पीयूषोत्सवमद्य हीरकजयन्तीसंज्ञकं सेवते ।।६।।

स्वामिश्रीकरपात्रपादानां प्रवचनमाधुरी स्तूयते–

राधानूपुरशिञ्जितं किमु, किमु ब्रह्मोद्यमत्युज्ज्वलं
किं वा तन्त्ररहस्यलास्यकलना, न्यायप्रकर्षोऽथवा ।
गङ्गा वाऽम्बुधिशायिपादमहिता, शम्भोस्तृतीयाक्षिजं
ज्योतिर्वा करपात्रसद्गुरुकथोद्गारात्मना राजते ।।१७।।
पाण्डित्यस्य परा स्थिती रसिकतोत्कर्षस्य रासोत्सवो
नेत्रोन्मीलनसद्व्रतस्य पृथुता श्रौतस्थितेः सौभगम् ।
कान्तासम्मित-देशना-प्रभु-सुहृत्-संभावना-पद्मयोः
स्वच्छाच्छोदसरः कथा हरिहरानन्दप्रभोर्द्योतते ।।१८।।

४. श्रीरेवाभद्रपीठम्–

१४९पद्यात्मके श्रीरेवाभद्रपीठकाव्ये भगवत्याः नर्मदायाः क्षेत्रे निवसतां जनानां सम्पूर्णमपि सांस्कृतिकं परिदृश्यं प्रतिबिम्बितं दृश्यते। कविः नर्मदातटे स्थिते सीहोरजिलान्तर्गते नादनेरनाम्ना प्रसिद्धे ग्रामे जनिमलभत। तत्रैव रमते अस्यान्तःकरणम् उत वा सम्पूर्णापि चितिः। नर्मदायाः सम्पूर्णोऽपि आभोगः तीर्थरूपेणास्ति प्रतिष्ठितः तत्क्षेत्रवासिनां हृदि। सनातनमते तीर्थत्वेन परिकल्प्यते क्षेत्रेऽस्मिन् प्रतिष्ठितः सम्पूर्णोऽपि सांस्कृतिकः व्यवहारः –

तीर्थायते न खलु केवलमम्भ एव,
पात्रं न वा, न च तटं सरितां स्रुतीनाम् ।
तत्तीरगा जनपदा जनतास्तदीया
जीवातवश्च न न तीर्थयितुं क्रमन्ते ।। पीठिका ५।।

भगवत्याः नर्मदाम्बायाः तटवासिनां वेशभूषा, जीवनपद्धतिः, दृढसंस्काराः, आध्यात्मिकी उन्नतिः, व्यावसायिकी वृत्तिः, संस्कृतेः संरक्षणाय उद्योगः, चारित्रिकं वैशिष्ट्यं, सस्यसम्पज्जन्या समृद्धिः, अभीष्टफलप्रदाता प्रकृतिः, शारीरिकं सौष्ठवं, धार्मिकी भावना अत्र

प्रतिपदं कविरुपनिबध्नाति। सौभाग्यव्रतं परिपालयन्त्य: अत्रत्या: ललना: धारयन्ति अनेकानि आभूषणानि एवम् –

ताटंकं श्रवसोः सुवर्णरचितं ग्रीवासु कण्ठावृता
स्वर्णालंकृतिरंगनासु भजते बाजट्टिका च श्रियम् ।
बाजूबन्दयुगान्विते भुजयुगे चूडा बतानान्विता
पादे वृश्चिकपायजेबकटिका गर्वाय संजाग्रति ।।१०।।

अलंकरोत्येतासाम् अनेकवर्णाञ्चितं चूनरसंज्ञकं निवसनं दिग्विभागेषु। करकमलयो: मेंहदीरचितं रागं दृष्ट्वा चंचलापि लक्ष्मी: परित्यजति स्वकीयं स्वाभाविकं चाञ्चल्यम् –

यासां चूनरसंज्ञकं निवसनं गौरे शरीरे लसन्
नानावर्णशुभं दिशामपि तनुं संमण्डयद् द्योतते ।
यासां वै मदयन्तिकारुणकरद्वन्द्वाङ्घ्रियुग्माब्जिनी–
षण्डे चञ्चलतां जिहासतितरां स्वाभाविकीं श्रीः स्वतः ।।११।।

ऋजुता अस्त्येतासां नेत्रेषु प्रतिष्ठिता। सन्त्येतासां नेत्राणि अन्तर्विकाररहितान्येव। यौवनदशायामपि एतासु नोद्भवति कामजनित: विकार: कश्चनापि –

यासां निर्मलनिश्छलानि नितरां संमुग्धिमब्रूडिता–
न्यक्षीणि क्षिणुतेतरामृतुतमा व्रीडैव सांसिद्धिकी ।
तारल्ये परिशिक्षितान्यपि न यान्यध्यासनन्यक्क्रियां
पञ्चेषोश्चपलस्य यौवनभरेऽप्याविश्चिकीर्षन्तकि ।।१७।।

मेकलकन्यकाया: कृपाप्रसादेन अत्र निवसन्त: सर्वेऽपि जना: सुखसमृद्धिमन्त: दृश्यन्ते–

यस्मै मेकलकन्यका भगवती वर्षात्यये शाटक–
द्वन्द्वेनैव ददाति रत्ननिचयान् पुण्योत्करस्यानुजान् ।

तस्मै स्वस्थसमस्तगेहपतये ग्रामाय मेधाविना–
मुल्लासैकनिकेतनाय नतयः श्रीनादनेराय नः ।।४०।।

सर्वेऽपि दिग्पालाः दरिद्राः प्रतिभान्ति कवये यतोहि अस्य संरक्षणाय राराजते सर्वसुखप्रदात्री नर्मदाम्बा माता, मेकलः मातामहः, शोणभद्रः मातुलः, मातुलान्यश्च हिमगिरिकन्यकाः –

त्वं माता मम, मेकलः स भगवान् मातामहो, मातुलः
शोणस्, ताश्च हिमाचलस्य तनया मन्मातुलानी–व्रजः ।
इन्द्र त्वं कृपणो जडोऽसि वरुण त्वं, त्वं कुबेराऽवरस्
त्वं वै प्रेतपतिर् यमेति यदिमान् धिक् कुर्महे तत् क्षमम् ।।८३।।

नर्मदाम्बायाः प्रवाहे उपलभन्ते प्रस्तरखण्डानि येषां प्रतिष्ठा सर्वत्रैव विश्वनाथरूपेण देवालयेषु जायते नर्मदेश्वरमहादेवरूपेण–

एतावन्मात्रमम्ब! त्वयि निखिल–मरुद्–वन्द्यतायै प्रकामं
पर्याप्तं च प्रमाणं यदसि भगवती काशिकायां तदीशः ।
त्वद्गौरीकुण्डगर्भे लसति य उपलस्तन्मयीं त्वां हि मातः!
काश्यां श्रीविश्वनाथो गमयति पदवीमात्मनः, संप्रसीद ।।१४८।।

सनातनमते कवितास्ति श्रुतिमंगला नित्यं प्रवहमाना नर्मदाम्बारूपेण पृथिवीतले। अनया सहृदयानां हृदि अमृतस्य कापि धारा प्रसूतिं लभते। भारतभूमेः मनस्विनः महर्षिजनाश्च प्रकाशस्तम्भरूपेण प्रतिष्ठिताः मौनं परित्यज्य जागरूका भवेयुः राष्ट्रस्यास्य संरक्षणाय –

भवति कविता रेवा सानातनी श्रुतिमङ्गला
स्पृशति हृदयं सैषा सूते च तत्र सुधाधुनीम् ।
भरतभुवना–भोगालोका मनस्विमहर्षयः
कृतमतितरां मौनैर् भूयोऽद्य जाग्रत जाग्रत ।। पीठिका १०।।

५. मतान्तरम् —

आधुनिकीं मनोवृत्तिं कविरत्र विधेयस्य निषेध्यत्वेनात्र निषेध्यस्य विधेयत्वेनोपवर्णयति। रावणादिवत् वर्तितत्वं न रामादिवत् इत्येवास्ति साम्प्रतिकः समुदाचारः। रामादिवदिति यः सिद्धान्तः विधेयत्वेन आसीत् प्रतिष्ठितः तस्य अत्र वैपरीत्येनास्ति उपस्थितिः अर्थात् रावणस्य वधः नोचितः तस्य महापण्डितत्वात्।

अहमस्मि मतान्तरस्य गाता ननु पौलस्त्यवधोऽस्ति रामदोषः ।
क्व नु दानववंश—सर्वनाशः क्व च पत्न्याः पुनराप्तिरिन्द्रियार्थः ।।१।।

आचारहीनोऽपि कलासक्तः प्रतिष्ठां लभते सम्प्रति कलामात्रैकानुरागिभिः। शासनं तेभ्यो प्रददाति सर्वविधं सौविध्यम्। आंग्लभाषायाः समुपासकाः स्वकीयां परम्परया प्राप्तां देवभाषां तिरस्कुर्वन्ति। त एव संस्कारहीनाः सम्प्रति प्रभुतामापन्नाः क्षुधातुराः सवत्रापि भक्षितुं प्रवृत्ताः दृश्यन्ते —

अयमस्तु समो मया विनापि मम संस्कारमिति क्षुधाऽऽतुराणाम् ।
मयि काचन दंष्ट्रिका पिशाची प्रभुतामाप्य तनोति हन्त झम्पाम् ।।१६।।

सम्प्रति मांसभक्षिणः गेहभूषणत्वं भजन्ते, विशृंखलानां संख्या प्रतिदिनं वर्धत एव। युवानः सर्षपपुष्पपीतकान्तयः दृश्यन्ते न पुनः मल्लयुद्धे प्रवीणाः—

क्व न मल्लमहीमृदा तरस्विन्यभिषेको वपुषि प्रकामरक्ते ।
क्व च सर्षपपुष्प—पीत—कान्तेरुपकारोऽद्यतनो युवाङ्गभङ्गे ।। २४।।

सम्प्रति स्वतन्त्रा अपि जनाः परतन्त्रा दृश्यन्ते लोकयात्रायाम्—

क्रियते खलु तन्न यत्र चित्तं सजते, संसजते च यत्र तन्नो ।
मनुवंशभवैरपि स्वतन्त्रैः परतन्त्रत्वनिगीर्णलोकयात्रैः ।।५९।।

यमुनया सह सर्वत्र अमृतं विकिरन्ती भगवती जाह्नवी यत्र सततं प्रवहति तत्र जनाः पशुतामापन्नाः मृत्युमुखं प्रविशन्तः दृश्यन्ते—

वहति त्रिदशापगा पृथिव्याममृतत्वं दधती ससूर्यपुत्री ।
म्रियमाणतया च बाध्यमानाः पशवोऽमी भरतावने! भवामः ॥८३॥

यद् घटितं, यच्च घटिष्यते उभयत्रापि दृष्टिं नाददानः मनुष्यः वर्तमानविषयेऽपि सर्वथा अजागरूक एव दृश्यते मद्यनिर्मिते कस्मिन्नपि लोकान्तरे प्रविष्टः —

किमभूद् भविता च किं भविष्ये न हि चिन्तेयमिमं वृणीत वै माम् ।
अहमद्यतनेऽप्यजागरूको नवलोके विचरामि मद्यसृष्टे ॥९४॥

एवं सन्त्यत्र मतान्तराणि कविना उपनिबद्धानि वर्तमानस्य वैपरीत्यप्रकाशकानि।

६. शरभङ्गम्—

अस्मिन् एकादशोत्तरशतपद्यात्मके अध्यात्मरहस्यकाव्ये दण्डकारण्ये निवसतः वीतरागस्य शरभङ्गमहर्षेश्चरितं कविरुपनिबध्नाति। वाल्मीकीये रामायणे शरभंगमहर्षेः यदस्ति स्वरूपमुपवर्णितं तदेवोपदीकरोति कविः उपस्थापनाय भारतीयं जीवनदर्शनम्। सत्यामपि सर्वसुखसम्पन्नतायां नानुसक्ता प्रतिभात्यत्र कथमपि भारतीया चेतना अध्यात्मसुखमात्रैकलाभाय संकल्पिता। शरभंगमहर्षिं स्वर्गं नेतुमिच्छति स्वयमेव देवराज इन्द्रः साक्षात् समुपस्थितः। ऋषिरसौ भगवतो रामस्य दर्शनाय प्रतीक्षारत आसीन्नासीदस्य दृष्टिः इन्द्रस्य रथे। असौ शरीरं तत्याज भगवतः दर्शनं सम्प्राप्य यज्ञाग्नौ —

ममता शरभंगचित्तकोषे निभृता चेदियमस्ति रामकाये ।
स उपस्थित आनिशाम्य तं वै मुनिरेषोऽनल आक्षिपत् स्वदेहम् ॥४५॥

भारतीया मनीषा मुक्तिमाश्रितवती न तिरस्करोति भौतिकं विश्वम्। भूतेष्वनास्थावन्तोऽपि ऋषयः तत्संरक्षणाय आसन् सततं सन्नद्धाः। सर्वथा लोकिकैः पदार्थसार्थैः असम्पृक्ता भारतीया ऋषिपरम्परा जीवसंरक्षणपूर्विकायै मुक्तये यतमाना दृश्यतेऽत्र। यः आरोहति शैलशृंगं तस्यैव पार्श्वे खाता अपि भवन्ति निरन्तरं विद्यमानाः। मुक्तिपथा—

वलम्बिन: ऋषय: शैलशृंगमेव पश्यन्ति आरोहणाय –

अयमिच्छति पारमेष्ठ्यमस्यां मृदि यस्यां विपदेव निर्व्यलीका ।
इह यत् समुदेति शैलशीर्षे सविधे जाग्रति हन्त तस्य खाता: ।। ३।।

नित्यानित्ययोर्भेदं कविरत्र वैशद्येन उपनिबध्नाति, नित्यताया: पारमार्थिकतां प्रतिष्ठापयितुम्। इदमेव वैविध्यं जगत: सर्वत्रैवानुस्यूतं दृश्यते काव्येऽस्मिन्। ऋषिरसौ अस्ति देहयुक्त: य: वह्निं परितर्पयति आत्मविग्रहस्य समर्पणेन–

शरभङ्गमहर्षये प्रणामा: स हि देहेन समाचितोऽस्ति देही ।
परितर्पयते य एष वह्निं हविषाऽप्यात्मशरीरविग्रहेण ।।१०२।।

७. शकटारम्–

दक्षिण–अफ्रीकाराष्ट्रे नेल्सनमण्डेला नाम्ना प्रसिद्धा: जनालोन्दलनस्य पुरोधा आसन् निगृहीता: कारावासे पञ्चविंशतिं वर्षाणि तत्रस्थै: शासकै: । तेषां कारागारान् मुक्तिमभिलक्ष्य सनातनकविना विरचितमस्ति एतत् काव्यम्। अष्टोत्तरशतपद्यात्मकेऽस्मिन् शतके महाकवि: नेतारमेनमुपमिमीते नन्दसाम्राज्यस्य मन्त्रिणा शकटारेण य: खलु तथैवासीन्निगृहीत: गाढान्धकारपूर्णे कारागारे चिरम्। तत्र सदारपुत्रसहित: शकटार: पातालकूपे निपातित: आसीत्। नन्दाधिपति: प्रत्येकं ददाति स्म पञ्चचणकान् प्रतिदिनं भक्षणाय। सर्वैस्तत्र निगृहीतै: कुटुम्बिभि: संविदा निर्णीतमन्यायस्यास्य प्रतिशोधाय। निर्णीतञ्च एतैर्यत् केनापि जीवितेन भाव्यमिति। सर्वे स्वकीयान् चणकान् पित्रे दद्यु:। अन्ये सर्वे क्रमेण देहबन्धान् मुमुचु: शकटारश्च नखै: वितर्दिकां विलिख्य संजातात् रन्ध्राद् बहिरायाति। रिक्तहस्तोप्यसौ जनयति भयमेव सर्वेषामेव हृदि अतिशयबीभत्सतान्वितत्वात्–

शकटार उदित्वरोऽद्य गर्त्तात् प्रविभिद्यावनिमीक्ष्यते कराल: ।
करयोरिह रिक्ततैव, किन्तु भयमस्मात् समुदेति भैरवास्यात् ।।१।।

तस्य अत्यन्तं भयंकरं रूपं कविः सम्यक् विलिखति। तमेनमत्याचारं मण्डेलायातनास्मृतिपथमारोपितवती। अत्र बन्धस्य दार्ढ्यमनुध्येयमाचार्यैः।

कविरत्र सम्बोध्य सम्पूर्णामपि पृथिवीं कारागारस्य बीभत्सतां वर्णयति यत्र शकटारः निगृहीत आसीत्—

अपहस्तितपौरुषो रसायाश्चरमे हन्त तले निवेशितात्मा,
श्वसितानि य एषकः पिपर्त्ति प्रतिशोधाय पुनः प्रकाश आप्ते ।।१०।।

कविरत्र धिक्करोति मानवतायाः प्रताडनायै प्राप्ताधिकारान् अधिपतीन्। काव्यस्यास्य प्रणयनेन प्रमाणीभवति यन्नास्ति संस्कृतकाव्यानां प्रवृत्तिः पौराणिकाख्यानवर्णनप्रधाना। पतति संस्कृतकवेः दृष्टिः सम्पूर्णेऽपि विश्वस्मिन् जायमाने घटनाचक्रे। यत्र कुत्रापि मानवता चीत्करोति प्रतिघातेनान्यायपूर्णेन संस्कृतकविः तत्र भावमुखेन प्राप्नोति उच्चैः विरोधञ्च करोति मानवघातकानाम् अत्याचारिणाम्। इयमेवास्ति सत्यत्वेन प्रतिष्ठितम् संस्कृतकवितायाम्।

८—१०. **शरशय्या** (३४९ पद्य)—

सुगतो ब्रवीति(११७पद्य), वृद्धकुमारि!(१२९ पद्य), शरशय्या (१०३ पद्य)

८. सुगतो ब्रवीति—

तालिवानैर्भगवतो बुद्धस्य बालुकाब्धौ स्थापिता प्रायेण १८०० वर्षप्राचीना गगनचुम्बिन्य प्रतिमा भुशुण्डीघातैर्विचूर्णिता इति साम्प्रतिकानां जनानां कृते न प्राचीना। तयाऽनया व्यथितः सनातनकविः सुगतो ब्रवीति इति शतकमेकं व्यरचयत्। तदिदमिदंप्रथमतया प्राकाशयत् दिल्लीतः प्राकाश्यमानं अर्वाचीनसंस्कृतसाहित्यमिति डॉ० रमाकान्तशुक्लैः प्रवर्तितं पत्रम्। सम्प्रति हिन्द्यनुवादसमेतमिदं २००२ ख्रीष्टाब्दे शरशय्यानाम्नि शतकत्रयसंग्रहे प्राकाशयत् काशीस्थं कालिदाससंस्थानम्।

शतकत्रयात्मके खण्डकाव्येऽत्र प्रथमं शतकं **'सुगतो ब्रवीति'**ति सबुद्धप्रतिमाचित्रं चकास्ति। ११७पद्यात्मकेऽस्मिन् परिदेवनाप्रधानं शतके प्रथमं पद्यमस्ति—

भगवान् सुगतो ब्रवीति कण्ठ-ध्वनिमुद्वास्य तु मौनिना स्वरेण ।
शृणुते तदिदं सनातनोऽयं वचनं तस्य महात्मनस्तदित्थम् ॥१॥

अत्र विरोधो वा असंगतिर्वाऽलंकारः ब्रवीति न च स्पृशति बैखरीमित्यत्रैकाऽसंगतिः स्वरश्च मौनावलम्बश्चेति द्वितीया अनुच्चरित—स्यापि स्वरस्य सनातनद्वारा श्रवणमिति च तृतीया। चमात्कारकारिकेय—मित्यलंकारत्वमत्रास्या नियतम्।

ध्वनिश्च मौनिना स्वरेणेच्चार्यमाणश्चेति कोऽर्थः विश्वमात्रे प्रतिजनमनुभूयमान एष स्वर इति। किमत्र प्रमाणमिति पर्यनुयोगे तूत्तरं राष्ट्राध्यक्षैर्दर्शितोऽत्र विरोधः।

बालुकाब्धौ गान्धारकलामूर्तिरूपेण बुद्धस्य संजातं किल द्वितीयं जन्म। अनेनासौ द्विजत्वमेवालभत विनाशेन च एतासां यशोवृद्धिरेव जायते क्षेत्रस्यास्य यतोहि बुद्धस्यास्ति समाना मतिः जननमरणयोः—

मम मूर्त्तय एभिरद्य नाशं गमितास्तत् परिवृद्धये मरूणाम् ।
जननं मरणं च मादृशानामभिवृद्ध्यै हि विकल्पतेऽस्तभेदम् ॥४॥

मूर्तिविध्वंसकाले विध्वंसकारिणं संबोध्य कथयति भगवान् बुद्धः स्वयमेव यत् पुरा खलु न अजायत बुद्धस्य मनसि काऽपि दुर्भावना विषप्रदानेन तस्य विनाशाय प्रवृत्तान् जनान् प्रति। अधुना खलु भुशुण्डीशतकैस्तालिवाना मूर्त्तीनां विध्वंसाय प्रवृत्ताः। अनेनापि न काऽपि हानिर्भविष्यति बुद्धस्य—

प्रथमं यदि भक्षितं विषं मन्मृतयेऽकल्पत नास्मि तत्र रुष्टः ।
अधुना मम मूर्त्तयो भुशुण्डीशतकेभ्यो यदि कल्पिताः क्व हानिः ॥५॥

सुगतोऽसौ सम्प्रत्यप्यस्ति गतिमान् मनुष्यबुद्धिगर्भे। अत एव स्थूलानां मूर्त्तीनां विनाशः न कथमपि बुद्धस्य विनाशाय कल्पते तासामपि

अधुना भुशुण्डिकाघातैः तथागतवत् जंगमत्वेन परिणमितत्वात्—

सुगतोऽस्तु तथागतोऽस्तु वाऽसौ गतिमानेष मनुष्यबुद्धिगर्भे ।
अगतित्वमनायि चेदिदानीं वपुषा मूर्त्तिमयेन का नु हानिः ।। ९ ।।

बुद्धमते क्षेत्रस्यास्य प्राक्तनशासकैः न परिकल्पिताऽसीत् हिंसा कामपि समस्यां समाधातुम्। बुद्धप्रतिमानां प्रतिष्ठा एवास्ति अत्र प्रमाणभूता। अहिंसायाः प्रतिनिधिभूतोऽसौ देवः भारते वर्षे जन्म अलभत। अभ्रंलिहाग्रा अस्य मूर्तयः विनिर्मिताः अतिदूरवर्तिनि क्षेत्रेऽस्मिन् अष्टादशशतवर्षेभ्यः पूर्वमेव। इस्लामपदाभिधेयस्य सम्प्रदायस्य यैरनुयायिभिः क्रियते एतासां विध्वंसः तेषां पैगम्बर एवनालभत जन्म ख्रीष्टाब्दस्य अष्टमशताब्द्याम्। अत एव कस्यापि धर्मविशेषस्य सम्प्रदायविशेषस्य वा समर्थकैः नोट्टंकिता एताः क्षेत्रेऽस्मिन् इति प्रमाणीभवति इतिहासेनानेन। एतासां स्थापनाया अस्ति खलु हेतुः मानवचित्तेषु निगूढा शान्तिभावनैव—

अथ कः खलु बुद्धिमानिनाय भवतां धन्वसु भारतेभ्य एभ्यः ।
न भवान् यदि पूर्वजाश्च वः, स प्रशमस्य प्रणयो हि मानवीयः ।। २१ ।।

तालिबानानां प्रवृत्तिः क्रूरतामये स्वधर्मे एवास्ति। अत एव सुगतमूर्तीर्विध्वस्य तालिबाना उपक्रान्ता गोवंशं बलीकर्तुम्, कल्पिताश्च सहस्रशो गावः बलौ। तत्र तेषां मूर्तिपूजा नानुमन्यते इस्लामेन। तालिवाना इस्लामा एव। तेषां राज्ये कतिचन मासान् सुगतमूर्त्तयस्ताः अलभन्त सत्तामिति धर्मविरोधपातकप्रशमाय प्रायश्चित्तमेव यद् गवां कल्पनमिति। तस्याऽस्य बुद्धिविपर्ययस्य परिणामं स्मरन् सनातनः कौति—

अयमस्ति विनाशितो न काले जनितो हन्त विलम्ब इत्यमुष्य ।
करवामहि गोशतानि हत्वा प्रशमं पाप्मन इत्यसौ व्यनक्ति ।। ३० ।।

सम्पूर्णमप्येतत् कुकृत्यं पश्यति तालिबानानामपि ईश्वरः। स चासौ ईश्वरः नास्ति कस्यापि सम्प्रदायविशेषस्य। विभुरसौ समेषामेव द्रष्टा रक्षकश्च। न करोत्यसौ कथमपि कमपि विभेदं सम्प्रदायमधिकृत्य।

गौरेषा समेषामेवास्ति माता यतोहि परिपालयत्येषा सर्वानपि दुग्धामृतेनात्मनः। तालिवानानामपि धर्मग्रन्थेषु मातुः महत्वमस्ति प्रतिष्ठितमेव। अत एव गोमातुः वधेनानेन क्रियते एभिरात्मनः धर्म–ग्रन्थानामेवोल्लंघनम्। अथ सनातनस्तालिवानानभ्यशपत् कृतगोवंशवधान्—

प्रथमं सुगतस्य मूर्त्तिभङ्गः सुरभीणां च ततो वधातिरेकः ।
यवन! त्वयकाऽद्य यद्यकारि तदिमं स्वं प्रतिपद्यसे विनाशम् ।। ३१ ।।

सेयमृतम्भरा वाक् सनातनकवेः। तालिवाना इमे मरुभूमिषु मासाभ्यन्तर एव विलिल्यिरे। मार्चमासमारभ्य नवम्बरं यावत् प्रवृत्त एष तालिवानानामातंकः कथास्वाशिष्यत। पुनरप्यभ्युदीरितः शापः एष कविना—

क्षपितो यदि रक्तबीजनामाप्यसुरोऽक्षय्यतया प्रवर्धमानः ।
असकावपि नूनमेव नाशं व्रजिता वह्निरिवाऽद्मरो निरन्नः ।।११४।।

कविरत्र समुद्घोषयति यत् निरन्तरं विवर्धमानो रक्तबीज इति नाम्ना प्रसिद्धो राक्षसः यथा विनाशमलभत, यथा खलु वह्निः निरन्नः सन् शान्तिमाप्नोति तथैव शासनस्यास्य अवश्यमेव सद्य एव मूलोच्छेदनं भविष्यतीति।

एवं सुगतो ब्रवीती—ति काव्यं तत्सुकवेर्मानवेतिहासदर्शनमेव पौनःपुन्येन परावर्त्तमानम्।

तालिवाना इस्लामिन इति मूर्त्तिषु न प्रतियन्तीत्यत्र तान् सनातनः पृच्छति मूर्तिर्नाम हृदये विद्यमानस्याकारस्य बहीरूपता काचन। बहीरूपिणि प्रतिबिम्बे यदि धर्मशासनस्याननुज्ञता तर्हि मानसे तस्य बिम्बेऽपि सा कृतप्रसरेति सा पूर्वमत्रभवद्भिर्विशसनीयेति किन्तु नास्ति तत्र वशः।

यवनानां परमेश्वरो हस्ते घनमेकमादधानो व्योम्नि क्वचन निलीय तिष्ठति। तत्र प्रश्नः यदि परमेश्वरो निराकारस्तर्हि घनमेष

किंगतेन पाणिना दधाति सनातनस्योक्तिः—

हृदये यमसौ भवान् दधाति परमं कञ्चन सर्वशक्तमीशम् ।
ननु तस्य शरीरमस्ति नो वा स शरीरी नहि चेदसिं क्व धत्ते ।। ६८।।

अथ द्वितीयः प्रश्नः—

असिना खलु यच्छिनत्ति तस्य निखिलस्यास्य चरस्य वाऽचरस्य ।
रचना विहतास्ति केन कैर्वा द्रविणैः कुत्र तले च कस्य हेतोः ।।७०।।

अथ तृतीयः प्रश्नः—

स्वयमेष तनुं बिभर्षि यां वै यदि साप्यस्ति फलं तवैव पित्रोः ।
पितरौ ननु केन वा पथा त्वां खलु सम्प्रापतुरत्र किं ब्रवीषि ।। ७१ ।।

अथ प्रहारः—

मिथुनस्य तु या क्रिया रसो वा न भवाँस्तत्र न वेदिताऽस्ति, किन्तु ।
रसमेतमुदस्य खड्गहस्तो जगतीमद्य हिनस्सि बर्करीं नु ।।७२।।

अत एव तालिवाना अपि मूर्तिपूजायां बद्धविश्वासाः, किन्तु निभृतम्। विश्वासोऽसौ परिलक्ष्यते तेषां भक्तौ आत्मनः पूर्वजानधिकृत्य जायमानायाम्।

स्वमिदम् इदं च परकीयमिति यो भेदः सनातनः पृच्छति किं तत्रापि भेदिका कापि भित्तिका वर्त्तते किं यदि नास्ति तर्हि भेदो मतेर्विवर्त एव सेयमात्मन्येव परत्वप्रतिपत्तिः—

स्वपर-द्वितयेऽस्ति कापि किंवा परता-साधन-रेखिकाऽत्र भूमौ ।
यदि नास्ति स वै मतेर्विवर्त्तः परतामात्मनि वीक्ष्य निर्वृतायाः ।। ७५।।

यवना शवं गर्ते निखनन्ति। तत्र सनातनः पृच्छति एकस्य शवस्य कृते एक एव गर्त इति कृत्वा सम्पूर्णमपि भूमितलं शवगर्तायेत ततश्च क्व नु निवत्स्यत्यन्तिमो यवन इति—

शवगर्त्ततयैव चेत् समग्रा
धरणिः संपरिकल्पिता भवित्री ।

क्व नु रे भविता तवैव वासः
श्वसतो हन्त धरातलेऽखिलेऽस्मिन् ।।८५।।

मानवो मानव एवास्ति न गगनचारी खगः नापि च बिलेशयः सर्पः। गतोसोस्ते सक्थिचयोऽपि भूमीमिमां दूषयेतैव यदि भवति स दोषदिग्धः—

त्वमहो न खगोऽसि नापि सर्पः, त्वमहो भूमिचरोऽसि मानवात्मा ।
तव सक्थिचयोऽपि भूमिमेतां शवगर्त्ते शयितस्य दूषयेत ।।८६।।

परहिंसा प्रणयाभावस्यैव फलम्। परस्मिन् प्रणयो जागर्ति चेत् कृतं प्रलयचिन्तया। सनातनो ब्रूते—

प्रणयं यदि चेद् भवान् पिपर्त्ति प्रलयं किन्नु बिभर्षि मानवानाम् ।
प्रणयप्रलयो विरुद्धवृत्ती समकालं सह तिष्ठतः क्व भूमौ ।।९४।।

योऽयं मनुष्यलोके पारस्परिकः कलहस्तत्र कारणं परस्य गृहे दृष्टिः। सनातनस्तत्रैव प्रहरति एवम्—

परधामनि या परस्य दृष्टि—स्तत एवास्ति जगत् सचिन्तमद्य ।
निजमेव गृहं त्वमीक्षसे चेत् तव सन्तापयिता क्व वोदयेत ।।१००।।

लिप्सां गृध्नुतां च समाक्षिपतः सनातनस्येमे शब्दाः सम्पूर्णायामपीलायां कुत्र वा न भवन्ति जपनीयाः—

यदि भूमिरियं, विभूतिरस्या महतीयं प्रभुता च तेन तुष्ट्यै ।
कियदायुरहो भवान् ययातिर्भवतु स्यादथवा त्रिशङ्कुरेव ।।१०३।।

क्व गतः स तवादमः स हौवा
क्व च मोहम्महसाहिबः क्व यीशुः ।
क्व नु सन्ति च रामकृष्णबुद्धा
भवसि त्वं च तथा न किं गतायुः ।।१०४।।

परिभुज्य समस्तमेव विश्वं निखिलं चास्य हिरण्यकोषमेव कथमिव परितृप्तिं न लभत इति विस्मयेन निगीर्णचित्तः सनातनः

कवयति–

अयि किं धरणीं हिरण्मयीं त्वं कशिपौ हन्त हिरण्मये शयानः ।
करणैः परिभुज्य पामरत्वं गमितैरद्य, कथं पुनः सतृष्णः ।।१०५।।

अथास्य सप्रणयो विनयः सविनयः प्रणयो वा–

प्रतिवेशिवधेषु साक्षिभावं प्रतिवेशी हि दधाति सत्यनिष्ठः ।
अचरस्य जडस्य वाभियुक्तौ प्रतिवेशी चर एव चेतनो वा ।।११२।।
यदि सोऽपि जहाति नैव मौनं निभृतं पश्यति केवलं स पापम् ।
करुणां प्रकृतिः करिष्यति त्वय्यथवा कश्चन पूरुषस्तदीशः ।।११३।।

कवेरयं सम्प्रत्ययो यद् यदा पापस्य प्रतीकाराय कश्चिदप्यन्यो नोत्तिष्ठति तर्हि तदीयात् हृदयकोषान्निसृता सुधामयी भगवती कवितैव करिष्यति प्रतीकारमिति–

कविता करवालपाणिरेषा जननी कापि भवत्यहो नृकाली ।
इयमेव च भद्रकालिकात्वं दधती संप्रचकास्ति भूमिलोके ।।११५।।

भावानिमानन्यत्रापि निबध्नाति कविरेषः। तथाहि स्वातन्त्र्य–सम्भवनाम्नि स्वकीये पञ्चसप्तति–सर्गात्मके सर्गबन्धे करुणकरुण–मुद्गिरति एष कालस्य कुक्षौ यदि रावणो विलीनस्तर्हि रामोऽपि न न विलीनः एवमेव हि यदि कंसस्तर्हि कृष्णोऽपि, यदि दुर्योधनः तर्हि युधिष्ठिरोऽपि। कालः खलु दोषगुणौ न गृणीते भक्षयति च निर्विशेषं सर्वान्–

यातो हन्त मुहम्मदोऽपि भगवान् कालस्य कुक्षौ लयं
यस्यान्तःकरणे पदं न विदधे स्वप्नेऽपि हन्तच्छलम् ।
यः शस्त्राय मनश्चकार यदि तद् धर्मस्य हेतोरतो
योऽभूत् कोऽपि युधिष्ठिरः शुभमतिर्भूयो धरित्रीमितः ।।१४.६८।।

यातो हन्त युधिष्ठिरोऽपि धृतिमान् धर्मे नितान्तं क्षयं
नो दुर्योधन एव शाश्वतिकतां दध्रेऽनुजातैः समम् ।
रामो रावणवद् विहाय वसुधां यातो हि कृष्णो यथा
कंसः संप्रति शिष्ट एष कवितामात्रेऽत्र को वा स्थिरः ।।१४.६९।।
भुञ्जानस्य निरन्तरं वद कदा वैश्वानरः शाम्यति
प्रेक्षावँस्तव तृप्तिरेव कियतः स्थात्री क्षणानेषका ।
यत्त्वं पस्त्यमिव प्रियं प्रियतरं प्रेष्ठं च सृष्टेः परं
रत्नं हन्त निहत्य वाञ्छसि धरां भोक्तुं जडामेकलः ।।१४.७१।।

अथ स्मरति सोमनाथमन्दिरध्वंसिनं यवनलुण्टाकं कविः—

यः सोमेश्वररत्नमन्दिरमिलापृष्ठे समग्रेऽयलं—
कारत्वं दधदद्भुतं व्यरुजदाः सोऽयं क्व वा दस्युराट् ।
उन्मादप्रभवेषु हन्त विभवेष्वासक्तिभाजः समे
दिग्पालाः शृणुथोत्तरं च ददथ प्रीतिर्जडे किंफला ।।१४.७२।।

अथ विश्वातिशयेनापि परिवृता निशीथं निद्रा न भजन्ते तेष्वपि दृष्टिं पातयति सनातनः पृच्छति च—

रे रे मीलितलोचनाः प्रतिमुखं पश्चादिमे धावितुं
व्यग्राः स्वर्णमयीं महार्हकशिपुं प्राप्यापि किं जाग्रथ ।
किं निद्रां न लभध्व एत उदितैश्वर्याः स्वकण्डूयन—
प्रत्यग्रीकरणोद्यता वदथ का क्लिश्नाति वै वो रुजा ।।१४.७३।।

सनातनस्य काव्येषु इत्थं संदृश्यन्ते सौगताः उद्गाराः परिगुम्फिताः। कविरसौ निन्दति बुद्धस्य प्रतिमायाः विनाशकान् तारस्वरेण। तन्मते नासीदेष प्रहारः कस्मिन्नपि सम्प्रदायविशेष अपितु सम्पूर्णेऽपि विश्वस्मिन् विश्वे व्याप्ताया अहिंसाया प्रवृत्तेः

समुन्मूलनस्यासीदेष कुप्रयासः। मूर्तीनां विध्वंसे साफलीं लभमाना एते सर्वेऽपि स्वयमेव पञ्चत्वमलभन्त सद्य एव। धरातलेऽस्मिन् विद्यमानैः सर्वैरपि मानवताया विश्वशान्तेश्च सम्पूजकैः एतेषां विनाशाय प्रभुरहर्निशं प्रार्थितः। सम्प्रत्यपि सन्तिष्ठते बाहुल्यं विश्वस्मिन् विश्वे शान्तेर्पूजकानामित्यनेन सम्पूर्णेनापि वृत्तान्तेन सिद्धम्।

९. वृद्धकुमारि!

१२९पद्यात्मकं खण्डकाव्यमेतद् विरचितमस्ति मुगलशाहजादी–नामविवाहितं जीवनमधिकृत्य। सर्वा अप्येता आसन् अनिन्द्यरूपेण रूपवत्यः। नोपयेमिरे एता मुगलकन्यकाः सौन्दर्यवत्योऽपि कमपि युवानम्। प्राकृतिकं मृत्युमवाप्तवतीभिः स्वसौन्दर्यस्य अहंकारेण कवलितविग्रहाभिरेताभिः कविरसौ करोति प्रश्नं यद् विधात्रा सौन्दर्यं यत् सातत्याय आसीत् प्रदत्तं तदेताभिः केन प्रयोजनेन तिरस्कृतम्–

अयि मानवदेहवल्लरि! त्वं प्रसृता च प्रथिता च पुष्पिता च ।
त्वयि किन्तु कुतोऽपि दिग्विभागान्निपतत्यत्र मधुव्रतो न कस्मात् ।।१५।।

कमपि पुरुषमस्वीकुर्वतीभिरेताभिः स्वकीयं सौन्दर्यं व्यर्थीकृतम्। तत्र हेतुरस्ति सौन्दर्यान्विततायाः शारीरिक्याः अतिशयसौन्दर्यसम्पन्नताया अहंकार एव –

त्वयि लब्धतनुः क एव लाभो न हि यं संवरयांचकार कोऽपि ।।

कविरत्र अनेकान् अनुकूलान् तर्कानुपस्थापयति कामदेवस्य अस्तित्वं सार्थकं प्रमाणयितुम्। विश्वबीजप्ररोहाय च संरक्षणाय तद् ब्रह्मणा यत् प्रदत्तं वर्तते सामर्थ्यं जनेभ्यः तस्य तिरस्कारो वस्तुतः सृष्टेरेवास्ति तिरस्कृतिः। भगवतः सामर्थ्यम् अस्माभिरवश्वमेव सत्करणीयं स्वसामर्थ्यं विस्तारयितुम्। तेनैव भविष्यति लोकस्य रक्षा।

१०. शरशय्या—

१०३पद्यात्मकं खण्डकाव्यमेतत् भीष्मपितामहस्य जीवनमाश्रित्य उपनिबद्धमस्ति महाकविना। आसीदसौ कौरवाणां पाण्डवानां च पितामहः यस्मिन्नासीद् यद्यपि अपूर्वं दैविकं सामर्थ्यं तथापि न समर्थोऽभूत् वैनाशिकं कुलोन्मूलकञ्च रक्तपातं निरोद्धुमुभयोरपि कुरुवंशावतंसयोर्मध्ये। युद्धमेतत् प्रभुत्वाय आसीत् प्रवर्तितं कौरवैः।

दुर्योधनस्य तत्समर्थकानां दुर्नीतिरप्रत्यक्षरूपेणासीदनेन समर्थिता। भीष्मः शरशय्यामेव शयान आसीत् आजन्मनः। अस्य सर्वेऽपि ज्येष्ठभ्रातरः मुत्युमुखं प्राविशन् अस्य जन्मनः पूर्वमेव। असौ नोपयेमे स्वराज्यस्य उत्तराधिकारिणां संरक्षणाय। आत्मनः कृतज्ञतां संरक्षितुमसौ दुर्योधनस्य अनीतिपूर्णं व्यवहारं क्वचिदपि न रुरोध। अमरोऽप्यसौ मृत्युं वृणीते सम्पूर्णामपि धरां अनीत्या आक्रान्तां दृष्ट्वा —

किं वा बभूव मम लिप्सितमत्र लोके
किं वा ममाभवदिहान्तिक उत्तमं नो ।
अम्बा शशाप यदि मां स विचित्रवीर्य—
गार्हस्थ्यसिद्धिजनितो ननु कोऽपि दोषः ।।५।।

नो केवलेऽत्र विषमे क्षण एव मह्यं
शय्यां शरस्य रचयध्व इमे मदर्थम् ।
युष्माभिरत्र गमितः क्व नु कालखण्डे
शय्यां शरैर्विरचितां न विचित्ररूपैः ।।७।।

११—१३. अमेरिका (३२१ पद्य)— **अमेरीका(२४६पद्य), एतत्तु याचामहे(५५पद्य), विधेर्होमो निषेधानले(२० पद्य),**

११. अमेरिका—

'अमेरिका' इति शीर्षकेण प्रकाशिते संस्कृतकाव्ये त्रीणि काव्यानि प्रकाशितानि सन्ति। एतेषु प्रथममस्ति २४६पद्यात्मकम् **'अमेरिका'** नाम्ना प्रसिद्धं वर्णनाकाव्यम्। अस्मिन् महाकविना २००९वर्षे सम्पन्नायाः स्वकीयायाः अमेरिकायात्रायाः सम्पूर्णोऽपि अनुभवः काव्यमुखेनास्ति उपवर्णितः। अत्रास्ति परिगुम्फिता अमेरिकाराष्ट्रस्य सम्पूर्णमपि प्राकृतिकं भौतिकञ्च वैभवं तत्रत्या जनानां प्रकृतिः, व्यवहारः, संस्काराः, प्रवृत्तिः, जीवनवृत्तम्, संस्कृतिकं रिक्थम्, शारीरिकं स्वरूपम्, वैज्ञानिकी प्रागतिः, स्वतन्त्रकामचारः, अभूतपूर्वा भौतिकी व्यवस्था एवमादयः विषयाः सूक्ष्मेक्षिकया।

हार्वर्डविश्वविद्यालयेन निगीर्णस्य भोजदेवस्य 'शृङ्गारप्रकाश' इति नाम्ना प्रसिद्धस्य विश्वकोषात्मकस्य साहित्यशास्त्रग्रन्थस्य सम्पूर्णाऽपि कथा कविना अस्त्युपनिबद्धा। राघवन्महाभागैः संशोधितोऽसौ ग्रन्थः इदानीमपि प्रतीक्षते हावर्डतः पूर्णं प्रकाशनम् संशोधनपूर्वकम्। स एष महान् ग्रन्थः संशोध्य आचार्यद्विवेदिभिः प्रकाशितः सम्प्रति समुपलभ्यते सम्पूर्णेऽपि विश्वे सुरभारतीसमुपासकेभ्यः।

लासवेगासनगरे व्याप्तस्य भौतिकवैभवस्य द्यूतक्रीडादीनामस्ति काव्येऽस्मिन् प्रत्यक्षवद् वर्णनम् बोस्टन, लासएञ्जिल्स, कैलिफोर्निया, एक्टन नाम्ना प्रसिद्धेषु नगरेषु व्याप्तायाः सश्रीकतायाः विस्तृतं वर्णनमत्र प्रत्यक्षवदाभाति—

अस्या ये वै जनास्तेषां गौरत्वे चन्द्रवर्णता ।
कृष्णत्वे तु करालत्वं कालायसमलीमसम् ।। ९।।
व्याहरन्ति स्मितास्या हि बाला वृद्धाः परस्परम् ।
युवत्यो युवकाश्चापि चुम्बन्तोऽन्यं गतत्रपम् ।।१८।।

सिकोवियानामकस्य विपुलकायस्य वृक्षविशेषस्य तद्वैशिष्ट्य—

प्रकाशनपूर्वकं स्वरूपं कविरत्र प्रस्तौति एवम्—

मध्य एव च वनं सिकोविया—नामकं महति पर्वते स्थितम् ।
यत्र सन्ति विपुलोच्छ्रया द्रुमा विस्तृतावपि च दीर्घिमन्यपि ।।११४।।

अत्रत्यानां मार्गाणां विशदता, सुरम्यता एतेषु पथिकानां कृते सर्वसौविध्यभाजनतां विषयीकरोति कविरत्र एवम् —

मार्गाः सर्व इमे लसन्ति मसृणा वाटीवितानादिभिः
श्यामश्यामरुचश्च हन्त नगरे मार्गेषु चोच्छ्रायिताः ।
या चैषां ननु मूलगास्ति धरणिस्तत्रापि चित्रा लताः
सम्यग् विस्तृतिमापिता न खलु भूरल्पापि तै रिच्यते ।।१३५।।
विद्युद् वारि सदूरभाषसुविधं गेहं यथा सौलभी—
माप्तं यानशतं नु हट्टकशतं द्रव्योत्तमैः पूरितम् ।
यस्मिन् भूमितले मनुष्यवपुषे देवाय सन्तर्पणा—
मेतानि प्रथयन्ति किं ननु ततो नाकेऽधिकं लभ्यताम् ।।१३६।।

अत्र नास्ति कोऽपि गोत्रादिभिर्जायमानः सानातनीयो भेदः। सर्वेऽप्यत्र उन्मुक्ताः दृश्यन्ते कामोपभोगप्रवृत्तौ। वर्णसाङ्कर्यान्न सन्त्येते भीताः।

गोत्रं यत्र न वर्त्तते कुलकृतस्तन्तुश्च विच्छिद्यते
साङ्कर्येऽप्यनवद्यतामनुगुणां पश्यन्ति नारीनराः ।
तत्रास्मिन् वसुधातले परिणती द्वे केवले पुंस्वपि
प्रेक्ष्येते प्रथमा जनिर्मृतिरथो तस्या द्वितीया प्रसूः ।। २३७।।

अन्यान्यासन् बहूनि पद्यानि कविना विरचितानि अमेरिकाविषये किन्तु तानि न प्रकाशितानि कविना छिद्रान्वेषणप्रवृत्तिविमुखतया—

अन्यानि सन्ति सुबहूनि विनिर्मितानि
पद्यानि किन्तु नहि तानि पुरस्करोमि ।
वैदेशिकेष्वपि भवामि धृतादरोऽहं
छिद्राण्यतो न विवरीतुमलं भवामि ।। २४६।।

१२. एतत्तु याचामहे—

एतस्मिन् संग्रहे द्वितीयं काव्यमस्ति ५५पद्यात्मकम् **'एतत्तु याचामहे'** इति। अत्र कविः भगवतीं सरस्वतीं याचते यत् सा परित्यज्य हंसासनं मयूरासनं भजेत। सम्प्रति समुपस्थितोऽस्ति विषमः क्षणः यत्र सर्वत्रैव विषधराः विचरन्ति येषां विनाशाय भगवत्याः मयूर एवास्ति क्षमः, न पुनः हंसः। स हि नीरक्षीरविवेचनविधौ समर्थः—

वीणावादिनि! शारदे! श्रितमहाहंसे! ललाटाजिरे
दीव्यच्चन्द्रकले! भजस्व शिखिनं त्यक्त्वाऽद्य हंसं प्रियम् ।
सम्प्रत्यस्ति वसुन्धरातलमिदं संछादितं स्वे मुखे
क्ष्वेडेनाग्निकरालितेन कलितैः काकोदरैः सर्व्वतः ।।१।।
एतस्मिन् विषमे क्षणे सितगरुन्! नैवास्ति कार्यं मनाग-
प्येतस्य तवार्य! दुग्धजलयोर्विश्लेषणाख्यं क्षमम् ।
पीत्वा दुग्धमिमेऽखिलं विषधरा आकाशमध्येऽनिशं
सर्पन्तो विहरन्ति हन्त रशनायुग्मं धुनानाश् चलम् ।। २।।

आतङ्कवादेन कषायितेऽस्मिन् क्षणे सर्वत्रैव दन्दशूकाः सम्राजन्ति। ऐताषां विनाशाय भगवत्याः शिखी अत्यन्तं समर्थः प्रतिभाति कवये। इदानीम् आतंकवादविषेण दह्यमाना संदृश्यते सम्पूर्णापि मही। यत्र सरस्वत्या आसीत् साक्षान्निवास एव तस्मिन् कश्मीराख्ये शारदादेशे सम्प्रति आतङ्वादिनां भुशुण्डिकानां घोषैः भृशमापूरिता दृश्यन्ते दिशः। सम्प्रति प्राप्ताधिकाराः जनाः धर्मदृष्टिं परित्यज्य उत्कोचोन्मुखिनः दृश्यन्ते ।

शिक्षिताशिक्षितानां मध्ये वैषम्यस्य लवोऽपि न दृश्यते। सर्वशास्त्रज्ञाः विद्वांसः कालाक्षरिणो नेतारश्च समतामेव भजन्ते साम्प्रतिके समाजे —

को वा वक्ति समानतायुगमिदं सर्वे समाः साम्प्रतं
वैषम्यस्य लवोऽपि न क्वचिदपि प्रोद्वीक्ष्यतेऽस्मिन् युगे ।
वैदुष्यं महदादधद् द्विजकुलोद्भूतश्च, कालाक्षरो
नेता चेति युगेऽद्य चेत् समतमौ वैषम्यमन्यन्नु किम् ।। ३९ ।।

जात्या: नास्ति साम्प्रतं महत्वलेशोऽपि, बिबुधताऽपि खपुष्पायते, चारित्र्यं धूमकलुषं प्रतिभाति, सावित्रीजपनकर्मणि प्रवृत्ता: लज्जाहीना: प्रतिभान्ति। सदाचारस्य मार्गमुत्क्रम्य लक्ष्मीं सेवन्ते जना: प्रतिष्ठां सुखञ्च प्राप्नुवन्ति—

जातिर्यातु रसातलं विबुधता भूयात् खपुष्पस्वसा
चारित्र्यं शुभमस्तु धूमकलुषं निर्वाणदीपे शिवः ।
सावित्रीमिति ये जपन्ति सततं निर्लज्जमेवाधुना
सर्वत्रैव भवन्ति ते हि सुखिनो लक्ष्मीभिरालिङ्गिताः ।। ४१ ।।

१३. विधेर्होमो निषेधानले

११सितम्बर २०११ दिवसे विश्वव्यापारकेन्द्रस्य ध्वंसनसमये महाकवय: तत्रैवासन्। तालिवानै: कृतेनानेन महता विध्वंसेन उद्विग्न: कवि: 'विधेर्होमो निषेधानले' इति शीर्षकेण विंशतिपद्यात्मिकां कवितां तत्रैव व्यरचयत्। विधिरस्त्यत्र अमेरिकाराष्ट्रस्य विकासोन्मुखी प्रवृत्ति: निषेधानलोऽस्ति तस्योन्मूलनाय प्रवृत्ता आतङ्कवादैकाश्रितवतां तालिवानशासकानां विध्वंसात्मिका प्रवृत्ति:। अमेरिकाराष्ट्रस्य उन्नते: प्रतिनिधिभूतमेतत् केन्द्रं विनाशमगात् क्षणमात्रेणैव —

यद् वै मानवहातनोपनगरे/किञ्चन मैनहाटनगतं
पुंजातिकीर्त्तिध्वजप्रख्यातं व्यवसायकेन्द्रभवनद्वयं
कृतं भस्मसात् ।

(प्रश्नः) अस्यार्थः खलु कः?
(उत्तरम्) स एष सुमहान्
निर्माणकाये विनाशस्याघात
उतास्ति कश्चन विधेर् होमो निषेधानले ।। ३।।
तेनैवाद्य हहाऽर्द्धलक्षगणनातीतैर्नरैः पूरितं
सद्मद्वन्द्वमिदं करालहृदयेनेत्थं प्रदग्धीकृतम् ।
येनेन्दीवरकाननेऽस्ति दहनैरङ्गारकैर्वर्षितं
सस्याङ्कूरनिरन्तरेषु च दृढक्षेत्रेषु दुद्रूषितम् ।। ७।।
पित्रोर्येन वियोजिता शिशुशती दुग्धानना वल्लभा-
साहस्त्रीव कषायिता प्रणयिनां प्रीत्या क्षणार्द्धेन वै ।
तेनाश्रूणि समुद्रपूरण—लसद्वेगानि मुञ्चत्स्वहो
नृणामेव कुलेषु धिक् किमधुना नो दृक्तटी धीयते ।। ९।।

१४—१६. रामपरिसंख्या—

रामपरिसंख्या (२२१पद्य), **अहमस्म्यहमेव** (२०२पद्य), **अयि शकुन्तिके!/ अयि शकुन्तले!** (१२४पद्य)

'रामपरिसंख्या' इति शीर्षकेण प्रकाशिते खण्डकाव्ये सनातनकवेः त्रीणि काव्यानि संगृहीतानि सन्ति। एतेषु प्रथममस्ति **'रामपरिसंख्या'** द्वितीयमस्ति **'अहमस्म्यहमेव'** तृतीयमस्ति **'अयि शकुन्तिके!/अयि शकुन्तले!'**

१४. रामपरिसंख्या—

२२१पद्यात्मके **रामपरिसंख्या**काव्ये परिसंख्यामुखेन कविः साम्प्रतिकं वैपरीत्यम् उपनिबध्नाति। काव्यस्य आदौ 'सनातनकविता' शीर्षकेण कविः काव्यविषयकं स्वकीयं मन्तव्यं प्रस्तौति दशपद्यात्मकं—

कविता न सनातनस्य काचिन्मधुवल्ली मदनाय मद्यसूतिः ।
ननु साऽस्ति शिवप्रियाङ्गयष्टिस्त्रिदला काऽप्यमृताङ्गविल्वपत्री ।।१।।

कविरत्र पृच्छति साम्प्रतिकान् सामाजिकान् — रामः कस्य? रामः सात्विकवृत्तिमादधतां, धर्ममात्राध्वनीनानां, परम्परानुसारिणां, सत्यव्रतिनां सनातनमतावलम्बिनां नायकः।

रामः कस्य!
न तस्य, यस्य हृदयं लङ्कापतेः कौशले श्रद्धत्ते, तिमिराणि
योऽर्चिचिषति प्रातर्निशावल्लभः।
वाल्मीकेर्न सरस्वती प्रसरति प्रौढाऽप्यरण्यौकसा—
मुद्गीथेषु निवासिनी ननु कृते त्वेषां निषादात्मनाम् ।।१।।

राष्ट्रस्य धनं अनीत्या अपहृत्य स्वगृहेषु विलसन्तश्चौराः रामोपासका न सन्ति।

रामः कस्य!
न तस्य यस्य भवने चौर्यार्जितं वैभवं
धर्मिष्ठान् परिचेखिदीति गृहिणो नीवारमुष्टिम्पचान् ।
एके ये धृराष्ट्रतामुपगता रामो न तेषां, स वै
भूत्वा काल उपादधाति विषमामेभ्यः करालां क्रियाम् ।। २।।

रामस्य संकल्पेन लङ्का न क्षपिता सा च क्षपितासीत् सतीनां दृढसंकल्पेन। सीतां संबोध्य वायुपुत्रेण उद्गीता शब्दरूपिणी रामकथा पूर्वं प्रविशति लङ्कायां तदनन्तरं प्रविशति तदर्थप्रतिरूपः रामः रावणमुन्मूलयितुम्—

लङ्का न क्षपिता मया, क्षपयिता तस्याः सतीनां दृढः
संकल्पोत्तम एव, यस्य हरणे भग्नाः समे रावणाः ।
लङ्कायाः क्षपणे कृती स हनुमान् सुग्रीवसम्प्रेषितो
यः काव्यं प्रणिनाय मां च दयितापर्श्वे समास्थापयत् ।।१०।।

शिंशपावृक्षोऽत्र संजात: रामकथामुद्‌गातुं प्रवृत्ताय हनूमते पीठम्—

सा काचिन्ननु शिंशपा क्षितवती लङ्कामदाद् या निजां
छायां मेचकिनीं स्वतो जनकजाशान्त्यै, बभूवोच्चकै: ।
पीठं या किल रावणस्य भुवने रामायणीं संकथा—
मुद्‌गातुं पवनात्मजाय महते व्यासाय मातेव न: ।।११।।

त्रिजटाया: सत्यम्भरा प्रातिभी शक्ति: रावणस्य विनाशाय हेतुत्वं भजते—**लङ्कां स्वर्णमयीं न हि क्षपयते रामो, न वा लक्ष्मण:**
सुग्रीवेण समं, समं हनुमता चापेन बाणेन वा ।
तामेतां त्रिजटेति नाम दधती सत्यम्भरा प्रातिभी
शक्ति: काचन माङ्गलिक्यसुभगा जर्हर्त्ति वारां निधे: ।।१३।।

सनातनपरम्परां संरक्षितुं सन्नद्धानां राष्ट्रस्यास्य रामभक्तानां रुधिरे निवसति राम:—

रामो वक्ति न मेऽस्ति वासभवनं सौधं, न वाट्टालिका,
भक्तानां रुधिरं तु केवलमहं वासीकरोम्यञ्जसा ।
तीर्थत्वेन, सभाजयामि रुधिरं भक्तोत्तमानां चिते:
स्पर्शात् कोष्णमथोत्तरङ्गमसमोल्लासोद्‌धुरं चापि यत् ।।८।।

सम्प्रति रावणस्य विनाश एव रामस्य अपराधरूपेण जनै: परिकल्प्यते। भगवत्या: संरक्षणाय राक्षसकुलस्य विनाश: भौतिकसुख— प्राप्त्यर्थमेव रामेण परिकल्पित:। इदमेवास्ति वैपरीत्यं सम्प्रति सर्वत्र प्रधानतया व्याप्तम्।

इदानीं मनुष्या: वानरा: संजाता: उत्कृत्य फलवतीं वल्लरीं प्रवृत्ता: विनाशाय—

वल्लरीं फलवतीं दलशोभामेचकां क्षपयते प्रसभं य: ।
वानरो भवतु सोऽवनिपृष्ठे, मानवो न, करुणैकधन: स: ।।१३३।।

इदानीं रामः रोदिति यतोहि असौ सम्प्रति स्वजन्मभूमेः संरक्षणाय निःसहाय एव संजातः तद्भक्तानां दैन्यातिरेकेण परिकल्पितत्वात्—

यद्वा स्वयं रोदिति राम एष य एव पत्न्यै प्रणनाश लङ्काम् ।
स एव मातुर्निजमातृभूमेस्त्राणेऽद्य धिग्धिग् विहितोऽसहायः ।। २०३।।

सम्प्रति रामस्य सहायको दनुवंशजः विभीषणोऽपि रामशत्रुत्वं प्रतिपद्यते लक्ष्मणोऽपि च तथैव—

स शेषसंज्ञस्य महाविषस्य नागस्य कुत्राऽद्य गतोऽवतारः ।
स एव जातोऽद्य विभीषणः किं रामानुजः सन्नपि रामशत्रुः ।। २०४।।

सम्प्रति भरतोऽपि नासीदुपस्थितः येन चिकीर्षितं स्वबाणस्याग्रे हनुमन्तं संस्थाप्य लङ्कां प्रति क्षणमात्रेणैव सम्प्रेषणं स्वानुजस्य लक्ष्मणस्य संजीवनाय—

स कुत्र यातो भरतो य ऐच्छत् सपर्वतं वायुसुतं शराग्रे ।
निवेश्य संप्रेषयितुं क्षणेन संजीवनायाऽनुजलक्ष्मणस्य ।। २०५।।

बर्बरेण आक्रान्ता कौशल्यारूपिणी रामजन्मभूमिरिदानीं बाष्पेनाक्रान्ता प्रतिभाति। तत्संरक्षणाय कोऽपि इदानीं न प्रवृत्तो दृश्यते—

कौसल्यया राघवजन्मभूमिस्वरूपया संप्रति बर्बरेण ।
हतात्मया नेत्रजलं यदेतद् विमुच्यते कोऽत्र नु विश्वनाथः ।। २०७।।

सम्प्रति वैपरीत्यमेतत् सर्वत्रैव व्याप्तं दृश्यते यतोहि —

अहो छलं धर्मति धर्म एवच्छलायमानश्च विभाव्यतेऽद्य ।
विपर्य्ययो राजति सैकतं हि साकेतति क्वाद्य रसः सरय्वाः ।। २१७।।

१५. अहमस्म्यहमेव—

'अहमस्म्यहमेव' इत्यस्मिन् द्वितीये खण्डकाव्ये २०२पद्यानि सन्ति। सनातनकविः मनुष्यस्य साम्प्रतिकं स्वरूपं वर्णयति सांकेतिकेन

विधिना। कविरत्र उपक्रमते एवम् —

अहमस्म्यहमेव केवलो वै सविधे मे न हि विद्यते द्वितीयः।
कृपणाऽस्ति न चित्कला मदीया जगदेतत् कृपणायतां प्रकामम्।।१।।

अर्थस्यास्ति साम्राज्यं सर्वत्र प्रधानभूतम्। साम्प्रतिकानां जनानां मतिं, शरीरम्, भोजनम्, चरित्रम्, परम्परादीनां विनाशञ्च न पश्यन्ति जनाः अहर्निशम् अर्थलाभाय प्रवृत्ताः। सिंहाः संरब्धा नोपलभ्यन्ते वनेषु। इदानीं आत्तवेगास्ते अटन्ति सुखेनैव पुरेष्वेव नररूपेण—

वन एव यदि व्रजामि, तत्र यदि सिंहा न भवेयुरात्तवेगाः ।
ननु सम्प्रति हिंसकास्त एते नरतामाप्य पुरेष्वटन्ति सौख्यात्।।१३३।।

१६— अयि शकुन्तिके/अयि शकुन्तले—

'अयि शकुन्तिके'/अयि शकुन्तले' इत्यत्र १२४पद्यात्मके काव्ये कविः शकुन्तलायाः कण्टकाकीर्णं जीवनमुपवर्णयति। शकुन्तलया सम्पूर्णेऽपि जीवने नानुभूतं सौख्यं कथमपि। मेनका, विश्वामित्रः, कण्वमहर्षिः, कृष्णशारः, गौतमी, अनुसूया, प्रियम्वदा, दीर्घापाङ्ग— मृगपोतकः, शापप्रदाता दुर्वासा, अंगुलीयकभक्षणकर्ता रोहितमत्स्य एते सर्वेऽपि पश्यन्तोऽपि कण्टकाकीर्णां त्वां न रक्षणाय प्रवर्तन्ते। कविः कथयति—

परितापप्रिय एष कवीन्द्रो यदिवा प्रणयिजनेषु ।
निबबन्ध त्वयि कथां प्रकरुणां हन्त हन्त निर्व्यथकाम् ।।४८।।

अस्ति महाकवेरुद्घोषः यत् कालिदासः सामाजिकानां परितापाय शकुन्तलायाः सम्पूर्णमपि वृत्तान्तम् उपवर्णयति न पुनः संतोषाय।

१७. अवदानलतिका (अप्रकाशिता)

१८. अयि नीलनदि!

'अयि नीलनदि!' इत्यनेन नाम्ना शीघ्रमेव प्रकाशिते २४२ पद्यात्मके खण्डकाव्ये महाकविः पाश्चात्त्यानां जीवनदर्शनं धिक्कृत्य उपनिषन्मूलायाः भारतीयायाः संस्कृतेः वैशिष्ट्यं वर्णयति। २००९वर्षे अमेरिकादेशस्य सेनफ्रान्सिस्कोनगरे सनातनकविरपश्यदेकस्मिन् संग्रहालये शवखातादुत्खात्य प्रदर्शनाय स्थापितं मिस्रदेशस्य तूतनखामुन इति नाम्ना प्रसिद्धस्य राज्ञः कंकालं शवगेहात् प्राप्तं सुवर्णमयञ्च तन्मुखाच्छादनम्।

कविरत्र कथयति यदस्ति मिस्रदेशस्य नीलनद्यास्तटेषु प्राचीनानां राज्ञां शवखाताः येषु जीवविषयिणी स्थविष्ठा दृष्टिः सम्प्रत्यपि प्रतिष्ठिता दृश्यते। भारतवर्षे पुनः भगवत्याः जह्नुकन्यायास्तटप्रवाहे राजन्ते मोक्षदायिकाः नगर्यः, अनेकानि च देवमन्दिराणि। पश्यामो वयं न नित्यतां नश्वरशरीरे। पाश्चात्त्याः न विश्वसन्ति उपनिषत्सु, यतोहि, सन्त्येते देहात्मवादिनः। गङ्गायास्तटे निवसन्तः सनातनधर्मावलम्बिनः सूक्ष्मशरीरस्य विनाशेन मुक्तिं स्वीकुर्वन्ति। तच्च विनश्यति कर्मफलानां भोगेन। कर्मफलानां भोगस्य क्षयः शरीराच्छरीरान्तरे पौनःपुन्येन प्रवेशेनैव सम्भवति।

स हि कर्म्मफलस्य भोगमात्रात् क्षयमेत्यस्ति च तत्कृतेऽपि हेतुः ।
जननान्तरमेकमेव, नान्यो, न च नाकोऽपि स, स क्षयिष्णुरेव ।। २४।।

भारतीयाः विश्वसन्ति चितिप्रवाहे न पुनः देहस्य नाशे। अस्माकं परमशिवः श्मशाने विचरति तत्रैव रमते च। नदीनां तटेषु देवैः सह पुरुषार्थचतुष्टयस्य उपदेष्टृरूपेण ऋषयः निवसन्ति येषु प्रतिष्ठिता सन्ति श्रुतयः स्मृतयश्च –

तटभूमिषु भारते नदीनां निवसन्त्यार्यमहत्तमाः महार्हाः ।
श्रुतयः स्मृतयश्च येषु मार्गान् रचयन्त्याप्ततमाश्चतुष्पुमर्थान् ।। ९१ ।।

स्वशरीरं भगवतः मन्दिररूपेणामनन्ति देहिनः राष्ट्रस्यास्य। अनया एव दृष्ट्या प्रेरिताः स्वशरीरस्य परिरक्षणाय नित्यं सन्नद्धाः भवन्ति चैते। स्वधर्मपालनपराऽस्ति एषां प्रवृत्तिः न पुनः भौतिकसुखप्राप्तिपरा।

भागीरथ्यास्तटे विराजमानायां मोक्षदायिन्यां काश्यां मरणं मङ्गलरूपेण परिकल्प्यते मोक्षेच्छुभिः —

मरणं खलु मङ्गलं समेषामिह काश्यां शिवधाम्नि, जीवनं तु ।
अपमङ्गलमेव भावयन्ति शिवमात्रैकदृशः समे पुमांसः ।। ९९ ।।

महाकविः कथयति यत् मिस्रदेशीयस्य तूतनखामुनन्नायकस्य शवमिदानीं यत्प्रदर्श्यते तदस्ति महते तिरस्काराय राज्ञः, न पुनः सत्काराय —

खनितः क्व नु देश एष देहस्तव कुत्रास्ति च लम्बमान एषः ।
अयि कीदृश एषको नरेन्द्रस्त्वमभूर्यस्य तिरस्क्रियैषका यत् ।।१५१ ।।

नीलनद्याः जलप्रवाहः 'इसिसा' नाम्ना प्रसिद्धायाः भगवतः पुत्र्याः अश्रुधारैवास्ति, तथैवास्यास्तटे अवसादः विषादश्च सुलभौ दृश्येते—

त्वमसि नील! समुद्भवमापिता यदि दृगम्बुझरैरिसिसोद्गतैः ।
किमु तदीयमिदंनयनोदकं फलितमस्त्यवसादविषादयोः ।। २३९ ।।

नीलनद्यास्तटे निवसत्सु जनेषु महत्त्वं न बिभर्ति रतिभावः किन्तु भारतवर्षस्य नदीतटेषु अव्ययाख्यः श्रीकृष्णः गोपीभिः सह विहरति किन्तु न केवलं बिभर्त्ति रागपूर्णां दृष्टिम्। वैराग्यपूर्णाप्यस्ति दृष्टिः। तत्र—

परमत्र सरित्तटेषु गङ्गायमुना—मेकलकन्यकासु देही ।
प्रवरोऽव्ययपूरुषो विहर्तुमपि गोपीभिरुवाह रागयोगौ ।। २४१ ।।

कविरत्र कामयते यत् भवेज्जन्म भूतले प्राणिनां यत्रास्ति प्रतिष्ठता भगवती गङ्गा, मेकलकन्यका, नर्मदा, यमुनादयः सरित्प्रवाहाः न च यत्रास्ति नीलसदृशः प्रवाहः शुष्कभौतिकप्रवृत्तिसम्पन्नः।

त्रीणि अवदानकाव्यानि

१९. हरिहरावदानकाव्यम्—

रामराज्यपरिषदः संस्थापकानां अपूर्वविद्याविद्योतितान्तःकरणानां सर्वविद्याविशारदानां सर्वशास्त्रज्ञानां यतिवराणां हरिहरानन्दसरस्वती–पादानां करपात्रस्वामिनां सम्पूर्णमप्यवदानमेकत्रोपस्थापयति एकषष्ट्–युत्तरद्विशतपद्यात्मकमेतत् काव्यं सनातकवेः। काव्येऽस्मिन् वैभवखण्डं वंशखण्डञ्चेति खण्डद्वयं वर्तते। प्रथमखण्डे उपवर्ण्यते करपात्र–स्वामिपादानां सम्पूर्णमपि आध्यात्मिकं, सारस्वतं, राजनयिक–ञ्चावदानम्। द्वितीये वंशखण्डे समुपस्थाप्यते सर्वथा प्रामाणिकत्वेन वंशवृत्तं स्वमिचरणानाम् आजन्मनः आ च प्रतिप्रयाणात्। आसीदेतेषु महागणपतेर्मेधा प्रतिष्ठिता, प्रतिभा शिवसदृशी प्रज्ञा च सुरगुरो–रिवाऽसुरगुरोरपि —

मेधां महागणपतेः प्रतिभां शिवस्य,
प्रज्ञां सुरासुरगुरुद्वितयस्य लब्ध्वा ।
यो भूमिमात्मजनुषा समलंचकार
तस्मै नमो हरिहराय महामहिम्ने ।।१।।

एते प्रकाशयन्ति शास्त्ररहस्यान् सरलया प्रामाणिक्या च गिरा समेषामेव विदुषां तदध्ययनाय प्रवृत्तानाम् —

न्यक्कृत्य शास्त्रसमुदायमहारहस्य–
दृष्ट्नशेषविदुषः स्वमनीषया यः ।
प्रामाणिकान् मधुरया गिरया विचारान्
स्पष्टं प्रकाशयति वीतरसो महर्षिः ।। २।।

सर्वशास्त्राणामुदधिरूपेणास्ति प्रतिष्ठिता मेधा करपात्रस्वामिनाम्। कलिकालजनितदोषविध्वंसनाय तत्परैः सर्वविधपूतान्तःकरणैरेतैः

संरक्षितानि सन्ति सर्वाण्यपि शास्त्राणि तेषां सारं प्रकाश्य। अनेनैव सनातनधर्मः सम्प्रति पुष्टतामादधाति —

निष्पिष्य शात्रवपुदीर्य विशुद्धतर्का वाचं,
विदीर्य कलिकालभुजङ्गवक्त्रम् ।
यस्यैव पुण्यहृदयस्य कृपातिरेकाद्
धर्मोऽस्ति पुष्टवपुरद्य सनातनाख्यः ॥ ६॥

अधर्मस्य विरोधाय करपात्रस्वामिनः निरन्तरं कृतसंकल्पा आसन्। सम्प्रति ये नक्राः सनातनधर्मं ग्रसितुं प्रवृत्ताः दृश्यन्ते तेषां संहाराय असीदेक एवासौ कृती समर्थः —

भरतभुवनमेतत् तीर्थराजोऽपि भूत्वा
कवलितवपुरास्ते हन्त हन्ताद्य नक्रैः ।
विशदयतु क एतद् भूय एवाऽद्य हित्वा
हरिहरतनुमेकां कांचिदद्वैतमूर्त्तिम् ॥१३॥

एतेष्वासन् प्रतिष्ठिताः प्रौढतमास्तर्काः, सुमधुरा प्रवचनपद्धतिः, विशुद्धं ज्ञानं, दीर्घं तपः, सौभगवती भगवद्भक्तिः, लोकोत्तरा प्रतिभा च —

तर्काः प्रौढतमा, कथा सुमधुरा, ज्ञानं विशुद्धं, तप—
स्तारं, भक्तिरतीव सौभगवती, प्रज्ञा च लोकोत्तरा ।
येषां लौकिकवैदिकोभयविधाऽऽचारप्रचारे, प्रभू—
नेतान् भूः करपात्रसंज्ञकयतींल्लब्ध्वाऽद्य धन्यायते ॥ २०॥

शास्त्रसंरक्षणाय धृतसंकल्पे करपात्रस्वामिनि असीत् कापि मानविकी दृष्टिरपि प्रतिष्ठिता। भागवतकथायां नित्यं रमन्ते योगिवरा एते। एतेषां लालित्यपूर्णायाः कथायाः पानाय जनसम्मर्दो भवति स्म त्रिवेणीसंगमे प्रयागे समायोजिते महाकुम्भादिपर्वसु। शासने प्रतिष्ठितानां नेतॄणां अनीतिपूर्णाः नीतयः करपात्रस्वामिभिः तारस्वरेण विखण्डिताः।

काव्यस्यास्य द्वितीयखण्डे कविना करपात्रस्वामिनां सम्पूर्णमपि जीवनचरितमस्ति उपनिबद्धम्। भगवत्या जह्नुकन्यायास्तटे स्थिते प्रतापगढजनपदे भटिनीनाम्नि प्रसिद्धे ग्रामे यतिवरोसौ जन्म अलभत—

प्रतापगढसंज्ञको जयति कोऽपि गङ्गातटे
स्थितो जनपदो महः श्रयति यत्र तत् प्रातिभम् ।
यतस्तु सुरनिम्नगातट उदारतारो ध्वजः
सनातन इतीरितो नभसि संस्फुरत्यञ्जसा ।। २२९।।
स एव किल जन्मभूरभवदार्यधर्माध्वनो
द्रढीकृति—विचक्षण—प्रतिभवाक्पतेरस्य नः ।
शिवस्य वरिवस्यया स्तिमितचेतसस्तत्र वै
द्विजा वसतिमाप्नुवन् सुदृढसुन्दराः गात्रतः ।। २३०।।
मही च भटनी दिवोऽप्यतितरां समृद्धा तदा
यया समभिकर्षिता द्विजवरा इमे भासुराः ।
स वै जनपदोऽप्यभूदतिमहान् कलाकङ्करो
व्यजायत तु यत्र वै हरिहराभिधः शङ्करः ।। २३७।।

एवं काव्येऽस्मिन् हरिरानन्दसरस्वतीपादानां करपात्रस्वामिनां सम्पूर्णमपि चरितं सुरगिरा पुण्यात्मभिः सनातनकविभिरुपवर्ण्यते। अत्र पदशय्या आरोहति औपनिषदीं भूमिकां, भावाः सनातनपरम्परा—वसिक्ताः, प्रवाहश्च अनुपमः सहृदयचित्तावर्जकः। एतदस्ति प्रथमवदान—काव्यं करपात्रस्वामिचरणानां चरितोपबन्धनम्। अनेन संरक्षितं संस्कृत—कवितायां सनातनकविना सम्पूर्णोप्यस्य यतिवरस्य अवदानं क्षेमङ्करं भावुकानां सानातनीयानां शास्त्रसंरक्षणकर्मणि निबद्धचित्तानाम्।

२०. रत्नस्वरूपावदानकाव्यम्—

सप्त्युत्तरत्रिशतपद्यात्मके रत्नस्वरूपावदानकाव्येऽस्मिन् सनातन—कविरुपनिबध्नाति राष्ट्रस्यास्माकीनस्य द्वारकाशारदापीठद्वयशङ्करार्याणां स्वामिश्रीस्वरूपानन्दसरस्वतीपादानां जीवनचरितं, भरतीयाया: प्रज्ञाया: संस्कृतेश्च संरक्षणाय सनातनधर्मस्य प्रचाराय संवर्द्धनाय च कृतानां तेषामवदानानाञ्चैकत्र शास्त्रकाव्यात्मकरीत्या। मध्यप्रदेशस्य 'श्रीवनि' रिति(सिवनी) नाम्ना प्रथिते तीर्थस्थले दिघौरीति ग्रामे लब्धजन्मनां स्वामिचरणानाम् आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकञ्च रहस्यभूतं चरितं तद्भक्तानां कृते संस्कृतभाषया प्रकाशयति काव्यमेतत् —

जयति जगति दिव्या श्रीवनी नाम भूमि:
प्रतिपदमतिभव्यैर्देवगेहै: समृद्धा ।
प्रवहति शिव एव प्राप्य रेवाशरीरं
त्रिभुवनकमनीयं वारिरूपं हि यस्याम् ।। २२६।।
श्रीशङ्कराचार्य इति त्रिलोकीवन्द्या विभूतिर्ननु केरलेषु ।
पुरा बभूवाद्य तु सैव साक्षाद् रत्नेश्वरे श्रीवनिकां श्रिता न: ।। २२७।।
माता श्रीगिरिजा पिता धनपति: पुत्रं यमावापतु—
स्तं पार्थेश्वरमूर्त्तिमेव जगती योगीश्वरं भास्वरम् ।
पोथीराम इति ब्रवीति यतिनं तं प्राप्य पीठद्वयं
बद्रीद्वारवतीगतं शिवगुरो: सानाथ्यमापद्यते ।। २२८।।

स्वामिचरणै: मध्यप्रदेशस्य गोटेगांव इति नाम्ना प्रसिद्धे क्षेत्रे बाणगंगायास्तटे परमहंसीगंगाश्रमे भगवत्या: ललिताम्बिकाया: त्रिपुर—सुन्दर्या: देवालय: विनिर्मितोऽस्ति —

ये जाबालिपुरेऽधिमेखलसुतातीरं जगन्मातरं
श्रीविद्यां त्रिपुराम्बिकां विलसितुं दिव्यं दधुर्मन्दिरम् ।
स्थापत्यं खलु दाक्षिणात्यमिह यत् संदृश्यते तेन को
नेत्रे स्फारयते न विस्मयभरेणाच्छादिते तत्ववित् ।। २१७।।

सम्पूर्णस्याप्यस्य क्षेत्रस्य पौराणिकमाध्यात्मिकं प्राकृतिकं महत्त्वं निबध्नाति सनातनकविता। वेदोपनिषद्ब्रह्मसूत्रादीनां सर्वेषामेव ज्ञातारः उपदेष्टारश्च स्वामिचरणाः सनातनमतावलम्बिनाम् आश्रयभूताः समाजस्य सर्वविधकल्याणाय अनेकेषु कार्येषु सततं संलग्ना दृश्यन्ते —

हे ब्रह्मन्! भवता विहाय विषयान् बाल्यावधेर्यत् तप—
स्तप्तं यच्च समाजशान्तिविधये ते ते क्रमाश्चालिताः ।
तत् सर्वं वनदेवता अपि विभो! प्राच्यां महाब्धेस्तटे
वीचिध्वानमृदङ्गसङ्गतिशुभैः संगीतकैश्चक्षते ।। २३३।।

कविः कामयते यद् विलसतुतरां चिरं भूमिवलये प्रकाशानन्दमयी श्रीचरणानां प्रज्ञा धर्माध्वनीनानां ध्वान्तमपहरन्ती मुक्तिप्रदा —

स्वरूपानन्देति प्रसृमरयशोभारसुरभिः
पुराणी प्रज्ञैका विलसतु चिरं भूमिवलये ।
जगज्ज्योतिर्व्यूहै रचयतु च संभास्वरमिदं
तमस्काण्डं शान्तिं व्रजतु च ततो व्याघ्रसचिवम् ।। २३८।।

अस्त्यत्र संस्कृतभाषा औपनिषदिकी, विचाराश्च आध्यात्मिकया भावनया परिपूर्णा, प्रवृत्तिश्च सात्विकी, वर्णननैपुण्यञ्च महाकवेरलङ्कारशास्त्रे कृतभूरिपरिश्रमाञ्चितम्।

२१. जयेन्द्रसरस्वतीपादावदानकाव्यम्—

त्रिविंशत्युत्तरशतपद्यात्मकेऽस्मिन् अवदानकाव्ये काञ्चीपीठा—धीश्वराणां स्वामिश्रीजयेन्द्रसरस्वतीपादानामद्भुतमवदानं सनातन—कविता उपनिबध्नाति। कविरत्र स्तौति काञ्चीं शारदाम्बाम्, उपवर्णयत्यत्र

क्षेत्रस्यास्य सांस्कृतिकमैतिहासिकञ्च वैशिष्ट्यम्। श्रीचरणाः ब्रह्मविद्याया उपासकाः सततं निरताः सन्ति सनातनधर्मावलम्बिनां समुद्धाराय सर्वविधिना। धर्मः भारतावनौ तारुण्यमादधाति सात्विकधिया सामाजिकेषु यतिवराणां यत्नैरेव—

तारुण्यं करुणस्य, पाटवभरं शान्तस्य, शृङ्गक्षयं
शृङ्गारस्य, भयानकं भवरसे वन्दे जयेन्द्रं गुरुम् ।
धत्ते योऽद्भुततां तपस्सु, दुरितस्तोमे घृणां, वीरतां
दाने हास्यमथो प्रपञ्चविसरे क्रोधं च धर्मद्विषि ।। ४८।।
पुंभावं परदेवता श्रितवती यद्व्याजतस्तर्पितुं
कारुण्यामृतपुष्कराम्बुदघटासारैरिमां माधवीम् ।
एकाम्रेश्वरसौभगस्य चरमां स्फीतिं, श्रुतीनां महत्
तात्पर्यं, जगतां गुरूंश्च भगवत्पादान्नुमः शङ्करान् ।। ५०।।
यद् वै ब्रह्म स एव जीव इति या वेदान्तवाक् तत्र ये
दृष्टान्तन्ति जयन्ति ते यतिवराः श्रीमज्जयेन्द्रेश्वराः ।
यत्कारुण्यवशात् कलावपि युगे वर्णाश्रमाचारवान्
धर्म्मो भारतवर्षसीमनि पुनस्तारुण्यमाटीकते ।। ५१ ।।

भारतस्य दक्षिणदिग्विभागे यतिवराणां प्रयासेन भरतमुनेः नाट्यकरणानां संरक्षणं संजातम्। क्षेत्रेऽस्मिन् वटूनां मुखान्निस्सरन्ती वेदवाणी सर्वास्वपि दिक्षु व्याप्ता संदृश्यते—

यत्संकल्पवशेन नाट्यकरणग्रामश्चिरं विस्मृतो—
प्याञ्जस्येन पुनश्च सम्प्रति निजां प्राप्तस्तनुं मौलिकीम् ।
पद्माम्बावपुषीव यद् गणपतिस्थापत्यरत्ने जग—
ल्लीलां काञ्चन वीक्षतेऽद्य महिमा सोऽसावमीषां गिराम् ।। ५३।।
आचार्यप्रवरा जयन्ति भगवत्पादा जयेन्द्राः, यतो
भावैक्यं प्रतिपद्य भारतधरा भूयोऽपि राष्ट्रायते ।

येषामेव तपोभिरेव निखिला वेदा वटूनां मुखा—
दुद्गीथान् विमलानवाप्य ककुभः संपावयन्तेतराम् ।। ५६ ।।

काञ्चीनगरी सम्प्रति सर्ववैभवमापन्ना राजतेतरां दक्षिणपथे श्रीचरणानां सत्प्रयासततिभिः। मृत्युमुत्क्रम्योल्लसन्तः यतिवराः सम्प्रति विराजन्ते नगर्यामस्यां सम्पूर्णेऽपि दक्षिणदिग्विभागे सनातनधर्मस्य ध्वजं दोधूयन्तः —

श्रीचन्द्रशेखरमहेश्वरदिव्यसिद्धि—
सन्तानसत्फलतया भुवि भासमानाः ।
सार्धं जयन्ति विजयेन्द्रसरस्वतीभिः
श्रीकामकोटिजगतीगुरवो जयेन्द्राः ।। ५८ ।।

श्रीमन्तः शङ्करार्या भरतभुवमिमां पूरयित्वाश्रमैः स्वैः
प्रत्यावृत्ताः पुनश्च द्रढयितुमिह निजं धर्ममासीसदन् यत् ।
काञ्ची मोक्षस्य धाम श्रयति तदिह वै सन्निधानं पवित्रं
यस्मिन्नद्यापि तिष्ठत्यतिमरणदशः शङ्करार्यो गुरुर्नः ।। ८८ ।।

अस्यां श्रीश्रीजयेन्द्रा अथ विजययुताः संयमीन्द्राः विशालैः
पद्माक्षैः स्मेरवक्त्रैरथ च जनयतः प्रत्ययानात्मकोषे ।
एतेषां दर्शनानां फलमपि लभते मानुषश्चित्तसीम्नि
भूमप्राग्भारभव्ये विशदिमभरितो लीयते यत् समाधौ ।। १०८ ।।

एतैः सम्पूर्णस्यापि भारतस्य पूर्वस्माद् दिग्विभागत् पश्चिमं दिग्विभागं यावत् स्थापितानि मन्दिराणि, उद्धृतानि जीर्णानि देवस्थानानि, निरुद्धा आर्त्ता हिन्दवो धर्मपरिवर्तिनः, स्थापिता नेत्रचिकित्सालयाः, सर्वविधै—राधुनिकैः सौविध्यैर्योजिताश्च ते, कांच्यामेव स्थापितो विश्वविद्यालयः। स्वामिपादानाम् एतेषां सर्वेषामेवावदानानामस्त्यत्र वर्णनम्।

सनातनस्य नाट्यसाहित्यम्

'सप्तर्षिकाङ्ग्रेसं' **'यूथिका'** चेति द्वे एव सनातनकवेः नाट्यकृती। अनयोः प्रथमा दशाङ्कं महानाटकं समवकारपदवाच्यं द्वितीया च नाटिका। चत्वारस्तत्राङ्काः। शेक्सपियरस्य **'रोमियो जूलियट'** इति दुःखान्तं नाटकं तत्र मूलम्। रचना तु संस्कृतनाट्यप्रवृत्त्या मूलं विस्मारयति। शृङ्गारस्त्वत्र रसः, पीतविषयोरपि नायकयोर्युगनद्धतया शबगर्तगर्भे निपतनात्।

१. सप्तर्षिकाङ्ग्रेसम् —

उत्तरसीताचरितस्य महाकाव्यस्य १९६४ ख्रीष्टाब्दे रचनानन्तरं १९७७ख्रीष्टाब्दे सनातनकविना 'सप्तर्षिकाङ्ग्रेसम्' इति दशाङ्कं महानाटकं विरचितमासीत्। अस्त्येषा सनातनकवेः प्रथमा नाट्यकृतिः। प्रकरणतुल्यं महानाटकमेतत् 'समवकार' इति नाट्यप्रकारे परिगण्यते। तत्राधारः सप्तसप्ततितमे वर्षे घटितं लोकसभानिर्वाचनम्। नाट्यमिदं निर्वाचनमिदं प्रत्यक्षमिव कारयति।

सनातनकविना विरचितमेतन्नाटकं प्रकाशमगात् २०००ख्रीष्टाब्दे। सप्तसप्तत्युत्तरे एकोनविंशतितमे वर्षे भारतवर्षे ऐतिहासिकं निर्वाचनमजायत लोकसभायाः। निर्वाचनेऽस्मिन् भारतराष्ट्रस्य स्वतन्त्रतायाः मूलं 'काङ्ग्रेस'— इति नाम्ना प्रसिद्धं राजनीतिदलं जनसंघेन तद्विरोधिना पराजितम् आसीत्। वृत्तपत्रेषु प्रकाशितानि आकाशवाण्यादिभिः प्रचारमाध्यमैश्च प्रसारितानि नेतृणां वक्तव्यानि सनातनकविः ताटस्थ्येनावागाहत। सर्वमप्येतत् राजनीतिकं निर्वाचनाख्यं संप्लवं दृष्ट्वा कविः 'सप्तर्षिकाङ्ग्रेसम्' इति महानाटकं विरचितवान्। निर्वाचनेनानेन जायमाना काङ्ग्रेसस्य सत्ताच्युतिः इतिहासे प्रसिद्धास्ति।

कवि: निरतिरेकेण प्रस्तौति यथार्थमेव अप्रतिहततया। कवे: राजनीतिकी निष्पक्षता निरपेक्षता च सर्वत्र शोभते नाटकेऽस्मिन्।

आसीदेतन् नवतिवर्षप्राचीनस्य काङ्ग्रेसदलस्य प्रथममवसानं भारतीयायां राजनीतौ। महाकवि: महानाटकेऽस्मिन् प्रत्यक्षं बहूपवर्णयति सम्पूर्णेऽपि राष्ट्रे तस्मिन् काले जायमानं राजनीतिकमेतत् विप्लवम्। अत्र प्रतिपदमनुस्मृतमस्ति भारतीयाया: राजनीते: समाजस्य च अत्यन्तं सूक्ष्मं यथार्थञ्च जनभावनाप्रकाशकं पर्यवेक्षणम्। कवेरत्र समीक्षादृष्टिरस्ति सर्वथा तटस्था तथापि सार्वभौमिकी।

सम्पूर्णेऽपि महानाटके द्वावेव पुरुषौ प्राधान्येन पात्रायेते **जानुक:** **सुन्दरक**श्च। सम्पूर्णेऽपि नाटके एक: प्रश्नमुत्थापयति अपरश्च तमुत्तरति विस्तरेण। उभावपि ताटस्थ्येन पश्यत: सम्पूर्णमपि सामाजिकं शैक्षणिकं, साम्प्रदायिकं, व्यावसायिकं राजनीतिकञ्च परिदृश्यं वर्णयतश्चैतत् वैदग्ध्यपूर्णया वाण्या सर्वजनानामवगमनाय। एतेषां वक्तव्येषु समाहितास्ति सनातनकवे: तर्कपूर्णा समीक्षादृष्टि:।

नाट्यमिदं तथा गत्वरं यच्छैथिल्यं कुत्रापि न दृश्यते। पात्रद्वये पक्षविपक्षौ विस्पष्टं प्रस्तूयेते, संवादभाषा च नितान्तं प्रसन्ना असमासा च। मध्ये दिल्लीस्थानां चाँदनीचौकप्रभृतीनामप्यस्ति जीवितं चित्रणम्।

पूर्वरङ्गानन्तरं नाटकस्यारम्भ: काङ्ग्रेसकार्यकारिणीप्रवेशेन भवति यत्र उच्चन्यायालय: प्रधानमन्त्रिपदे प्रतिष्ठिताया: श्रीमत्या इन्दिरादेव्या निर्वाचनमवैधं घोषयित्वा निरस्तं कृतवान्। किमिदानीम् अनुष्ठेयमिति विचारयन्ति सर्वेऽपि काङ्ग्रेसमन्त्रिण: कार्यकारिण्या: सदस्याश्च। काङ्ग्रेसदलस्य अध्यक्षोऽस्त्यत्र वरुआ—महोदय:। अत्र स्पष्टं परिलक्ष्यते कांग्रेसदलस्य कार्यकारिण्या: नेतृत्वपरिवर्तनविषयिणी चिन्ता। नानुमन्यते अनेकै: पराजिताया इन्दिरादेव्या नेतृत्वम्। अत्रोद्गिरत्येषा राजनीतिविषये एवम् —

राज्यं स्वहस्तधृतदण्डमिवातपत्रं
क्लिश्नात्यतीव न तु साधयते तथेष्टम् ।
तत्रापि पोत इव सागरमध्यसंस्थो
नेतोद्धृतिं कलयते न तु तत्तितिक्षाम् ।।१.१८।।

महानाटकस्यास्य द्वितीयांके जानुकसुन्दरकौ इन्दिराया: प्राधान्यविषये विवदत:। कविरत्रानुमोदते जनापवादाक्रान्ताया: इन्दिराया: प्राधान्यं समुल्लिख्य तत्कृतावदानततिमेवम् –

यया हि –

पाकस्थान–पिपीलकस्य वपुष: पूर्वार्धपश्चार्धयो:
संबन्धत्रसरेणुमात्रनलिका फृत्कृत्य वित्रोटिता।
तस्या आणवशक्तिसंचयसमुत्सेधोज्ज्वलाया: कृते
कार्त्तघ्न्यं सुमहद् यदुच्यत इदं लोकेन निश्चक्षुषा।। २.४।।
ऋणस्य मुक्ति: कोशानां राष्ट्रियत्वं च साम्प्रतम्।। २.५।।

अस्मिन्नेवाङ्के राजनीतेरादर्शानुपस्थापयति जयप्रकाशनारायण: राजनारायणश्च कांग्रेसदलस्य विरोधिनौ एवम् –

'यदि नाद्य श्वस्तने स्थिर एव सत्यस्य जय:। नयो जड:, चेतनं पुन: सत्यम्। राजपुरुषा उपासतां नाम नयम्। ये हि लोकपुरुषास्तेषां सत्यमेव परायणम्। तच्च सत्यं येनावज्ञायते न्यक्कारपात्रं तच्छासनमिति मनसि कृत्वा निवर्त्तामहे।' (पृ. २१)

'स्यान्नामात्र भारतमातु: शरीरे सत्यरूपस्य अमृतस्य प्रतिष्ठा, अहिंसारूपाणां क्षीरधाराणामापूर: लोकतन्त्रस्य च संपोष'। (पृ. २३)

राष्ट्रे समाजे वा सर्वत्र जनता एव बिभर्ति प्राधान्यम् इत्यस्ति समुद्घोष: सनातनकवे:। यथा तन्तुषु परिक्रान्ता मलिनता सम्पूर्णमपि वस्त्रं मलिनयति तथैव जनेषु समाक्रान्त: अनाचार: सम्पूर्णमपि समाजं दूषयति। समाजस्य परिशोधनाय अपेक्ष्यते परिशोधनं तदुपादानभूतस्य

जनस्य— **व्यक्तिः समाजतन्त्रस्य तन्तुस्तस्मिन् मलीमसे ।**
कीदृशी नु समाजस्य शुद्धिः सिद्धान्तिता नये ।। ३.५।।

जनानां मतिपरिशोधनाय अत्यन्तमपरिहार्या वर्तते संस्कारपूता शिक्षाव्यवस्था। शिक्षाऽस्ति पर्यायः संस्कारस्यैव। सामाजिकविषमतायाः राजनीतिकैः क्रियमाणस्य अत्यचारस्य च अविरोधेन प्रतिभाति यत् समाक्रान्ताऽस्ति आस्माकीना शिक्षाव्यवस्था संस्कारहीनैः वैषम्य— हलाहलेन उपहतमनोभिः जनैः। यथा दुग्धे जलस्य मिश्रणं तस्य सारत्वमपहरति तथैव संस्कारच्युतिः शिक्षाव्यवस्थायाः—

क्षीरे तोयमिव प्रकाममधुना शिक्षाक्रमेऽप्याहितम् ।
संस्कारच्यवनं धनार्थिलिखितैर्ग्रन्थैर्वृथाविस्तरैः ।। ३.९।।

सनातनकविः कथयति पुनरत्रैव विषयेऽस्मिन् एवम्—

बीजं यादृग् वपति कृषको भूमिखण्डे स्वकीये
तस्मात् तादृक् फलमपि भजत्यत्र नास्त्येव शङ्का ।
राष्ट्रोन्नीतौ प्रथमतितरां स्वच्छता शिक्षणस्य
प्रज्ञाकोषोच्छ्वसित—हृदयोदन्वदुत्थामृतस्य ।। ३.१४।।

शिक्षा नागरकाणां हृत्सागरे अमृतद्रव इव शोभते अत एवास्ति अत्यन्तं अपरिहार्यमस्याः परिशोधनम्। तच्च संभवति संस्काराणा— माधानेनात्र प्रतिपदम्। साम्प्रतिकीं शिक्षाव्यवस्थां कविः समालोचयत्येवम्—

शिक्षा साम्प्रतिकी पिकीति मनसा नीता विदेशादियम्
हेम्नः पञ्जरके च हन्त महिता, पाके तु काकायते ।
नीतिर्नः प्रमुखैर्विविच्य विबुधैर्निर्धारितात्मापि हा
दंशेऽस्मिन् कृकलासिकेव मलयोद्याने विवर्णायते ।। ३.१५।।

विदेशादायातिते सुवर्णपिञ्जरे निगृहीता पिकीव प्रतिभाति साम्प्रतिकी शिक्षाव्यवस्था या पुष्टिं लभमाना काकायते (काँव काँव करोतीत्यर्थः)। मलयोद्यानभूते लोकसभापरिसरे नीतिश्च कृकलासिका इव प्रतिपलं विवर्णायते। नास्ति काऽपि स्थिरा मतिर्न चास्ति काऽपि नीतिः

साम्प्रतिके युगे। कविः पुनरपि कथयति— (३.१०)

को नेता? प्रभुतां गतो निजगृहं स्वर्णेन यः पूरयेत्
का साध्वी? बहुवल्लभापि हि भजेद् रुद्राक्षमालां तु या ।
कः प्राज्ञः? परवञ्चनापटुरपि प्रेम्णैव भाषेत यः
किं तीर्थं? निवसन्ति यत्र त इमे मान्याः, न काश्यादिकम् ।।

शिक्षाव्यवस्थायाः उपादानभूतानां छात्रप्राध्यापकप्रशासकानां साम्प्रतिकं स्वरूपं कविरत्र उपवर्णयत्येवम्— (३.११)

कश्छात्रः? प्रविहाय यः श्रममुपादत्तेऽङ्कमध्वान्तरात्
कः प्राध्यापक इष्टभाषणपटुः कक्षानदीं यस्तरेत् ।
यो गालीः सहते स सत्कुलपतिर् मासान्तसहवेतनाः
यत्रैते निवसन्त्यसौ परिसरः स्याद् विश्वविद्यालयः ।।

शिक्षाक्षेत्रस्य कर्णधाराणां औदासीन्यमेव सनातनकविः अनीति—ज्ञानां साम्राज्यविवृद्धौ हेतुत्वेन स्वीकरोति। अनेनैव इदानीं दंदशूका अपि हारायन्ते हारा अपि दंदशूकन्ति —

शिक्षाक्षेत्रं राजनीतेस्तटस्थं यद्वा मन्त्री भूमिपालात् तटस्थः ।
यस्मिन् राष्ट्रे दंदशूका हि तत्र हारायन्ते दंदशूकन्ति हाराः ।। ३.१७।।

नैराश्येनाक्रान्तेऽस्मिन् परिदृश्ये सनातनकविः दृढं विश्वसिति यत् राष्ट्रस्य समुन्नतिः भवत्येव सत्यनिष्ठानां सामाजिकानां संभूय क्रियमाणेन संकल्पविशेषेण—

नौरेका ननु तत्र, तत्र सरिदप्येका, दृढा नाविकाः,
गन्तारः कृतबुद्धयः, प्रशमितद्वेषश्च लोकः परः ।
अर्थस्तत्र समर्थदासति, नयो राष्ट्राधिपत्यादरः
संस्कारत्यथ मन्त्रणा च विदुषां भाग्योदयत्यञ्जसा ।। ३.१६।।

सनातनकविः वर्तमानस्य समीक्षणं सूक्ष्मतया विदधाति। कविः प्रस्तौत्यत्र ऋषिपरम्परां याऽसीत् संवाहिका राजपरम्परायाः। साम्प्रतिकान्

सामाजिकान् सम्बोध्य कविरसौ कथयति यद् सामाजिकं वैषम्यमनवलोक्य निरपेक्षत्वेन क्रियमाणः तेषां व्यवहारः विनाशाय कल्पते। दावाग्निना कवलीक्रियमाणेन कोटरस्थेन पक्षिणा सममवश्यमेव विनाशं लप्स्यन्त्येते कालेनाक्रान्ताः—

परिसरगतं त्यक्त्वा वृत्तं स ईक्षत आत्मनः
परमपुरुषस्वाध्यायादिप्रकोष्ठपरिष्क्रियाम् ।
स खलु विहगो, वृक्षे ज्वालाशतैः कवलीकृते
दवदहनजैः सीदन्त्येवास्य कोटरमध्यगः ।। ४.१२ ।।

महर्षिः वसिष्ठः, वाल्मीकिः, परशुरामः वेदव्यासश्च परमवैराग्यसम्पन्नाः आसन्। सांसारिकीं मायामपाकृत्य आसन्नेते ब्रह्मैकनिष्ठाः। एतैरपि परमकारुणिकतया समाजस्य परिरक्षणाय परिशोधनाय च नीतिपूर्णानि वचनानि यथाकालं विस्तरेण प्रकाशितानि सन्त्येव—

वसिष्ठो वाल्मीकिः स च विशदमेधा भृगुपतिः
स च व्यासो ब्रह्माक्षरनिभृतचित्ता अतितराम् ।
अथाप्यद्धा शोद्धुं जनमपि महाकारुणिकता—
मिमे काले काले किमु नहि दधुर्नीतिमहिताम् ।। ४.१५ ।।

अत्याचारिणः नन्दवंशस्य क्षपयिता कौटिल्यः आसीत् वैराग्याधिष्ठितमतिरेव। प्रददात्यसौ साम्राज्यं नीतिज्ञाय मौर्याय अनाचारिणं नन्दं समूलमुत्खाय। सायणाचार्योऽप्यासीत् द्विजकुलपतिः वेदभाष्याणां कर्ता तथापि समये समागते सः युद्धाय आवहं लभते कौक्षेयकं धृत्वा। आसीदसौ महान् समरविजयी सेनानायकः—

विरक्तः कौटिल्यः किमु न नव नन्दान् क्षपितवान्
अथो मौर्यं राज्ये विधृतचरणं किं न कृतवान् ।
स वेदव्याख्याता द्विजकुलपतिः सायण इति
प्रथावान् किं युद्धान्यकृत न हि कौक्षेयककरः ।। ४.१६ ।।

आसीद् द्रोणाचार्यः ब्राह्मणः। शास्त्रेऽप्यासीदसौ अप्रतहतगतिकः महान् योद्धा। 'शिक्षाभिक्षयोः' सामानाधिकरण्यमासीत् प्रतिष्ठितं विश्वामित्रे—

इतो ब्राह्ममितः क्षात्रं शापादपि शरादपि ।
युद्धक्षेत्रे द्विजाद् द्रोणाद् भिन्नः को न्विदमब्रवीत् ।।
'शिक्षा भिक्षे'—ति यौ शब्दौ एतयोः सांप्रतं दृढम् ।
सामानाधिकरण्यं हि विश्वमात्रे प्रतिष्ठितम् ।।४.१८।।

सनातनकविमते धर्मः राजनीतिश्च उभावपि पर्यायभूतौ। राजनीतिं नियमयति धर्म एव। धर्मनिरपेक्षा राजनीतिः राष्ट्रस्य समुन्नतिकारिका न—

धर्माचार्यप्रबोधेन लोकयात्रा सुखायते ।
स एव नेत्रं सर्वेषां विश्वस्मिन् कर्मसंगिनाम् ।।४.१९।।

अस्मिन् लोकसभायाः निर्वाचने रामराज्यपरिषदः संस्थापकाः परमपूज्याः देशिकेन्द्राः धर्मसम्राट्—करपात्रस्वामिचरणा अपि आसन् स्वदलस्य प्रचारे संलग्नाः। महानाटकस्यास्य सप्तर्षिकाङ्ग्रेसस्य षष्ठाङ्के (पृष्ठम् ११७—१२४) स्वामिचरणानां ये उद्गाराः ते अवश्यमेवावधेयाः सर्वैरपि राजनीतिज्ञैः साम्प्रतमपि। एकस्यां जनसभायां समुद्घोषयन्ति करपात्रस्वामिनः स्वकीयान् विचारानेवम्—

'शासनं हि अनुशासनं विना निष्प्राणम्। अनुशासनं च नान्यत् ऋते स्वस्य स्वतः शासनात्। स्वं चोपनिषद्। सा च ब्रह्मतत्त्वविधृता जीवन्मुक्तप्रवृत्तिः, स्थिरप्रज्ञानां स्थितिः, विदेहानां भूमिः। (पृ. ११९)

प्रतिकूलो महात्मा राजनीतिं न स्पृशेत् अनुकूलः पुनः कण्ठहारायेतेति सेयं स्वैरता न प्रजातान्त्रिकता।

महात्मनः संन्यासिनश्च त एव भवन्ति येषां चेतोधातुषु दर्शनं सुप्रतिष्ठितं भवति। किं च मोहनदासो गाँधी महात्मत्वेन सर्वैरामन्त्र्यते।

स हि राजनयेनैव जीवनं क्षपितवान्। आसीदसौ भारतस्यास्य निश्छत्रः सम्राट्। विनोवा हि किं महात्मा नास्ति? स किं राजनयं नाधिचक्रे' (पृ. ११८–११९)।

वयं हि रामराज्यं दिदृक्षामहे। प्रजातन्त्रं हि बहुजनतन्त्रं रामराज्यं पुनः सर्वजनतन्त्रम्। रामराज्ये हि विवेक एव राजानति। धैर्यमेव मन्त्रीयति। धर्मस्तत्र सुपर्णायते। मानवात्मा पुरुषोत्तमश्च विष्णवति। ततश्च सम्पूर्णं राष्ट्रमेव देवमन्दिरायते, प्रत्येकं क्षेत्रं तीर्थायते, मोक्षात्मा भगवान् साकारायते जायते राजनयेनाने द्वयोरेव प्रसिद्धिः भुक्तेर्मुक्तेश्च। अत्रैव अस्माकं श्रद्धा।'

अस्त्यस्मिन्नाटके उपनिबद्धानि अन्येषामपि नेतृणां वक्तव्यानि राजनीतौ परस्परं घातोपघातप्रकाशकानि। महात्मनामुपेक्षा राजनीतौ न कथमपि करणीया। परम्पराऽप्यस्माकीना इदमेव प्रकाशयति सर्वत्र।

साम्प्रदायिकं सौहार्दं विवर्धयितुं दृढमूला वर्तन्ते कवेः विचाराः सप्तर्षिकाङ्ग्रेसे। सनातनकविमते एतदेवास्ति महद् बलं साम्प्रतिके युगे। तन्मते न कोऽपि जन्मना हिन्दू भवति मुसलमानो वा। जनानां प्रवृत्तिरेवास्त्यत्र नियामिका। सम्प्रदायमाश्रित्य जातिमाश्रित्य वा सामाजिकानां यद् विभाजनं क्रियते तत्तु अस्माकं मतिभयजनकः। सर्वेऽपि ईश्वरस्यैव अंशभूताः, सर्वेऽपि भूलोकेऽस्मिन् समानाः स्वधर्मानुपालने स्वतन्त्राश्च। किं नासन् कौरवाः मुसलिमानाः हिन्दूदर्शने किञ्च नासन् मोहम्मदाः हिन्दवः मुसलिमदर्शने? कविरत्र कवयत्येवम्–

कौरवा मुस्लिमानाः किं नाभूवन् हिन्दुदर्शने ।
मोहम्मदश्च नासीत् किं हिन्दूर्मुस्लिम–दर्शने ।। ४.२५।।
तस्मादिदानीं पृथिवीतलेऽस्मिन्
मनुष्यभेदो मतिविभ्रमो वः ।

ईशस्य सर्वे तनयाः, समानाः
सर्वे, स्वधर्मव्रतिनश्च सर्वे ॥४.२६॥

न कथमपि विषं सूते पयोधराभ्यां यवनजननी। नित्यममृतमेव प्रवहति ताभ्यां प्रतिपलम्। ऋते गर्भक्लेशान्न सूते काऽपि माता सन्ततिम्। कोऽपि बालकः हस्ते शस्त्रं समिधां वा धृत्वा जन्म न लभते। कथं विभजन्ते नेतारः जनान् साम्प्रदायिकेषु वर्गेषु स्वार्थलाभाय?

या माता यवनी पयोधरयुगे तस्या विषं नेक्ष्यते
गर्भक्लेशभरं विना प्रसविनी नो हिन्दुमातेक्ष्यते ।
नो शस्त्रं समिदेव वा करयुगे जातस्य संदृश्यते
तस्मात् किं ननु तद् यतो बत पुमान् पुंसो हि संभिद्यते ॥४.२७॥

नाटकस्यास्य पञ्चमाङ्के संजयगांधिनः प्रचाराय प्रवृत्तानां चलचित्रस्य नायकानां जानीवाकर–दारासिंह–दिलीपकुमार–प्रभृतीनां वक्तव्यानि सन्ति। संजयस्य पक्षमनुमोदयन्तस्ते कथयन्ति –

यस्मिन् जले मदकलः कलभो निमज्य
तिष्ठत्युपैति मधुपः स्वयमेव तत्र ।
त्यक्त्वेन्दिरावसतिमब्जकरालकोष–
मेष प्रमत्तचरितं हि ततः प्रयुङ्क्ते ॥५.२॥

कविरत्र उपदिशति सर्वानपि नागरकान् एवम् –

कोपो नरस्य मतिदुर्बलतां व्यनक्ति
धीराः स्थितिं न विषमेऽपि हृदस्त्यजन्ति ।
प्रावृट्पयःप्रहृतिमासहते कदापि
नो वामलूर उरुसारमपास्य शैलम् ॥५.३॥

षष्ठेऽङ्के नेतॄणां भाषणानि सान्ति। व्यवस्था तु तथाविधा यया प्रयोक्तॄणां क्लेशो नासादयति सत्ताम्। सर्वाणि भाषणानि आकाशवाणीतः प्रसार्यन्ते, ततश्च मञ्चे आकाशवाणीयन्त्रम्, यवनिकायाः पृष्ठतश्च

दूरध्वनियन्त्रेण लिखितस्य भाषणस्य वाचिकम्। भाषणानां भाषा तथा स्पष्टा ललिता च यथा समाकृष्यन्ते श्रोतारः।

सनातनकविः राष्ट्रस्य राजनीतेः स्वरूपमेवं निर्धारयति—

राष्ट्रं देवः, नीतिरेतस्य पूजा,
पूजाद्रव्यं त्याग—सत्यार्यभावः ।
एतत् सर्वं को नु नाद्य ब्रवीति
पूजामन्त्रान् किन्तु नो कोऽपि वक्ति।। ६.३३।।

नीतिमिमामाश्रित्य पूज्यत्वेन राष्ट्रदेवतामर्चयन्तु नागरकाः।

अत्र पूजासामग्रीरूपेण विद्यन्ते त्यागः, सत्यं आर्यभावेन प्रपूरिता मनुष्यबुद्धिश्च। सर्वेऽप्यत्र परिचिताः किन्तु नोत्सहन्ते एतैः द्रव्यविशेषैः मन्त्रोच्चारपूर्विकां राष्ट्रस्यास्य अर्चनां सम्पादयितुम्।

सप्तमेऽङ्के (१२५—१३९ =१४) संवादाः समानरूपेणाऽऽवर्जकाः। अयमेकोऽपरः सम्वादानां विशेषो यत् समवकारेऽत्र संवादानां श्लोकां—शमयत्वम्। पश्यन्तु पूर्वं मङ्गलनान्दीपद्यम्—(१.४—५)—

सूत्रधारः— **काञ्चीं मारकतीं पयोधिसलिलैः संबिभ्रती वर्त्मनाऽ**
नटी — **ग्रेसर्त्तुं श्रुतिसम्मतेन निविडोत्साहैकबद्धादरा ।**
सूत्रधारः— **सस्यश्यामवपुः सुदर्शनतनून् सर्वानृतून् पुष्णती**
नटी — **स्यन्दत्वत्र मधूनि सा भगवती सर्वसहा भारती ।।**
सूत्रधारः— **पक्षैमनिसवासिनां मृदुतमैः संवीजिता पक्ष्मलै**
नटी — **रामाभिस्त्रिदिवौकसां च करुणं संसेव्यमाना पदेः ।**
सूत्रधारः— **भद्रं सन्ततमातनोतु दयिता पैतामही साऽधुना**
नटी — **वंश्यान् संयतचेतसः प्रथयितुं राष्ट्रेऽत्र विश्वम्भरे ।।**

अत्र प्रतिपादं स्थापितमाद्यमक्षरं संकलयन्तु 'काङ्ग्रेसपराभवमि'—ति ततो निष्पद्यते पदम्। तदेव तु समवकारस्यास्य मूलभूतं नाम। नाम्नि काटवमपाटवमेव कविवटोरिति पराभवपदं परित्यक्तम्, काङ्ग्रेसपदात्

पूर्व योजितं च सप्तर्षिपदम्। तत्र ऋषयः सप्त भवन्तीति ७७ संख्याङ्क निष्पद्यते। सिद्धस्ततोऽर्थः। पराभवमुखमपश्यदेव नवतिवर्षप्राचीनं राजनीतिदलं काङ्ग्रेसं नाम सप्तसप्तिततमवर्षीयै संसन्निर्वाचने।

अष्टमेऽङ्के निषेधाज्ञायाः पश्यतात्र काश्यां कीदृगुपाय–मुल्लङ्घनम्। अत्र द्वितीये दृश्ये शवयात्राया एकस्या दृश्यं पश्यत। तत्र नागर एक प्रविश्य वक्ति जनतादलीयोऽहम्। किन्नु करवाणि! विमृश्य शोभनकमाह्वयति। अधुना शोभनक–पल्लवकौ मृतकमेकं दण्डा–वलम्बितमादाय मञ्चं प्रविशतः ब्रूतश्चोच्चैः–'रामनाम सत्यम्, रामनाम सत्यमि'–ति। आरक्षिणि पश्यति तौ शवं मध्येमार्गमेकत्र भूमौ स्थापयत, श्लोकत्रयं च वाराणसी महिमवर्णनपरं गायतः। आरक्षी तौ ब्रूते त्वरितमितोऽपसरन्तु निषेधाज्ञा प्रवर्त्तत इति। तदनन्तरं तेषां त्रयाणां श्लोकमयो विवादः। ततश्च शव उत्थाय नृत्यमारभते वदति च 'जितं जनतया जितं जनतयेऽति। शोभनकपालवकौ मृतोत्थितं तं प्रेतमिति घोषयित्वा प्रार्थनया प्रसादयन्ति, आरक्ष्यपि तावेवानुसरति 'अन्यथा मम गृहं प्रवेक्ष्यती'–ति भिया। राजारामशास्त्री क्षेत्रेऽत्र जनतादल प्रत्याशी, अन्यत्र काङ्ग्रेस प्रत्याशी जगजीवनरामः। अथ श्लोक –

त्रयोऽपि सत्यं रामो जयति जनतापक्षकामो
न राजारामो,
दान्तो भव, भव विभो! शान्तदान्तः
शवः कृतान्तः
पल्लवकः एवं तर्हि त्वयि वलिमिमं रक्षकं कुर्वह्णे, हा
आरक्षी हाहा नाहं बलिसमुचितोऽहं पलाये क्षमन्ताम् ।।८.१७।।

अग्रेऽस्मिन्नेवाङ्के सनातनकविना स्वीयः परिवारोऽपि पात्रीकृतः। पत्नी, पुत्रौ, पुत्र्यौ चेति पञ्च तत्र सदस्याः।

अत्रैव दशमेऽङ्के द्वाभ्यामपि नेत्राभ्यां रहितस्य रेवानगरस्थस्य शास्त्रिणो यमुनाप्रसादस्य दृश्यमत्यन्तं समुदारम्। शास्त्र्यसौ रीवानरेशस्य विरोधे प्रत्याशी। अकिञ्चनस्यास्य प्रचारसाहाय्यं स्वयं रीवानरेशः करोति। एकं कारयानं शास्त्रिणे प्रयच्छति। पराजिताय राज्ञे तद्दत्तं कारयानं प्रतिप्रदातुं शास्त्री प्रार्थ्यते राज्ञा विजयाय वर्धापनानि, कारयानमिदं भवन्तमेव सेविष्यते। अथ विश्वस्मिन् यत्रापि भवतां नेत्रयोश्चिकित्सा संभवेत् तत्र गत्वा चिकित्सां कुर्वीरन्, तस्य सर्वस्य व्ययमहं वोढे'–ति। तत्र श्लोक–

यस्मै ददाति हृदयं परमेश्वरः स
क्षोणीतलं व्रजति तस्य कृतेऽङ्गणत्वम् ।
सिन्धुश्च गोष्पदति वैश्रवणोऽपि तस्मै
निस्वायते विभवबुद्धिमतां वराय ।।१०.८।। इति

एवंविधान्येवात्र भूयांसि भवन्ति सुभाषितानि। संस्कृतस्य कृते सप्तमेऽङ्के पद्यमस्ति–

आदिक्रोडविवाहपर्वणि जगत्पित्रा धरित्र्यै मुदा
पूर्वं यौतकभावतः सुरगवी प्रादायि सर्वार्थसूः ।
सैषा सत्कवितेव धातृरचनामेतामतिक्रम्य 'तत्
तत्त्वं' स्फाटिकदर्पणे नु सुरसं प्रत्यक्षयत्यञ्जसा ।।७.२३।।

अन्यौ च द्वौ सुभाषितश्लोकौ पद्यमेतदनुवर्त्तेत। ततः शासनमालोच्यते–

१. साम्प्रतिके शासने प्रवर्त्तते गोवधः

२. गङ्गादिषु निपात्यन्ते मलमूत्रादीनि। तस्यास्य समर्थनं देवस्य प्रकोपायैव प्रकल्पेतेति–

भो भो धार्मिकबन्धवः शृणुत गां यां वत्सयुक्तामिमां
स्वं निर्वाचनचिह्नमद्य कुरुते देवीन्दिरा कूटधीः ।

सूनायन्त्रमसावनेकशतगोवंशघ्नमप्येधय-
त्यस्यै यन्मतदानमेतदपरं गोघातपापं न किम् ।।७.२७।।
इति, **अस्माकं मलमूत्रजातमपि यत् तीर्थाम्बुषु क्षेपय-**
त्यस्माकं धनतश्च यद् रययते मद्यापणानां शतम् ।
कीदृक् तन्नु शासनं, शतशतान्येनांसि दावाग्निव-
न्नीरन्ध्रं विनिपातयत्यहह नः कायेषु यत् प्रत्यहम् ।।७.२८।।
इति।

पत्रकार एकः कथयति— सर्वाण्यपि दलानि मामुत्कोचेन सिषेचिषन्ति अहं पुनः कस्मैचिन्न दास्यामि मतम्। जानुकसुन्दरकौ प्रविश्य कथयतः—

सुन्दरकः— **जानुक! नूनमेव गता वराकी प्रियदर्शनी।**

जानुकः— **सञ्जयोऽपि ब्रूडितः, गान्धारी अपीति ब्रूहि।**

सुन्दरकः— **मित्र!**

सत्ये लोकः श्रित इति मृषावादहीना मनीषा
शुद्धे बिम्बं मुकुरपटले शुद्धमेवावभाति ।
आस्यं रुद्धं भवतु, हृदयं किन्तु शक्यं न रोद्धुं
क्षुद्रस्यापि प्रमहति पदे विद्यमानेन पुंसा ।।७.२९।। इति।

कितवावारक्षिणे रूप्यकं दत्त्वा मुच्येते, अथ कथयेते—

रक्षाधिकारपुरुषास्तिलतोयदान—
मात्राधिकाररहिताः कितवस्य पुत्राः ।
द्यूताश्वमेधशतपूर्त्तिविसृष्ट-
पाशत्त्वङ्गत्तुरङ्गममिमे ह्यभितो भ्रमन्ति ।। ७.८।।

अथवा— **काका भवन्ति शुनका यदिवा समग्रा**
रक्षाधिकारपुरुषाः कितवेषु भूमौ।

द्यूताह्वये प्रतिदिनं प्रतिरात्रमस्मिन्नंशं
हरन्ति पितृकर्मणि ये सदैव ।। ८.९।।

अग्रे प्रोच्यते—

ज्यौतिषे कर्मकाण्डे च वैद्यके चार्थकारिताम् ।
मूर्खाः पश्यन्ति विद्या तु द्यूताख्यैवार्थकृद् विदाम् ।। ८.१०।।

अस्मिन्नेवाङ्के वाराणसी वर्ण्यते—

काष्ठाः! पश्यत पश्यतात्र मरतां मोक्षस्य सत्यापनं
मुक्तानामपि विश्वनाथमयतां प्रत्यक्षमाविष्कृताम् ।
अस्यां पायसपात्रपाणिरनिशं माताऽन्नपूर्णा शिशून्
सत्त्वं वीततमोरजस्कमुपदीकर्त्तुं सदैवोद्यता ।। ८.१३।।

अग्रे चोच्यते—

काश्यां राजा विश्वनाथोऽथ राज्ञी
दिव्यब्राह्मी संस्कृता सान्नपूर्णा।
मृत्युर्भूषासत्तमा सज्जनानां श्वासाः
पाशाः किञ्च, कोऽस्यां निषेधः।। ८.१४।।

अत्रैव कवेः संपूर्णः परिवारो नाटकपात्रायते।

नाटकस्यास्य भरतवाक्ये सनातनकविः कथयति—

यत्र प्रजायते राजा राजानति तथा प्रजा ।
मेरुपृष्ठायमानेऽस्मिन् राष्ट्रे स्वर्गोऽपि दासति ।।१०.४५।।

प्रजाजनं प्रकृतिहितेषु जागृयात्
प्रजाजनो निजमनुशास्तु संयतः ।
समर्च्यतां पुरुषहृदि स्थितो विराट्
स पूरुषः परिगतराष्ट्रभक्तिभिः ।।१०.४७।।

इत्थं लभते पूर्णतां महानाटकमेतत् राष्ट्रोन्नतिकामनया।

सनातननाट्यकृताभिलेखे शास्त्रशुद्धिमपि पश्याम:। पाण्डुग्रन्थेषु नाटकानामारम्भ आरम्भिकेण पद्येन क्रियते कर्त्तव्यस्तु पूर्वरङ्गाङ्गै:। स नियम: सप्तर्षिकाङ्ग्रेसे निरूढ:। अस्यारम्भ:—

सप्तर्षिकाङ्ग्रेसे

पूर्वरङ्ग:

पुष्करनान्द्यन्ते प्रविशति सूत्रधारो नटी च

सूत्रधार: चारीमाचरन्नवाङ्मुख एव आर्ये'। इति।

अयमप्येक: सनातननाटकानां विशेषो यदत्र केवलमेकैव भाषास्ति प्रयुक्ता। सा च संस्कृतम्। प्राकृतस्य नास्ति प्रयोग: सनातनस्य नाट्यकर्मणि।

इदमप्यत्र निध्येयं यदत्र नाट्यधर्मी प्रवृत्तिरपि शून्यप्राया। एतेन सनातननाटकेऽलौकिकत्वं नाशक्नोत् पदं लब्धुम्। सप्तर्षिकाङ्ग्रेसं यथार्थतया प्रत्यक्षं प्रस्तौति सत्तापरिवर्तनस्य सम्पूर्णमपि राजनीतिकं परिदृश्यं किन्त्वत्र इदमवश्यमेवावधेयं समालोचकै: यदत्र दत्तानि सर्वाण्यपि घातप्रतिघातमूलकानि वक्तव्यानि राजनेतृणां एव वर्तन्ते न च पुन: सनातनकवे:। कविप्रतिभा ताटस्थ्येन एतानि केवलं प्रस्तौति सहृदयानामवगमनाय। कवि: कथयति स्वयमेव—

निर्वाचनाख्ये रङ्गे यो नेतृपक्ष: स मञ्चति ।
जनपक्ष: पुनस्तत्र प्रेक्षागेहेति सर्वदा ।। ६.४२।।

सम्पूर्णमपि राष्ट्रं निर्वाचनसमये रङ्गमञ्चायते यत्र अभिनेतार: नटा: भवन्ति नेतार एव नानाराजनीतिकदलानाम्। जनताऽत्र ताटस्थ्येन सर्वानभिलक्ष्य सत्ताधिकारं प्रददाति कमप्येकम्।

सहृदयाञ्चितचेतोभि: संस्कृतज्ञै: निरपेक्षत्वेन अनुशीलनीयं **'सप्तर्षिकाङ्ग्रेस'** मिति महानाटकम्।

२. यूथिका –

यूथिकेति नाम्नी या सनातनकवेः द्वितीया नाट्यकृतिस्तस्यां रसः शृङ्गारः, नेता हर्षनामकः धीरानुदात्तः, नायिका यूथिकानाम्नी परिपक्वयौवना कन्या, वस्तु च शेक्सपीयरस्य 'रोमियो जूलियट'–नाटकाश्रितं वैदेशिकम्। नायकौ परस्परं विरुद्धयोर्वंशयोरङ्कुरौ। कस्मिँश्चिदुत्सवे जातान्योन्यानुरागाविमौ प्रेमिणोः पारतन्त्र्ये जुगुप्सां व्यञ्जयतः, विषपानेन च श्मशान–गर्त्ते निपततः। एतावतः कथावृत्तस्य चतुर्भिरङ्कैर्नाटिकारूपेण तथा सन्दर्भणं विहितं यथाऽध्येतुमारब्धाया आन्तं न शक्यते कर्त्तुं त्यागः। एवंविधविशेषा अत्र संवादा येषु लक्षणनामानो नाट्यसंवादधर्माः स्पष्टं दृश्यन्ते। श्लोकाश्च स्वाभाविकीं भाषागतिमनतिवाह्यैव प्रसादसम्पन्नाः। ८२पद्यानि प्रायेण सुभाषितान्येव।

नाट्यप्रयोगविषये कविः कथयति –

वैद्यो निदानं कुरुते, ददाति भैषज्यरत्नं च यथास्वशक्ति।
नैरुज्यमायुष्यवशं तु, तद्वन्नाट्यप्रयोगे यश ईशनिघ्नम्।।१.५।।

मान–लातयोर्वंशयोः वैरस्य परिणतिविषये कविः कथयति एवम् –

वैराणि शान्तिमृच्छन्ति गर्वध्वंसेन केवलम्।
राजा तत्राफलोऽपि स्यान्नियतिस्तु फलैकधुक्।।१.१०।।

यूथिकां तस्या धात्री शिक्षयति–

'मुग्धे! यौवनं च एकपत्नीव्रतं चेति बालिशानां दर्शनम्, अस्माकं पुनः प्रत्यग्रतैव जीवनम्'। ननु पश्य–

कीटा वयं करणतर्पणमात्रकार्याः
संज्ञा नरा इति तनोति भिदं न तत्र ।
तस्मात् सुते! कृपणतामपहाय कुर्याः
सार्थां तनुं विधिसृतौ घटितां चिरेण ।। ३.३३।। इति।

यूथिका पूर्वरात्रौ प्राप्तवती शय्यासुखं प्रियेण सह। अथ वियुक्ताऽऽत्मनः क्षुद्रतां प्रकटयति—

प्रीतिस्तृप्तिमियं गता, परिलघु स्वान्तं, कृतार्थानि मे
गात्राण्यस्तकुमारिका—व्रतपरीपाकाग्नि—दाहान्यथो ।
सौभाग्यं मम जीवति क्वचिदपिच्छन्नोऽपि कामं ततो
या जागर्त्ति तु सांप्रतं बत मयि क्षुद्रा बुभुक्षैव सा ।। ३.३६।।

इमां गर्धामग्रिमेण पद्येन गर्हयति नायिकामुखेन सुकविः—

किं जीवितेन, किमु वा पुनरुक्तिदुष्टे—
नैतेन गात्रदधिपात्रविमन्थनेन ।
वान्तस्य लेहमिव भुक्तचरस्य भोगं
श्वानश्चरन्ति कृपणाः, न पुनर्मनुष्याः ।। ३.३७।।

अग्रे च लब्धप्रियभोगाय भूयःसङ्गेच्छा 'पुरुषप्रभोगरोमन्थे'—च्छात्वेन निन्द्यते—

यूथिका— सर्वथैव चरितार्थजीवितास्मि *(आकाशबद्धदृष्टिः)* **भगवन् कृतान्त! परिरक्ष मामस्मात् पुरुषप्रभोगरोमन्थात् —**

यदिदं जन्म यश्चासौ मृत्युस्तौ अन्तपर्वतौ।
सौभाग्यमनयोः सेतुः तीर्णेऽस्मिन् किं न शिष्यते।। ३.३८।।

धर्मगुरुर्वैद्यः। तद्दत्तेवौषधयोगेन रात्रित्रयं शवगर्त्ते निद्रिता यूथिका भूयोऽपि गर्त्तखननात् परं निर्विण्णा विषं पिबति, तस्यार्धं नायकोऽपि पिबति। परस्परमाश्लिष्टौ च गतजीवितौ शवगर्त्त एव पततः। ततः पूर्वमेतयोरुद्गारोऽयमत्र भरतवाक्यतया नेतुं शक्यः—

संसार एष सुखमुच्छ्वसितु, स्मरौघो
नो विप्रतीपमुपधावति, साऽस्य जातिः ।
आवामवाप्त—चरितार्थ—समस्तभावौ
मुच्यावहे सुखमिमौ, प्रभवे प्रणामाः ।। ४.२५।।

आरम्भतोऽन्तं यावद् 'रोमैण्टिसिज्म'— नाम्ना प्रसिद्धो भावसान्द्रता—नामा भाव: स्थेमानं लम्भितो दृश्यते। संस्कृतं तस्याभिव्यञ्जने बाधकं न भवति। नूनं रोमियोजूलियटमाश्रितापि नाटिकेयं मौलिकत्वं न न बिभर्त्ति।

नाट्यशास्त्रस्यापि कतिपयानि तत्त्वान्यत्र सुकवि: स्पष्टयति। भारतेषु नाटकस्यारम्भ: केन विधिना भवतीति यूथिकाया आरम्भतो ज्ञातुं शक्यते। तत्र पूर्वरङ्गस्य नान्दीनामकमङ्गमनिवार्यं भवति, किन्तु नान्द्यस्तिस्रो भवन्तीति मालविकाग्निमित्रतो नाट्यशास्त्राच्च स्पष्टम्। यो हि प्रथम: श्लोकस्तस्यापि नान्दीत्वं, किन्तु सनातनमते सेयं मङ्गलनान्दी। तत्र द्वादश भवन्त्यङ्गानीति लेखकेन १,२,३ इत्यादीनङ्कान् स्थापयित्वा पादटिप्पण्या च स्पष्टीकृतानि—

यस्मिन्नास्ते धरित्री[१] गज इव नलिनी[२] दन्तलग्ना[३] त्रिलोकी
यस्योच्छ्वासेषु[४] वीचिष्विव तरलिततां[५] राजहंसीव धत्ते[६]।
यस्य स्तोत्रेषु वाणी[७] श्रयति निपुणतां[८] पञ्जरस्था शुकीव[९]
स श्रीमान्[१०] आदिकोलो घटयतु[११] भवता[१२]—मिष्टसृष्टिं महिष्ठाम्।।

अपूर्वेयं कृतिरिति नात्युक्तिरत्रेति शम्।

सनातनस्य गद्यसाहित्यम्

तिस्रो लघुकथा अपि अत्र गणयितुं शक्यन्ते ताश्च—

१. **त्रिपादी**
२. **कोऽयम्**
३. **कस्य दोष:**

'त्रिपादी', 'कस्य दोष' इति कथा—द्वन्द्वे मनुष्यस्य नियति—रुपस्थापिता सनातनेन श्लाघिता चैषा सहृदयै:।

अत्र <u>प्रथमा</u> लघुकथा **'त्रिपादी'** सहृदयैः भृशं श्लाघिता तत्र वस्तु द्वयोः छात्रयोः काश्यां शिक्षायाः पूर्त्तौ त्रिपादी (रिक्शायान)—माध्यमेन पुनर्योगः। एकः काश्यामेव विश्वविद्यालयस्नातको भूत्वा तत्रैव शास्त्राध्यापकः अपरश्च कबीरमठे दीक्षितः जनसेवकः। परः रिक्शाचालनेन जनसेवां करोति जीवने निःस्पृहतामाचरति अपरश्च स्वशास्त्रं सर्वतोभावेन। रिक्शाचालकः भाटकम् अगृहीत्वापि जनसेवां कुरुते येऽपि चाधिकं दातुं शक्नुवन्ति तेभ्योपि अत्यन्तमल्पमल्पमेव भाटकं गृह्णाति।

<u>द्वितीया</u> **'कोऽयम्'** इति या लघुकथा तत्राधुनिकाः समाजवादिनः पृष्टाः यो हि देहमात्रधारी परिश्रमेण प्रज्ञया च सम्पन्नं जीविनं यापयति तस्य गणना कुत्र करिष्यते—आढ्ये वर्गे उत दरिद्रे उत्तरं नाद्यापि प्रापि।

<u>तृतीया</u> कथा **'कस्य दोषः'** प्रस्तौति सद्योजातविवाहाया बध्वा बैधव्ये कस्य दोषः इति। वधूः मधुयामिन्यामेव गलेपाशितेन त्यक्तदेहेन भर्त्रा विरहिता। तत्र हेतुर्जिज्ञास्यते कथाकारः कल्पयति भर्त्तु क्लीवत्वं तत्र हेतुरिति। तत्र च हेतुः पितरौ विशेषेण च माता।

<u>चतुर्थी</u> कथा **<u>पुष्पलावी</u>** इति नाद्यावधि पूर्णा।

जीवनवृत्तम् —

चत्वारि गद्यमयानि जीवनवृत्तानि अपि सनातनकविना अनूद्य विरचितानि सन्ति। तद्यथा—

१. हुतात्मा पद्मिनी
२. महात्मा तुकारामः
३. समर्थः स्वामी रामदासः
४. सम्राट् अशोकः

एषु १—३ प्रकाशितानि सन्ति संस्कृतभारत्या। चतुर्थन्तु प्रकाशनं प्रतीक्षते।

०००

सनातनस्य संदेशः

खण्डकाव्येषु 'शरभङ्गे' स्वर्गापेक्षया यज्ञाग्नौ शरीरस्य होमो यदपि दर्शनं प्रस्तौति तन्नास्त्यद्यापि सम्यगधिगतम्। शरशय्याया अन्तिमा या शय्या सा खलु पितामहस्य भीष्मस्य। इच्छामृत्योरपि मरणेच्छाया अपरिहार्यत्वे कारणं जिज्ञासितः स स्वयमुत्तरति—'सम्प्रति पार्थिवी धरा नास्ति श्वसितुमुपयुक्ते'—ति। परमेश्वरं स्तुवानोऽपि वसुरूपो दिव्यदेहोऽसौ भर्त्सितः सनातनेन। पुरातनानां बुद्धमूर्त्तीनां तालिवानकृते विध्वंसे भगवतो बुद्धस्य वचनमाश्चर्यकृदेव 'वैनाशिक एष' ध्वंसकृद्भि—रुपासित एव इति। यवनराजकुमारीणामिच्छन्तीनामपि कुमारीत्वेनैव जीवनस्य बलाद् यापनं कियत्यै न वेदनायै? सा द्वितीयाप्यद्वितीया शरशय्या।

'अयि नीलनदि!'— शतके मृताय राज्ञे जीवितानामपि परिचराणां मृत्युगृहे निरोधोऽनन्यसदृशः। महानपि विभूतियोगो मृत्युं यावदेव स्वमिति या अपरिग्रहस्य शिक्षा सैव शतकेऽत्र मुखरा।

'रामपरिसंख्या'—संग्रहे 'रामस्य मुखान्निःसृताः शब्दा गाम्भीर्येण विचार्याः—'नाहं रामः, अहमपि दशास्य एव, जातोऽस्म्यहं वृथासायकः, सकामानां भक्तानां कामान् पूरयितुं सततं सचेष्टत्वात्। इति रामभक्तानां मुखे या चपेटा सा सनातनेन सम्यक् प्रत्युपस्थापिता।

शतपत्रनाम्नि कविताकाव्ये दार्शनिक्योऽप्युक्तयो रसनीयाः। तथाहि—

कविताशतपत्रचञ्चरीकी चितिरेषा क्षिपतीह यान् परागान् ।
प्रतिभान्ति त एव तत्र तत्र बहुधा दर्शनमौक्तिकानि भूत्वा ।। ९२।।
निगमागमसंज्ञकौ सुतौ द्वौ प्रतिभा पुंसविनी पुरः प्रसूय ।
प्रवयास्तपसा तु यां विलेभे तनयां तां कवितेति भावयामः ।।१०६।।
कवितोच्छ्वसितं त्रयीपुरन्ध्र्याः कविता स्वस्तिवचो मनुष्यजाते ।

कविता परमो विभूतियोगो विरजस्कस्य परात्परस्य पुंसः ।। ३२।।
कविता जनकात्मजा नमस्या न दशग्रीवभुजाटवी न लङ्का ।
सुहृदः कविता स कोऽपि वह्निः शिशिरोऽजायत यो विदेहपुत्र्यै ।। ४७।।
अथवा चितिदुर्गजौहराग्निज्वलितज्वालचये परं सतीभिः ।
लिखिता खलु या लिपिः स्वहोमैः कविता तत्र परिक्रमां तनोति ।। ६५।।

दार्शनिकीमेव भूमिकामवलम्ब्य सनातनस्य महाकाव्यान्यपि प्रारभ्यन्त। कुमारविजयनाम्नि सीताचरितानुजे महाकाव्ये भगवन्तमष्ट–मूर्त्तिमेवमसौ स्मरति–

त्वां सृष्टिं स्रष्टुराद्यां सलिलमिति बुधा संगिरन्ते, त एते
त्वामग्निं यज्ञकुण्डज्वलिततनुमथो त्वां हि वायुं वदन्ति ।
त्वामाकाशं वदन्तो विभुमवनिमपि त्वां वदन्त्योषधीशं
सूर्य्यं होतारमेकं सृतिविधिकुशलः सोऽष्टमूर्त्तिस्त्वमीश ।। ९.३२।।

भारतीयानां दर्शनानां वैषम्यसिषाधयिषया समुचितां सामग्रीं गवेषयतां ये भवन्ति विचारास्ते महाकाव्यस्यास्य दशमे सर्गे विस्तरेणोपस्थापिताः। तथाहि ११.२८ इत्यादयः श्लोकाः कं नु शिवानुध्यायिनं प्रहर्षसागरे न ब्रूडयेयु।

अनुप्रासादयोऽलङ्काराः, पृथ्व्यादीनि वृत्तानि च स्वातन्त्र्यसंभवस्य भूयांसं भागमभिव्याप्य तिष्ठन्ति। महाकाव्यस्य प्रवृत्तिः सैव या खलु लभ्यते श्रुतिषु। विश्वस्य स्वस्तिवचनं तत्र **'द्यौः शान्तिरि'**–त्यादिषु वचनेषु सर्वत्रैव प्रसिद्धा। 'तन्मे मनः शिवसंकल्पमस्त्वित्यस्यपरा प्रवृत्तिः सायं प्रातश्च सन्ध्योपासनेऽघमर्षणं' वैदिको धर्ममार्गः। तमेवैतं वैदिकं पन्थानमनुसिसर्त्ति स्वातन्त्र्यसम्भवकविः। अन्तिमे सर्गे त इमे स्वस्तिवाचनश्लोकाः प्रति संस्करणमुपस्थापिताः। तृतीये च पञ्चसप्ततिपद्यात्मके नूतनतमे संस्करणे नूतना अपि स्वस्तिवाचनश्लोका योजिताः।

कश्मीरेषु शैवागमिभिर्देवता अपि भूयस्य: कल्पिता:, तद्यथा 'परा, पश्यन्ती, मध्यमे'–ति वाग्रूपा नवनवा देवता:। एवमेव सनातनेनापि नवीनो विष्णु: कल्पित:–

आ दक्षिणाब्धिप्रसरं हिमाद्रेरेतां धरां व्याप्य समुल्लसन्तम् ।
अब्धित्रयाम्भ:परिधौतपादं वन्दामहे भारतवर्षविष्णुम्' ।। इति।

आ झाँसीराज्ञ्या आ चान्नाहजारे–महाशयात् व्यतीताया द्विशताब्द्या इतिहासोऽत्र कथावस्तु। एवं च महाकाव्यमिदं बहुनायकत्वेन गणयितुं सुशकम्, अथापि शृङ्गारस्यानिवार्यताऽप्यत्र कौशलेन निर्व्यूढा। सा हि 'जवाहरलालनेहरू'–जीवने लब्धुं शक्यते। दर्शिता च मुक्तिरपि तस्यैव। ततो मन्ये स एवैको नेता योऽत्र नेतृत्वेन कल्पितुं शक्य:। यत्र तु राष्ट्रस्यास्य बहुमान: स खलु विद्यतेऽत्र श्रीमान् शास्त्री लालबहादुर:। पत्यु: शरीरस्य निष्प्राणत्वे पत्नी विलपत्येव। श्रीमत: शास्त्रिणे धर्मपत्नीर्विलपति, किन्तु, देव्या अस्या उद्गारा धर्मपत्नीसमुचिता एव, न तु रतिसमुद्गारसदृशा: कुमारसंभवे। ते हि विंशतितमे सर्गे पठितुं शक्यन्ते।

विमुक्तिपथे पुर:सरता जवाहरेण किमनुभूयत इति सप्तविंशे सर्गे द्रष्टव्यम्। तत्रासौ अरविन्दमहर्षे:, तिलकस्य चच्छायां पश्यति। तदेवं राजकीयं स्वाराज्यमिव स्वातन्त्र्यपदेन विवक्षितं कैवल्यमपि स्वातन्त्र्यपदार्थत्वेन स्वातन्त्र्यसम्भवे दर्शितं सनातनेन।

त्रयाणामपि बृहत्त्रयीत्वेन प्राप्तविरुदानां महाकाव्यानां पद्यसंस्थानं निम्नलिखितक्रमेण ५५५६ इति वर्त्तते। तथाहि–

नैषधीयचरिते श्लोका:	२८३४
किरातार्जुनीये	१०४०
शिशुपालवधे च	१६८२ इति।
	५५५६

स्वातन्त्रसम्भवे पुनः सैषा ६०६४खण्डकाव्यादीनां श्लोकसंख्या पृथगेव।

त्रीण्यवदानकाव्यानि नः सत्यापयन्त्यात्मनो नामानि।

प्रथमे **हरिहरावदानकाव्ये** २६१पद्यानि वृत्तानां द्वादशविधैर्बन्धै स्वामिनां श्रीकरपात्रपादानां चतुरस्राण्यवदानानि पुरस्सारयन्ति, तेषां शरीरत्यागे च कथयन्ति—

मूका वाणी शिवरसमयी, रासलीला विलीना
जाताः सर्वा उपनिषदबलाः हन्त वैधव्यमग्नाः ।
साहित्यं वै समजनि समस्तागमाध्वाभिरिक्तं
जाते तस्मिन् हरिहरमहायोगिनि ब्रह्मलीने ।। २५३।।

द्वितीये **रत्नस्वरूपावदानकाव्ये** भवन्ति ३०७श्लोका, येषु पीठद्वयाधीश्वराणां स्वामिश्रीस्वरूपानन्दपादानां भवन्त्यवदानानि। अत्र स्वामिपादानां वर्णनमेवमस्ति—

एष प्रत्यग्रदेहो भवति ननु महान् रामदासः समर्थो
राष्ट्रं यस्मै महार्हं भवति न तु वपुर्नो गुणो नो कवित्वम् ।
आध्यात्मिक्येन यो वै जिगमिषति महावर्त्मना सर्वकल्ये-
नात्मारामत्व-सर्वोत्तम-मणि-निहिताङ्घ्रिद्वयोत्फुल्लपद्मः ।। २७।।

अथ च—

पूर्वं यौवनतो व्यधायि यतिभिः स्वातन्त्र्ययुद्धं श्रिता
कारा यैरथ यौवने धृतमहायोगैस्तपः केवलम् ।
तेषां साल—विशाल—दिव्यवपुषां साक्षात्क्रियामात्रतो
भक्तानामखिलान्यघानि हरतामेषां वदानं महत् ।। २५४।।

तृतीये च **श्रीजयेन्द्रसरस्वतीपादानामवदानकाव्ये** १२३पद्यानि भवन्ति। अत्र पल्लवनरेशानां प्रशंसायामुच्यते—

मायें! त्वं परमं पटुः, पटुतरास्ते पल्लवा भूभृतो
ये त्वामेव हि जिञ्जुरीशभवनैर्मायामयैरञ्जसा ।
प्रज्ञा पश्यति मार्गमप्यतितरां स्फीतं स्वनिर्व्यूढये
यस्मिन्नास्ति विपीलिकागतिरपि क्षेत्रे तथाणीयसि ।। ९२।।

अपि च—

अत्रत्याः पल्लवाख्या बत नृपतिवराः सन्ति साम्यानुसाम्यो-
त्तीर्णाश्चातुर्ययोगे त्रिगुणरसनयाऽबन्धि यैस्त्रैगुणी हि ।
अर्था माया मनुष्यैरपि नृपतिवरैरर्थयोगोत्तमैर्य-
न्मायैवाऽकार्यमाया भगवदवसथैर्निर्मितैरद्वितीयैः ।। ८९।।

काञ्चीस्थितस्य सर्वज्ञपीठस्याधीश्वराणां स्वामिश्रीजयेन्द्रसरस्वतीनां कृते शृण्वन्तु—

निगमविपिने गर्जत्पञ्चाननः, कलिकल्मष—
प्रबलतमसि भ्राजत्प्राचीललाटतटांशुमान् ।
प्रसृमरगतौ मृत्यौ मृत्युञ्जयः परमेश्वरो
जयति जगति श्रीमान् मान्यो जयेन्द्रमहायतिः ।। ४२।।

श्रीमतां जयेन्द्रसरस्वतीपादानां काञ्ची नूनं तैरेव नूतनीकृता नगरी एतदुच्यते काव्यस्यास्य प्रावेशिक्याम् एवम् —

या काञ्ची नगरी बभूव कतिचिद् वर्षेभ्य एवाधुना
पूर्वं ग्रामसमानवैभवभरा तस्या दशा साम्प्रतम् ।
यैर्दिव्यत्वमवापिता भगवतां वर्यैर्जयेन्द्रैरिमे
कैर्वा शाब्दिकडम्बरैर्गुणिगणस्तोत्रैस्तु पूज्या बुधैः ।।

एवञ्च—

काञ्च्यामासीद् वृषभशकटं चालितं यात्रिकाणां
सौविध्ये साम्प्रतं वै प्रचलति नितरां रत्नभूतं तु यानम् ।

अध्वानो तेऽतिगर्त्ता अतिथिगृहमथो तादृशं साम्प्रतं वै
तत् सर्वं चिक्कणत्वातिशयितशुभं दृश्यमानं चकास्ति ।।

काञ्च्यां चतुरशीतिः सुरालया भवन्ति। तत्रोच्यते–

चतुरशीतिसुरायतनोत्तमोज्ज्वलतनुर्नगरी यदि काञ्चिका ।
ननु तया कतमा नगरी भजेदणुमितां समतामधुना युगे ।

काञ्च्या विशेषो गीयते–

न दिल्ली, नो मुम्बा, नहि कलिकता, नो मधुपुरी
प्रयाता दृङ्मात्रं हरति हृदयं सौहृदजुषाम् ।
पुरी काञ्ची त्वेषा व्यतिषजति चेतांसि तु तथा
यथा नो विस्मर्त्तुं प्रभवति जनोऽपि स्वपनगः ।।

मोक्षपुरीषु काश्याः परं काञ्च्येव गण्यते–

अयोध्या मधुरा माया काशी काञ्ची ह्यवन्तिका ।
पुरी द्वारवती चैव सप्तैताः मोक्षदाः स्मृता ।। इति

साहित्यशास्त्रस्य काञ्च्येव प्रथमं धामेति सदा स्मरणीयमेव। 'काव्यादर्श'–नाम्ना प्रसिद्धस्य 'काव्यलक्षण'–ग्रन्थस्य प्रणेता वैदिको गद्यविशारदो दण्डी तत्रैव जातः, जातश्चानन्यसाधारणप्रतिभो वक्रोक्ति–कविर्मूकस्तत्रैव।

महाकाव्य–खण्डकाव्यावदानकाव्यानामेषां श्लोकसंख्या एकादशीं सहस्राणामतिक्रामति। तथाहि–

महाकाव्येषु	७६६५ श्लोकाः
खण्डकाव्येषु	२८६५ श्लोकाः
अवदानकाव्येषु	०६९१ श्लोकाः
	११२२१

एषु प्रसीदति राष्ट्रिया चेतना, निषीदत्याध्यात्मिकी श्रीः, प्रहृष्यति मानवस्य चितिः, विषीदति च यमनियरूपस्य धर्ममार्गस्य विरोद्धृणां संसद्। कविता कोकिलायमानापि नीरक्षीरविवेककुशला हंसस्य धवला हंसवधूरिव काकोदरचूर्णने पटुः प्रचलाकिचञ्चूरपि सनातनस्य। पुरुषार्थवादी वैदिकोऽनुच्छृङ्खलश्च सनातनः स्वं कविकर्म प्रत्यभिज्ञापयति (शतपत्रम् ७२)–

कविता न सनातनस्य काचिन्मधुवल्ली मदनाय मद्यसूतिः ।
ननु सास्ति शिवप्रियाङ्गयष्टिस्त्रिदला काऽप्यमृताङ्गबिल्वपत्री ।।
कविता न हि हंसमात्रचञ्चूः पयसोर्या व्यतिभेदने नदीष्णा ।
कविता ननु सा मयूरचञ्चूरपि काकोदरचूर्णने पटुर्या ।।

'रामः कस्य'

इति **'रामपरिसंख्या'** नाम्नि ५४७ पद्यात्मके सनातनस्य प्रथमः प्रश्नः 'रामःकस्ये'–ति तत्र राम उत्तरति–

रामो वक्ति दशाननेन परितः क्षिप्ता नवा दर्पणा
एकं यत्र मुखं विभाति दशधा सर्वस्य कुक्षिम्भरेः ।
एतेष्वस्मि दशाननोऽहमपि तत् कृत्वाऽवधानोत्तमं
स्वात्मन्येव गवेषयध्वमनृतव्रज्यासु सत्यद्रुमम् ।। ८।।इति।

रामपरिसंख्यायाः षोडशतस्त्रयोविंशं पद्यं यावत् परिसंख्यायाः मालेव प्रस्तूयते। तत्र **षट् परिसंख्याः**, सर्वत्राप्यकल्पितं प्रातिभञ्च कवेरुत्तरम्। तथाहि–

१. रामः कस्येति प्रथमे प्रश्न उत्तरम्–

रामः कस्य न तस्य, यस्य न करे कौक्षेयकग्रामणी–
वैंलक्ष्येण विनैव लक्षयति यः शीर्षाणि धर्मद्विषाम् ।। २।।

२. अथ प्रश्नः 'धर्मः कस्ये'—ति। तत्रोत्तरम्—

धर्मः कस्य न तस्य यो न पुरतो धत्ते पदं पामर—
ध्वान्तोद्ध्वंसपरात्परं, चुलुकयत्यब्धीन् न वा शात्रवान्॥१६॥

३. अथ प्रश्नः—'धर्मः क' इति। तत्रोत्तरम्—

धर्मः कः परमेश्वरस्य चरितैराराधनं निर्मलै—
रन्तःसंयम—शान्ति—दान्ति—करुणा—मैत्री—मुदामोदिभिः॥१७॥

४. अथ प्रश्नः 'कस्तावत् परमेश्वर' इति। तत्रोत्तरम्—

कस्तावत् परमेश्वरः स खलु यो भूगोलमेतं हिर—
ण्याक्षोपद्रवमग्नमुद्भटमहादंष्ट्रो बिभर्त्त्यव्ययः॥१७॥इति।

५. अथ प्रश्नो 'भूगोलः खलु क' इति। अद्भुतमाकलयन्त्वत्रोत्तरमार्याः—

भूगोलः खलु को? मृदामुपचयः कश्चिन्न, कश्चिन्न वा
वारामेव समुच्चयो गगनवद् वेवेष्टि यः काश्यपीम्।
भूगोलः खलु स प्रकीर्त्तयति वै यस्मिन् कपर्दी गुणान्
कैलासे शिवया समं दशमुखोच्छेत्तुः सषाण्मातुरः॥१८॥

अत्र ये विशेषणार्थास्ते निविश्य समाकलनीयाः। अत्रैव प्रश्ने भूयोऽप्युत्तरं क्रियते—

भूगोलः खलु स प्रदीपयति यस्त्रैयम्बकं ताण्डवं
स्वर्ण्णोर्वीधर-कन्दरा-विल-मुखे व्यावल्गदात्मस्तवम्।
राधानूपुरसिञ्जितेषु मुरलीसंवादनां धारयन्
यं वा गोपवधू—दुकूलनिभृतः कृष्णः स्मरन् बाष्पति॥१९॥
भूगोलः स हि यत्र राजतितरां गङ्गोर्म्मिषिक्तः शिवः
काश्यां वैदिकसौगतार्हतनयव्यापारवान् पण्डितः।
वल्मीकस्य पिपीलकोऽपि कवितां ग्रथ्नाति रामायणीं
यस्मिन्, यत्र च रावणः प्रतिगृहं चञ्चूर्ण्यते प्रत्यहम्॥ २०॥इति।

यत्र वै रामायणी कथा प्रत्यहं प्रतिगृहं भवति, महाभारतीया वा

तस्य भूक्षेत्रस्य भूगोलत्वम्, नान्यस्येत्यत्र तात्पर्यम्।

६. अथ प्रश्नौ 'रामः क' इति। अत्रोत्तरं दीयते–

रामः कः स्वमुदाचिकीर्षतितरां यः स्वेच्छया भञ्जयन्
संसारं स्मर-रुद्र-सङ्गर-महानाट्येषु सामाजिकः/कम् ।
नो हिन्दूर्न च मुस्लिमः प्रभुरसौ रामः पृथिव्याः सुतां
रक्षोभ्यस्तु रिरक्षिषुः स भगवान् धत्ते तनुं मानुषीम् ।।२१ ।।

बहु विलप्य रामः स्वयमेवोद्गिरति–

यद् बाहुमत्यमतमद्य करोति राज्यं
युक्तं दशाननकुलं हि तदर्थमासीत् ।
मन्ये ममैव हि दलं विमतायतेऽद्य
रामो हि सम्प्रति वृथा न दशाननस्तु ।। (रामपरिसंख्या ६२)

अस्यामेव कवितायामग्रे माता सीतैव भुवो गर्भतः प्रादुर्भूय विलपति। रामस्य सीतां प्रति वेदनापूर्णामिमामुक्तिं पश्यत–

सीता माता क्षिपति नयने दीर्घदीर्घे सबाष्पा
द्रष्ट्वा रामं विलयसमयेऽप्यस्मिताजुष्टमेव ।
रामो ब्रूते नयनसलिलैरुद्वमद्भिः प्रिये! त्वं
मुक्ता कीटैर्दशशतमुखैर्दश्यमानो म्रियेऽहम् ।।

(रामपरिसंख्या ७०)

सर्वेष्वप्येतेषु काव्येषु सनातनकविः मानवजीवनस्य विविधान् पक्षानाश्रित्य छन्दोमय्यां वाण्यां स्वविचारान् प्रस्तौति सम्पूर्णेऽपि जगतीतले कवितास्वादपरायणानां सहृदयानां विचारणाय। अत्र वैविध्यं प्रतिपलं संदृश्यते। प्रतिपद्यमत्र नरीनृत्यति कविप्रतिभापदवीमारूढा साक्षाद् भगवती शारदाम्बा।

००००

महामहोपाध्यायद्विवेदानां काव्यशास्त्रीयं नाट्यशास्त्रीयं च वैशिष्ट्यम्

प्रो. सदाशिवकुमारद्विवेदी

आधुनिकस्य संस्कृतकाव्यशास्त्रस्य काव्यं नाट्यञ्चेति द्विविधेऽपि क्षेत्रे विद्यतेतरां महत्त्वपूर्णमविस्मरणीयञ्चावदानम् आचार्याणां श्रीरेवाप्रसादद्विवेदिनामिति सर्वेऽपि काव्यशास्त्रतत्त्वविदः विदन्त्येव। **काव्यालङ्कारकारिका, नाट्यानुशासनम्** (पञ्चपर्वात्मकं), **अलं ब्रह्म साहित्यशारीरकम्** चेति चतुर्ष्वपि ग्रन्थरत्नेषु काव्यशास्त्रस्य नाट्यशास्त्रस्य च महतीं परम्परां समवेक्ष्य मीमांसाशास्त्रं चाश्रित्य काव्यनाट्योभयशास्त्रक्षेत्रे आचार्यवर्येणानेन संस्थापिताः सन्ति अनेके नवीनाः सिद्धान्ताः। सिद्धान्ताञ्चैतानधिकृत्य जायन्ते शोधकार्याणि शिक्षासंस्थानेषु सम्पूर्णेऽपि राष्ट्रे।

१. काव्यालङ्कारकारिका[१] —

१.१ काव्यलक्षणम् —

एकषष्ट्युत्तरशतद्वयकारिकात्मिकायां काव्यालङ्कारकारिकायामाचार्य–द्विवेदिनः काव्यस्य सर्वपारिषद्यं मंगलगर्भञ्च लक्षणमेवं कुर्वन्ति —

आनन्दकोषस्योल्लासे लोकोत्तरविभावना।
अलंकृतार्थसंवित्तिः कविता सर्वमङ्गला।। १ ।।

आनन्दकोषस्योल्लासे लोकोत्तरविभावना अलंकृतार्थसंवित्तिरेव काव्यम्। सर्वेष्वपि सहृदयेषु विद्यमानस्य आनन्दकोषस्योल्लासे विभावनाख्यं लोकोत्तरं सामर्थ्यं बिभ्रती अलंकृतार्थसंवित्तिरेव कव्यपदभाक् भवतीति आचार्यद्विवेदिनां सिद्धान्तः। अत्र आनन्दकोषो वेदान्तेषु प्रसिद्धः। संवित्तिश्चाात्र चित्कलापरपर्यायो विमर्शः। तस्याम् अलंकृतोऽर्थः विशेषणम्। अर्थपदेनात्र शब्दश्चार्थश्चेति द्वितयमपि

गृहीतं, शब्दस्यापि भावपदार्थत्वेन अर्थत्वस्य अक्षतत्वात्।

काव्यार्थश्चासौ संविदेकरूपः।

लोकोत्तरत्वञ्चास्य काव्यमात्रैकलभ्यमानत्वाद्

विभावानुभाव्यभिचारिसामग्रीकत्वाच्च। काव्यलक्षणस्यास्य सर्वास्वपि परिषत्सु ग्राह्यत्वं, आनन्दकोषस्य सर्वास्वपि समत्वेन समादृतत्वात्।

अलङ्कृतार्थसंवित्तिरित्युक्त्या स्मारिताः स्मः कुन्तकस्य सालङ्कारस्य काव्यता इति प्रतिज्ञाम्।

आनन्दकोषस्योल्लासः त्रिविधः –

१. **उपमादिविच्छित्तिविशेषविषयकत्वेन**

२. **वस्तुमात्रविषयकत्वेन**

३. **शृङ्गारादिरसविषयकत्वेन** च।

उच्यते च काव्यालङ्कारकारिकायाम्–

आनन्दकोषस्योल्लासस्त्रिविधः परिकीर्त्यताम्।
औपम्यादि, रसं, वस्तु वा यतो विसिनोति सः।। २।।

त्रिविधोऽप्येष रसगर्भः, रसानुभवे मात्रामात्रकृतभेदत्रयात्मकत्वेन।

उल्लासस्त्रिविधोऽप्येष रसत्वेनैव कीर्त्यताम्।
मात्रामात्रकृतं भेदमवलम्ब्य हि भेदवान्।। ३।।

एवञ्च स्मारिता वयं भोजराजस्य– **'स्वभावोक्तिश्च वक्रोक्ती रसोक्तिश्चेति वाङ्मयम्'** – इति सरस्वतीकण्ठाभरणालङ्कारवचनम्।

वर्त्तमाने चतुर्थे पादे विद्यमानस्य शतकस्य याः खलु साहित्यशास्त्रे सनानकिवभिः इदंप्रथमतया उद्भाविताः नूतना अद्भुताश्चोपलब्धयस्तासु देयमेव ध्यानं विश्वेन। ता इमाः–

'दण्डिनमारभ्य पण्डितराजं जगन्नाथं यावद् भूयांस्येव काव्यलक्षणानि संदृब्धानि। तेषु वादद्वयमेव परमं– 'शब्दविशेष–काव्यत्ववाद एकः, अपरश्च शब्दार्थयुग्मकाव्यतावादः। तत्र रसगङ्गाधरकविः पण्डितराज 'एको न द्वा'–वित्यादिभिस्तर्कैः 'शब्दार्थयुग्मतावादं खण्डयति। एतस्मिन्

खण्डने रसगङ्गाधरे गुरुमर्मप्रकाशकारो सर्वशास्त्रविन्नागेशभट्टोऽपि शिथिलतर्क एव। आनन्दवर्धनः पुनः 'शब्द'—पदं व्युपेक्ष्य केवलस्याऽर्थस्य वाच्यत्वेन प्रतीयमानत्वेन च यद् द्वैविध्यं तत्रैव दर्शयति वैदग्धीम् —

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।। ध्वन्यालोकः १.१।।

तत्र सर्वेषामेव यः परिक्लेशः स प्रत्यक्ष एव। अस्यां प्रस्तुतायां दशाब्द्यां क्लेश एष विराममापेदे ध्यानेनाधीत्य महर्षेः पतञ्जलेर्योगशास्त्रम्। योगशास्त्रस्य प्रथम एव पादे लभ्यते नवमं सूत्रम्—

'श्काब्दज्ञानानुपाती वस्तुशून्यो विकल्प'

इति।'

योगशास्त्रस्य सूत्रमेतदाश्रित्य सनातनकविभिः काव्यलक्षणविषये नूत्ननूत्नः कश्चन सिद्धान्तः प्रवर्तितोऽस्ति विदुषां विचारणाय एवम् —

'विकल्प इति चित्तवृत्तिविशेषः। शब्दज्ञानतो यस्यार्थस्य ज्ञानं स न भवति वस्तुरूपः, तत एवाग्निशब्द उच्चारिते न दह्यते जिह्वा, न च चूर्ण्यते विश्वं हिमालयशब्द उच्चारिते। काव्यार्थस्यापि सैव स्थितिः। अत एव कुमारसंभवं पठित्वा मोदमाना दृश्यामहे, दृश्यामहे प्रसीदन्तः सीताहरणेऽपि रामायणे। विकल्परूपैवाऽत्र सूर्पणखा, नासिकाच्छेदश्च तस्याः। द्रौपदीवस्त्रापहारे न क्रुध्यामो दुःशासनाय, न शपामो भीष्मादीन्। हन्त काव्यशास्त्रकृद्भिर्न ह्येव स्पृष्टो विकल्प एष, आर्थान्तरे 'विकल्प'—पदं स्वैरं प्रयुञ्जानैरपि। ननु पर्याप्तमिदं काव्यस्य लक्षणं 'चमत्कारी विकल्पः काव्यमि'ति।

विकल्पेऽस्मिन् वैदिका इव सौगता अपि योगशास्त्रसंवादिनः। तथाहि ध ार्मकीत्तिर्विकल्पमिमं समाद्रियते प्रमाणवार्तिके, तथैव च समादरमत्र दर्शयति वैदिको जयन्तभट्टो न्यायमञ्जर्याम् —

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः।
तयोरन्योन्यसम्बन्धः नार्थं शब्दाः स्पृशन्त्यपि॥

अथ शैवशास्त्रे प्रत्यभिज्ञायामुत्पलदेवोऽपि विकल्पपदं प्रयुङ्क्ते अन्येऽपि च विद्वांसस्तथैव विकल्पपदं समामनन्ति। अत्र केवलेन सनातेनैव दत्तं ध्यानम्।

१.२ काव्यकारणम् –

आचार्यद्विवेदिनः प्रतिभाया एव काव्यकारणत्वमामनन्ति काव्योत्पत्तौ, पण्डितराजजगन्नाथवत् –

कारणं प्रतिभा काव्ये सा चार्थप्रतिभासनम्।
प्रज्ञाकादम्बिनीगर्भे विद्युदुद्योतसोदरम्॥ ११॥[२]

अत्र खलु अर्थप्रतिभासनं नाम अदृष्टचरापूर्वकल्पितादिवस्तुदर्शनमपि। एतेन काव्यघटनानुकूलशब्दार्थोपस्थितित्वं प्रतिभायाः प्रत्याख्यातम्, उपस्थितेः स्मृतिप्रायत्वात्। ततश्च भाविवस्तुविषयाणां रामायणादीनां, सामयिकवस्तुविषयाणां हर्षचरितप्रभृतीनां, कल्पितवस्तुविषयाणां मेघदूतादीनां च प्रतिभानिरूपिता जन्यता न क्षता।[३]

मेघमालायां विद्युदुद्योत इव प्रज्ञायाम् अर्थप्रतिभासरूपा प्रतिभा प्रोद्योतते इति आचार्यद्विवेदिनां सिद्धान्तः। कादम्बिनीसादृश्येनात्र प्रज्ञायाः सरसत्वं पूर्णत्वञ्च चित्रितमस्ति आचार्यद्विवेदिभिः, विद्युदुद्योतस्य सादृश्येन च प्रतिभायाः प्रतिभासनमागूरितम्।

आचार्यद्विवेदिनां मते सा चैषा प्रतिभा द्विविधा–

स्वयंभूश्च सहेतुश्चेत्यसौ लोके द्विधा स्थिता।
आदिमाऽऽदिकवौ दृष्टा द्वितीयान्यत्र दृश्यते॥ १४॥

प्रतिभायाः स्वयंभूत्वमादिकवौ भगवति वाल्मीकौ संदृश्यते यस्य हि निषादविद्धाण्डजदर्शनोत्थः शोक एव **'मा निषादे'**त्यादिना पद्यकाव्यात्मना पर्यणामि। कालिदासप्रभृतिषु महाकविषु भगवत्याः शारदायाः प्रसादाज्जायमाना प्रतिभा सहेतुकी। प्रतिभाया अस्या उत्पत्तेर्भवन्ति भूयांसि अदृष्टव्युत्पत्त्यभ्यासरूपाणि

जनकानि पूर्वाचार्यप्रतिपादितानि, किन्तु करणत्वं तेषु प्रसिद्ध्यति, न पुनः कारणत्वं तस्य सत्वोद्रेकमात्रनियतत्वमिति आचार्यद्विवेदिनां सिद्धान्तः। उच्यते तैः —

द्वितीया या भवन्त्यत्र करणानि बहून्यपि।
कारणं तु भवत्यत्र सत्त्वोद्रेको हि केवलः।। १५।।

आचार्यद्विवेदिनां मते यथा मधूद्याने किसलयकुसुमादिसुषमा प्रतिवृक्षं भिन्नभिन्नैव चकास्ति तथैव सत्वोद्रेकस्य वैचित्र्येण प्रतिभाया वैचित्र्यं प्रतिप्रबन्धकाव्यं प्रायेण प्रतिपद्यं प्रतिसर्गञ्चावलोक्यते।

प्रतिभायाः कीदृग्विधं कारणत्वमित्यस्मिन् विषये आचार्योऽसौ काव्यं प्रति प्रतिभायाः निमित्तोपादानोभयकारणत्वं प्रतिपादयते—

उपादानं निमित्तं च काव्याय प्रतिभैव सा।
द्वितयं गर्भमात्रे यत् तस्यास्तिष्ठति तत् सदा।। १९।। इति।

आचार्यद्विवेदिनां मते अन्यद्धि ग्रन्थत्वम् अन्यच्च काव्यत्वम्। काव्यग्रन्थाः हि तांस्तानर्थबन्धानाश्रित्य संदृभ्यमाणाः शरीरभूताः काव्यत्वं पुनरर्थज्ञानत्वम्। काव्यस्य प्रकाशनं द्विविधं भवति अन्तरङ्गं बहिरङ्गञ्चेति। अन्तरङ्गं पुनः मानसं भवति अलंकृतार्थसार्थसंवित्स्वरूपम्। बहिरङ्गं च प्रकाशनं पाठरूपं लिपिबन्धस्वरूपं वा शब्दबन्धौपयिकम्। तत्र अन्तरङ्गभूतस्य आद्यस्य न कथमपि बहिरङ्गत्वं संविदो बहिरङ्गत्वस्यासम्भवात्।

१.३ काव्यप्रयोजनम् —

प्राचीनैरालङ्कारिकैः सुबहूनि सन्ति प्रतिपादितानि काव्यप्रयोजनानि। आचार्यद्विवेदिनां मते काव्योत्पत्तौ कवेर्नापि भवति किमपि प्रयोजनम्। तथा चोच्यते तैः —

प्रयोजनं कवेः काव्ये नापि किञ्चन दृश्यते।
चुङ्कृतौ कलविङ्कस्य यथा प्राभातिके क्षणे।। २०।।

चटका हि प्रभाते स्वत एव मुखरा भवन्ति, चन्द्रिकामापीय समुद्रोऽपि मुखरो भवति, तत्र कारणं भवति स्वभावः न तु प्रयोजनं किञ्चित्। तथैव कविरपि

काव्यनिर्माणमभिलक्ष्य निष्प्रोजनमपि प्रवर्त्तितुं शक्नोति।'नापि' इत्यत्र अपिपदात् आचार्योसौ काव्यस्य सप्रयोजनकत्वमपि स्वीकरोति,किन्तु सहृदयानां कृते।

आचार्यद्विवेदिनां मते रामायणकवौ कवितास्ति **आत्माविष्कारनैष्कर्म्यनैसर्गी**। नैष्कर्म्यं नाम फलासक्तिविवर्जितं कर्म। तदेव निसर्गः स्वभावः। तस्य च सर्वथैव अप्रयोजनकत्वात्।

पूर्वाचार्यैः स्वीकृतेभ्यो भिन्नानि अन्यान्यपि प्रयोजनानि भवन्ति कवितायां यथा युगावश्यकतापूर्तिः रघुवंशे रघूद्भवरूपा, धर्मरक्षा कुमारसम्भवे तारकासुरवधरूपा राष्ट्रदेवप्रबोधनमपि क्वचित् यथा गोस्वामितुलसीदासकाव्ये। तदानीमासीद् यवनशासनम्। आचार्या द्विवेदास्तु कथयन्ति तुलसीकाव्यं तदानीमासीद् यवनानामपि शासनम्।

युगावश्यकतापूर्त्तिमन्त्रव्यक्तिरपि क्वचित्।
प्रयोजनं रघुव्यक्ती रघुवंशे यथा कवेः।। २२।।
अधर्मोत्थानवेलायां धर्मरक्षापि दृश्यते।
काव्यार्थस्तुलसीकाव्ये यथा यवनशासने।। २३।।
राष्ट्रदेवप्रबोधोऽपि विश्वदैवतसाक्षिकः।
काव्यप्रयोजनं पुंभ्यः पुमर्थांश्चतुरो दुहन्।। २४।।

राष्ट्रदेवप्रबोधनेन परुषार्थचतुष्टयस्य सिद्धिः। एतदासीत् प्रयोजनं नाट्यवेदस्य रचयितुर् भरतमुनेः तदाश्रित्य प्रवर्तमानानां नाट्यप्रयोगानाञ्च। संगृहीतमेतेन साम्प्रतिकानां मुंशीप्रेमचन्दादीनामपि साहित्यस्य महत्त्वम्। रूसदेशे 'मदर' इति नामकेनोपन्यासेनैव संपन्नमासीत् जनानां जागरणम्।

सामाजिकानां कृते काव्यस्य मातृस्तन्यवत् सर्वार्थसाधकत्म् आचार्यद्विवेदिनां मते –

न स्यात् प्रयोजनं स्याद् वा कवेः, सामाजिकस्य तु।
मातृस्तन्यं यथा काव्यं हन्त सर्वार्थसाधनम्।। २६।।

१.४ काव्यात्मतत्त्वविवेचनम् –

काव्यात्मतत्त्वविवेचनविषये आचार्यद्विवेदिनां सिद्धान्तोऽस्ति यद् अलंभावात्मक अलङ्कार एव काव्यात्मा, तस्यैव काव्यनिष्ठत्वात्, नेतरेषां तेषां रसिकैकनिष्ठतायाः सिद्धान्तितत्वात् –

प्रमेयमात्रनिष्ठत्वादनयोरपि केवलः।
अलङ्कारो हि काव्यस्य धर्मतां याति मन्मते।।
काव्येऽलङ्कार एवात्मा स एवास्मिन् स्थितो यतः।
अन्यकायस्थितो धर्मः किमन्यत्रात्मतां व्रजेत्।।
एवं सति न कोऽपि स्यान्मृतोऽस्मिन् मर्त्यभूतले।
यावत् सर्वेऽपि निष्प्राणाः न भवेयुः शरीरिणः।। ४५–४७।।

आचार्यद्विवेदिनां मते रसस्य काव्यात्मत्वं न सम्भवति यतो हि रसः सामाजिकैकनिष्ठो भवति। अन्यकायस्थितस्य धर्मस्य नान्यस्मिन् आत्मत्वेन प्रतिष्ठापना सम्भवति। रसस्य काव्यात्मत्वेन पुनः अलङ्कारत्वमेव, तस्यापि अलंभावात्मकत्वादेव।

काव्यात्मभूतः अलङ्कारः आचार्यद्विवेदिनां मते अलंभावात्मक एव–

अलंभावो ह्यलङ्कारः स च सौन्दर्यतत्कृतोः।
विभक्तात्मा विभुर्जीवब्रह्मणोश्चिद्घनो यथा।। ४८।।

यथा एक एव चित्तत्त्वं जीवब्रह्मणोः अवभासते, यथा च एकमेव अग्नितत्त्वं सूर्याचन्द्रमसयोर् अवभासते तथैव काव्ये पर्याप्ततापरपर्यायपूर्णतारूपम् अलंत्वं सौन्दर्यजनकेषु सर्वेष्वपि काव्यतत्त्वेष्ववभासते। अलंकृतिरलङ्कारः इत्येषा सौन्दर्यस्य अभिव्यञ्जिका भावव्युत्पत्तिः (घञो भावकरणयोरेव), अलङ्क्रियतेऽनेनेति या द्वितीया करणव्युत्पत्तिः कर्मण्यणा तया पुनः सौन्दर्यनिष्पादकानाम् उपमादीनां काव्यतत्त्वानां सङ्ग्रहः। तृतीया अलङ्करोतीत्यलङ्कारः (अलं पर्याप्तं करोतीत्यलङ्कारः) इत्येषा या कर्तृव्युत्पत्तिस्तत्र सौन्दर्यस्य सौन्दर्यजनकानामुपमादीनाञ्च सर्वेषामेव संग्रहः। तृतीयैवेषा व्युत्पत्तिः आचार्यवर्यैः समाम्नाता अलङ्कारपदस्य काव्ये। व्युत्पत्त्यन्तराण्यपि संभवन्त्यस्यालङ्कारपदस्य।

१.५ अलङ्कारस्यावाच्यत्वम् —

ध्वनिसंस्थापकैः आनन्दवर्धनादिभिराचार्यैः **'तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः'**(ध्वन्यालोकः१.३) इत्यत्र स्वीकृतस्य अलङ्कारस्य वाच्यत्वम् आचार्यद्विवेदिनां मते तर्कविरुद्धम्, अलङ्कारस्य वाक्यार्थरूपत्वात् वाक्यार्थस्य च संसर्गमर्यादया अवभासमानत्वात्। अलङ्कारोऽपि वाच्यत्वं नैव स्पृशति जात्वपि।

> **सौन्दर्यमात्रोल्लापेऽपि स्याच्चकृतिरन्यथा।।**
> **वाक्यार्थ एवालङ्कारो वाक्यार्थश्च समन्वयः।**
> **पदार्थानां स संसर्गमर्यादामात्रगोचरः।। ५३, ५४।।**

गुणस्वरूपविवेचनप्रसंगे आचार्याः पुनरपि प्रतिपादयन्ति अलङ्काराणामवाच्यताम्। सनातनमते यथा सनातनधर्मस्य दर्शनम्, आचारः, प्रायश्चित्तम् उपासना चेत्यादिभिः चतुर्भिः चरणैरवस्थितिं परिकल्पयन्ति ध र्मशास्त्रविदः तथैव काव्यात्मनि शरीरे सोऽसौ अलंकारः 'ध्वनिः, गुणः, उपमादयः रसः' चेति तत्त्वविशेषैः अवस्थानं लभते —

> **यथा सनातनो धर्मो दर्शनं सम्विधानकम्।**
> **दण्डनोपासने चेति चतुष्पात्त्वेन गाहते।।**
> **तथैव भगवानेषोऽप्यलङ्कारो ध्वनिं गुणान्।**
> **उपमादीन् रसांश्चापि काव्यकाये वगाहते।।** २१४—२१५।।

अलंभावात्मको अलंकारः इवादिभिर्यदि वाच्यो भवति तदा कथं नोत्पद्यते चमत्कारः इवादीनां प्रयोगमात्रेण कवितायाम् —

> **उपमादिस्वरूपेऽपि वाच्यतां न स्पृशत्यसौ।**
> **अन्यथा स्यादिवादिभ्यः केवलेभ्यश्चमत्कृतिः।। २१६।।**

अत एव न सम्भवति कथमपि ध्वनिवादिभिः स्वीकृता उपमादीनामलंकारजातानां वाच्यता तेषां वाक्यार्थरूपत्वात्।

१.६ काव्यस्य ज्ञानैकरूपता —

आचार्यद्विवेदिनः स्वीकुर्वन्ति यत् प्रतिभायाः ज्ञानैकरूपत्वात् तत्र जायमानस्य काव्यस्यापि ज्ञानैकरूपत्वमेव प्रमाणीभवति, न पुनः शब्दबन्धस्वरूपं

लिपिबन्धरूपं वा बाह्यत्वं कथमपि। तथाहि —

द्वैरूप्यं वस्तुमात्रस्य दृश्यते व्यवहारिभिः।
बाह्यत्वेन स्थितस्यास्य ज्ञानत्वेन स्थितस्य च॥
काव्यं ज्ञानैकरूपं हि बाह्यत्वं तत्र न क्षमम्।
प्रतिभा ज्ञानरूपा यत् काव्यत्वेन प्रकाशते॥ ६७, ६८॥

प्रतिभा हि ज्ञानरूपा। ततश्च प्रतिभायामुदितं काव्यमपि ज्ञानस्वरूपात्मकं, न बाह्यम्। उच्चार्यमाणताधर्मी शब्दो बाह्य एव, किन्तु सोऽपि ज्ञानात्मनैव काव्यत्वं भजति। आचार्यद्विवेदिनां मते काव्ये शब्दार्थालङ्काराः अपि तथैव बौद्धा एव भवन्ति, तेषु विद्यमानस्य प्राणभूतस्य चमत्कारस्य सचेतसामात्मन्येव जायमानत्वात्।

शब्दकाव्ययोः भिन्नरूपत्वमेव प्रतिपादयन्ति आचार्यद्विवेदिन एवम्—

यथा पात्रं च दुग्धं च भिन्नभिन्ने हि सर्वथा।
तथा शब्दश्च काव्यं च का न्वभिन्नात्मतैतयोः॥ ९०॥
यथा पात्रस्य भेदेऽपि दुग्धभेदः खपुष्पति।
तथा शब्दस्य भेदेऽपि काव्यभेदोऽश्मवृक्षति॥ ९१॥
प्रतिबिम्बात्मके शब्दज्ञाने भेदं सृजन्नपि।
अनुवादेषु शब्दस्य भेदः काव्यं न भेदयेत्॥ ९३॥

अनुवादेषु प्रतिबिम्बात्मिका भाषा भिद्यते न पुनः काव्यं कवेस्तात्पर्यभूतम्। आचार्यद्विवेदिनां मते शब्दज्ञानस्य शक्तिमत्त्वं न पुनः शब्दशरीरस्य, सत्यपि शब्दे नार्थावगमः क्वचिदिति। यदि स्वीक्रियते शब्दशरीरे शक्तिमत्वं तर्हि सम्पूर्णस्यापि विश्वस्य भाषा एकैव भविष्यति। भाषा पुनः दर्पणस्थानीयास्ति संविदैकरूपायाः काव्यकलायाः प्रतिबिम्बने।

यदि शब्दस्य देहे स्याच्छक्तिः सूर्ये प्रकाशवत्।
तदा विश्वस्य भाषाऽपि भवेदेकैव केवला॥ १६८॥
एवं काव्यस्य या भाषा यश्चार्थो या च तद्धियोः।
शक्तिः सर्वमिदं सम्वित्स्वरूपं न ततः पृथक्॥ १६९॥

प्रातिभी या कवेः सृष्टिः संविन्मात्रैकविग्रहा।
सैव काव्यकला तत्र भाषा भवति दर्पणः।। १८०।।

भाषा दर्पणरूपा भवति प्रतिबिम्बयितुं संविन्मात्रैकविग्रहभूतां कविसृष्टिम्।

१.७ दोषाभावपदार्थः —

आचार्यद्विवेदिनां मते काव्ये शब्दार्थयोजनाभ्यासजनिता पूर्णतैव दोषाभावः, यश्च भरतवामनादिभिः अन्यैराचार्यैः स्वीकृतचरः। भरतमते दोषाभावोऽस्ति गुणः, वामनमते च गुणाभावोऽस्ति दोषः। एतदप्युच्यते महामहोपाध्यायैः द्विवेदिवर्यैः एवम् —

शब्दार्थयोजनेऽभ्यासं विना नो पूर्णता भवेत्।
अपूर्णतैव दोषस् तद् दोषाभावश्च पूर्णता।। २०५।।

काव्ये दोषाभावः प्रागभावरूपो भवति। काव्यनिर्माणात् पूर्वम् कविबुद्धावपेक्ष्यते दोषाणां निराकरणाभ्यासः रसप्रतीतिबाधकस्य अनौचित्यस्य निवारणाय —

दोषाभावोऽप्यसावत्र प्रागभवातया स्थितः।
काव्यनिर्माणतः पूर्वं परीहारोऽस्य यन्मतः।। २०८।।

दोषाभावस्य प्रागभावरूपेण कविबुद्धौ जयमानत्वत् काव्यविषये नोत्पद्यते प्रश्न एव दोषसामान्यस्य दोषविशेषस्याभावस्य। प्रध्वंसाभावे स्वीकृते दोषाणामपाकरणानन्तरं काव्यमपि नवीनतामापद्यते एवम् —

ततश्च दोष–सामान्य–विशेषाभाव–संकथा।
अनुत्थानहता, सैषा प्रध्वंसं यदि संस्पृशेत्।। २०९।।
प्रध्वंसो दोषपङ्कस्य काव्यकायं कृतस्थितेः।
नैव सम्भाव्यते, तस्मिन् सति काव्यं नवं भवेत्।। २१०।।

१.८ रसतत्त्वाश्रयः सामाजिकः —

सनातनमते रसालंकारगुणादिभिः काव्यतत्त्वैः पूर्णतामापद्यमाना संवित्रूपेणावस्थिता चितिरेव कयापि विच्छित्या अलंकृतिमापन्ना काव्यपदभाग् भवति —

या चैषा पूर्णता—युक्ता सम्विन्नाम्नी नवा वधूः।
सैव विच्छित्तिसम्पन्ना काव्यभावं प्रपद्यते ।। २३०।।

काव्यस्य प्रभावः सामाजिकचितौ जायमानः रसपदवाच्यो भवति आह्लादैकरूपः। सोऽसौ रसः सहृदयधर्म एवावसीयते न पुनः काव्यधर्मः —

प्रभावो यस्तु काव्यस्य सामाजिकचिति स्थितः।
स रसः, स न काव्यस्य धर्मतां प्रतिपद्यताम्।। २३१।।

काव्यसमाजिकयोर्मध्ये भेदः वर्तते। सामाजिकः द्रव्यात्मकः काव्यञ्च ज्ञानात्मकत्वात् गुणरूपम्। रसः सामाजिके समुत्पद्यते तदाश्रितत्वात्। अत एव रसस्य काव्यनिष्ठता न सम्भवति। सामाजिके स्थितस्य रसस्य अन्यत्र काव्यशरीरे आत्मत्वं नैव सम्भवतीति सनातनस्योद्घोषः —

काव्यं सामाजिकश्चेति भिन्नरूपावुभावपि।
अन्यस्थितस्य धर्मस्य कथं स्यादन्यधर्मता।। २३२।।

काव्ये रसस्थितिविषये सनातनकवयः कथयन्ति यत् रसस्य ज्ञानैकरूपत्वात् चिदात्मता अत एव काव्यस्यापि ज्ञानरूपतायां तत्र सम्भवति रसस्थितिः। ज्ञानस्य चित्तवृत्तिरूपत्वेऽपि न रसक्षतिः मम्मटादीनामाचार्याणां मते रसस्यापि चित्तवृत्यात्मकत्वात् —

काव्यस्य ज्ञानरूपत्वे रसयोगोऽपि युज्यते।
ज्ञानस्यापि रसस्येव चिदात्मैकात्म्यदर्शनात्।। २३३।।
ज्ञानस्य चित्तवृत्तित्वेऽप्यस्ति नैव रसक्षतिः।
रत्यादेश्चित्तवृत्तेर्हि रसत्वेनाऽभिमानतः।। २३४।।

सनातनकवयः काव्यरसयोराश्रयाश्रयिभाववविषये अत्रोपस्थायन्ति दृष्टान्तमाश्रित्य सम्भावितं समाधानमेवम् —

आत्माब्धिः, शफरः काव्यं, रसश्चैव रसस्, ततः।
शफरे जलवत् काव्ये रसः केन नु वार्यताम्।। २३५।।

सहृदयस्य आत्मरूपिणि अर्णवे मत्स्यरूपेणावस्थितिं लभते काव्यं जलरूपेण च रसः। अतः काव्ये रससंक्रान्तिः कथमपि न वार्यते, मत्स्यस्य जलप्रवेश इव। अनेन काव्यरसयोर्धर्मधर्मिभावः विपरिवर्तते। रसः धर्मी काव्यञ्च धर्म इति निष्पद्यते। धर्मधर्मिभावः आश्रयाश्रयिभावेन समवायेन च सिद्धिं लभते। उभावपि सम्बन्धौ काव्ये न संघटेते अत एव काव्यरसयोर्मध्ये धर्मधर्मिभावस्य सिद्धिर्नैव सम्भवति।

सनातनमते काव्ये रसस्यालंकारता प्रमाणीभवति तस्य तदभिव्यंजकसामग्रीकत्वात्। एतेषां मते काव्ये रसस्यावस्थितिः कथमपि न सम्भवति यतो हि काव्ये सरसता तत्रस्थैः विभावादिभिर्निष्पद्यते तेन च काव्यस्य रसवत्ताऽप्यलंकारतामाप्नोति तेन च रसोक्तिरित्यलंकारोऽपि काव्यनिष्ठ एव प्रमाणीभवति। पूर्वसूरिभिरप्येवमाम्नातः —

सरसत्वं तु काव्यस्य विभावाद्यर्थयोजना।
रसवत्त्वं रसोक्तिश्च तस्माद् युक्ता ह्यलंक्रिया।। २४०।।

सनातनकवयः रसस्य प्रमातृनिष्ठतां स्वीकुर्वन्ति अलंभावात्मकस्य अलंकारस्य च प्रमेयनिष्ठताम्—

रसः प्रमातृमात्रैकनिष्ठोऽलंकरणञ्च नः।
प्रमेयमात्रनिष्ठात्म कलालोके परात्परे ।। २४४।।

सनातनमते कविः मेघत्वं प्राप्नोति काव्यरूपायाः वृष्टेः येन रसरूपि सस्यमुत्पद्यते सहृदयानन्दजनकम्। वृष्टिमात्रावलम्बिनः सहृदयाः अत्र चातकचञ्चुवदवतिष्ठन्ते—

वृष्टिः काव्यं, कविर् मेघः, सस्यसंपद् रसा इमे।
वृष्टि—मात्रैक—विज्ञाने वयं चातकचञ्चवः।। २५३।।

एते हि नवीनाः सिद्धान्ताः। एते खलु इदंप्रथमतया समुद्भाविताः सम्यक् परिशील्य काव्यशास्त्रस्य सम्पूर्णामपि परम्पराम् आचार्यद्विवेदिभिः

काव्यालङ्कारकारिकायाम्। एवमेवान्येऽपि भूयांसः सिद्धान्ता लभ्यन्ते कारिकायामस्यामुपनिबद्धाः। सनातनकविरेवं पर्यवस्यति काव्यालङ्कारकारिकायाम् –

भक्तिं विहाय च विहाय च भक्त्यभावं
ताटस्थ्यमात्रपरमेण जनेन योऽयम्।
स्वोपज्ञ आगम उपाधित काव्यवर्त्म–
न्यत्राऽपि सन्तु सुजना ननु मत्सगोत्राः।। २५६।।

२. नाट्यानुशासनम् (I-V)[4]

नाट्यानुशासनम्, भरतदर्शनम्, नाट्यशारीरकम्, कलासमाधिः, रसभोगश्चेति पञ्चपर्व्वात्मके अभिनवनाट्यसिद्धान्तानां प्रवर्तके **'नाट्यानुशासनम्'** इति नाम्ना प्रसिद्धे ४११कारिकान्विते ग्रन्थे आचार्यद्विवेदिना नाट्यशास्त्रविदां महतीं प्राक्तनपरम्परां समनुवीक्ष्य अनेके नूत्ननूत्नाः नाट्यसिद्धान्ताः प्रवर्तिताः सन्ति। तेषु केचन सन्ति –

२.१ नाट्यानुशासनम् –

नाट्यानुशासनस्य आदावेवाचार्याः रङ्गपीठस्य द्वैविध्यं प्रतिपादयन्ति। आकाशब्रह्मणि स्थितं **ब्राह्मं** भित्तिस्तम्भद्वारशीर्षमण्डपादिना आच्छादितं **वैष्णवञ्चे**ति द्विविधं रङ्गपीठम् –

आम्नातं द्विविधं यत् तु रङ्गपीठं महर्षिभिः ।
ब्राह्मं च वैष्णवं चेति तद् द्वयं परिभाष्यताम् ।।नाट्यानुशासनम् २।।
ब्राह्मं तु वेदिकामात्रमाकाशब्रह्मणि स्थितम् ।
भित्ति–स्तम्भ–द्वार–शीर्ष–मण्डपादि–विवर्जितम् ।। ३।।

आकाशब्रह्मणि स्थितत्वात् ब्राह्ममिति संज्ञा समीचीना रङ्गपीठस्य। अस्य मुक्तं दिगम्बरञ्चेति संज्ञान्तरद्वयमप्याचार्यैः प्रत्यपादि –

आकाशब्रह्मगर्भेऽस्य स्थितेर्ब्राह्मत्वकल्पनम्।
मुक्तं दिगम्बरं चेति वक्तुमेतत् क्षमं बुधैः।। ४।।

यद्वा दिगम्बरं पीठमित्येवाऽस्य प्रियाऽभिधा।
ताण्डवं तनुतेऽत्रैव मुक्तः कश्चिद् दिगम्बरः।। ५।।

दिगम्बरस्यास्य पीठस्य संकल्पयोनिता भवति। अत्र विश्वस्य वर्णलिंगवयोवंशपदभेदविवर्जितः निखिलो जनः नाट्यप्रेक्षणे अधिकारी —

प्रेक्षणेऽत्राधिकारी स्याद् विश्वस्य निखिलो जनः।
वर्ण–लिङ्ग–वयो–वंश–पद–भेद–विवर्जितः ।। ६।।

यथा मायया वेष्टितं ब्रह्म विष्णुरित्यभिधीयते तथैव स्तम्भमण्डपादिना वेष्टितस्य पीठस्य वैष्णवमिति संज्ञा —

मायया वेष्टितं ब्रह्म विष्णुरित्यभिधीयते।
वेष्टितस्य तु पीठस्य विष्णुपीठाभिधोचिता।। १४।।

आचार्यद्विवेदिनां मते प्रेक्षकाणां निवेशः रङ्गपीठं नेपथ्यगृहकञ्चेति मिलित्वा भवति नाट्यमण्डपस्य विधानम्। नाट्ये दृश्यश्रव्यत्वयोः रक्षा नितान्तमभ्यर्हिता भरतमुनिमते तथैव दृश्यादृश्योरपि प्रविभागः अभ्यर्हितः–

दृश्यश्रव्यत्वरक्षा स्याद् यावता तावदेव हि ।
प्रमाणं रङ्गशालाया मुनेरेतद्धि दर्शनम् ।। २१।। एवञ्च
मानाधिक्येऽपि शालाया रक्ष्ये चेच्छ्रव्य–दृश्यते ।। ३८।।

किं नाम तावत् नाट्यं भरतमुनेरित्यस्यां जिज्ञासायां कथयन्ति आचार्या द्विवेदिनः —

दृश्यादृश्यप्रविभागपूर्वा दृङ् नाट्यमिष्यते ।
येनापि विधिना तस्य निष्पत्तिः स मुनेर्मतः ।।

नाट्यानुशासनम् ३९।।

पाश्चात्त्येषु दृश्यादृश्यत्वयोर्मध्ये प्रविभागः महत्त्वं न बिभर्ति, तत्र गर्हितानामपि दृश्यानां नाट्ये समावेशात्। नाट्यमण्डपविषये आचार्याः कथयन्ति यदत्र भवेत् प्रेक्षकाणां निवेशः, रंगपीठं नेपथ्यञ्चेति भागाः–

प्रेक्षकाणां निवेशश्च रङ्गपीठं तथैव च ।

नेपथ्यगृहकं चेति त्रयं वै नाट्यमण्डपः ।। ४४।।

नाट्यमण्डपस्य निर्माणविषये– **'कार्यः शिलागुहाकारो द्विभूमिर्नाट्यमण्डपः। मन्दवातायनोपेतो निर्वातो धीरशब्दवान्।।'** (नाट्यशास्त्रम् २.८०) इत्येनं नाट्यशास्त्रस्य सिद्धान्तं समीक्ष्य आचार्यद्विवेदिनः **'चतुभूमिर्नाट्यमण्डपः'** इत्येतन् नवीनमेव मतमत्रोपस्थापयन्ति। नाट्यस्य एताः भूमयः सन्ति – रङ्गपीठम्, रङ्गपीठस्य उभे पार्श्वे (मत्तवारिणी), रङ्गशीर्षम् नेपथ्यञ्चेति। रङ्गपीठम्, परिक्रमाभूमिः, नेपथ्यं प्रेक्षकोपवेशनस्य च समावेशाच्चतुर्भूमिः नाट्यमण्डपः प्रमाणीभवत्येवम् –

पीठं, पीठस्य पार्श्वे च, शीर्षं नेपथ्यमेव च।
चतुर्भूमिः क्रियेतैवं शिल्पिभिर्नाट्यवेदिका।। ७३।।
पीठं परिक्रमाभूमिर्नेपथ्यं प्रेक्षकस्थलम्।
नाट्यशाला भवेदेवं चतुर्भूमिर्विभाजने।। ७६।।

नाट्यमण्डपस्य भौतिकं संविधानं निरूप्य आचार्यचरणाः अभिनयस्य पारमार्थिकम् उद्देश्यं विवेचयन्ति। एतेषां मते सर्वासामपि कलानाम् अस्ति ध र्मैकमूलकत्वम्। अनेनैव एताः लभन्ते अक्षुण्णताम्। धर्ममूलकतां विहाय अर्थमूलकत्वे सत्येतासां अर्थवत् क्षयः अपरिहार्यः। धर्ममूलकत्वेन नित्यत्वमुपक्रमते सर्वास्वपि कलासु इति सुदृढं प्रतिपादयन्ति आचार्याः एवम् –

अयं हि परमार्थोऽत्र योज्या धर्मेण वै कलाः।
अर्थेन योजितानां तु तासां दृष्टोऽर्थवत् क्षयः।। १०६।।
अर्थाश्रितेन शिल्पेन समृद्धानां हि तर्पणम्।
जनस्याराधनं कर्त्तुं कले! धर्माश्रिता भव।। ११२।।

'लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम्'[५] इत्येतन्मुनिवचनमवेक्ष्य सनातनकविभिरपि लोकस्य महत्त्वं सर्वातिशयरूपेण प्रतिष्ठापितमस्ति एवम् –

धर्मश्च लोकरूपोऽत्र लोक एव महेश्वरः।
यस्मै समर्पितां चान्द्रीं कलां कालोऽपि वन्दते।। १०७।।

सर्वासामपि कलानां पारमार्थिकं प्रयोजनमस्ति लोकचित्ते माधुर्यप्रतिष्ठा पारुष्यविनाशश्च यतोहि माधुर्येणैव अमृतत्वं भजते लोकः। सर्वे सामाजिकाः अहिंसां करुणाञ्चाश्रित्य जिजीविषन्ति तन्मूलकत्वान् स्नेहाञ्चितस्य माधुर्यस्य—

अस्ति चैतस्य सर्वस्य विज्ञानस्य प्रयोजनम्।
पारुष्यस्य क्षयाच्चित्ते माधुर्यस्य प्रतिष्ठितिः।। १०८।।
निदानं सम्पदामेकं माधुर्यं न तु पारुषम्।
बीजं प्ररोहति क्षेत्रे म्रदीयसि न तूपले।। १०९।।
व्यक्तिः समाजो राष्ट्रं वा सर्वं कालस्य केलिषु।
एकं माधुर्यपीयूषं पीत्वा सानन्दमेधते।। ११०।।
अहिंसां करुणां वापि माधुर्यैकफलां श्रितः।
मानवः स्नेहमात्रेण सर्वत्रैवाजिजीविषत्।। १११।।

नाट्यानुशासनस्य प्रथमाध्यायस्य अन्ते समुद्घोषयन्ति आचार्यद्विवेदिनः सानातनीं परम्परां यत्र प्रजातन्तोरविच्छिन्नप्रवाहात्मकः कर्मयोग स्वधर्मपदवाच्यो भवति। अत्र तितिक्षामाश्रितवन्तः विधिना नियोजिताः सर्वेऽपि सामाजिकाः कलासु अविच्छिन्नतामातन्वन्ति। तद्यथा —

धर्मो जीवति सर्वदा न हि जनो धर्मं विना जीवति,
धर्मो दोहनमात्मनः परपरीपोषाय सर्वसहैः।
धर्मो गेहपतिः शिलोञ्छमहिते यस्योटजे गर्भिणी,
जामात्रे तनुते स्नुषा रसवतीं, क्षेत्रे च पुत्रो हलम्।। ११३।।

२.२ भरतदर्शनम् —

'भरतदर्शनम्' इत्यस्मिन् आख्यायिकात्मना रचिते नाट्यानुशासनस्य द्वितीयोन्मेषे आचार्यद्विवेदिभिः नाट्यदर्शनमस्ति विस्तरेण विवेचितं, न पुनः कर्मकाण्डं यस्यास्ति प्राधान्यं नाट्ये इदानीं यावत्।

उज्जयिन्यां कालिदाससमारोहे समुपस्थिता विद्वांसो नटराजनाम्ना प्रसिद्धं भगवन्तं महाकालमुपेत्य नाट्यविद्यामधिकृत्य पृच्छन्ति नाट्यविषये एवम् —

उन्मीलय पुनर्देव वारमेकं दृशोऽद्य नः।
प्रत्यभिज्ञायतां येन वस्त्ववस्तु च तत्त्वतः।। ११।।
किं नाट्यं नाट्यशाला का प्रयोगस्य विधिश्च कः।
चक्षुरुन्मीलनं तत्राप्येषु कुर्या विशेषतः।। १२।।

कलिकालप्रभावेण खण्डितप्रतिभेक्षणाः जनाः परिभ्रान्ताः सन्ति भरतीयेषु वस्तुषु। तेषां चक्षुरुन्मीलनमपेक्ष्यते। भरतदर्शने कालविशेषजनिताः प्राचीनाध ुनिकत्वादिविकल्पाः व्यावहारिकतया समाहिताः सन्ति। भरतदर्शनरूपेण आचार्यद्विवेदिभिः प्रतिष्ठाप्यते यत् सर्वासां कलानाम् उद्देश्यमस्ति कालचक्रस्य प्रभावाज्जनचेतनायां भारतीयेषु वस्तुषु समुत्पन्नस्य विसंवादस्य विनाशः जनचेतनायाः विश्वबन्धुत्वसौन्दर्यपुष्करावर्तकैरभ्युक्षणञ्च –

विसंवादीनि चेतांसि येन संवादमाप्नुयुः।
नृणामेषा च माता भूः सर्पिणीत्वं जिहासतु।। १३।।
विश्वबन्धुत्व–सौन्दर्य–पुष्करावर्त्तकाः पुनः।
येन संप्लावयेयुर्नः पृथिवीं तेऽर्धविग्रहम्।। १४।।

नाट्यस्वरूपं व्याकर्तुं विद्वद्भिः प्रार्थितो भगवान् महाकालेश्वर एव नाट्यस्य सर्वतत्त्वरूपतां बिभर्तीति प्रतिपादयन्ति आचार्याः। नाट्ये पुनः प्रयोक्तुः, प्रयोगस्य तन्निष्ठायाः कलायाश्चेति त्रयाणां समानं महत्त्वं भवति। प्रयोगशास्त्रमात्रैकधि ायः कलायाः सरसत्वं विनाशयन्ति। सहृदयानां चेतसि कलामुखेन अनुभूयमानः अनन्दैकरूपः रसोऽत्र शिवरूप एवम् –

बिभो! बिम्बं भवान् नाट्यप्रयोगारम्भदीक्षितः।
प्रतिबिम्बं च शास्त्रं नः शब्दब्रह्मप्रतिष्ठितम्।। २०।।
प्रयोक्तारं परित्यज्य परित्यज्य च तत्कलाम्।
प्रयोगशास्त्रे श्रद्धालुः श्रद्धालुश्चैत्यमात्रके।। २१।।
मेयाधीनाऽत्र मानस्य प्रसिद्धिर्नाट्यवर्त्मनि।
मेयो रसः स च श्रीमान् भवानेव परात्परः।। २२।।

भवानेव विभावोऽत्र सानुभावः ससात्त्विकः।
स्थायित्वं वै भवानेव व्यभिचारिषु सेवते।। २३।।
भवानेव हि शृङ्गं तत् प्राप्य यच्चिति–षोडशी।
दर्पशान्त्या समं कञ्चिच्छृङ्गारं प्रतिपद्यते।। २६।।
देव! त्वमेव कारुण्य–तारुण्यं प्रतिपद्यसे।
भोग–भोगि–बुभुक्षाग्नि–प्लुष्टेष्वस्मासु कामिषु।। २७।।
रसाः सर्वे त्वयि श्रेष्ठ! यद्वा त्वं हि समे रसाः।
अत एव च वात्सल्यप्रेयांसौ त्वयि मत्कृते।। ३१।।
वेदास्ते भारती, काकुस्तव सप्त स्वराः प्रभो।
त्वमेवारभसे ब्रह्मन् द्वैतेऽद्वैतनृतिक्रियाम्।। ३३।।
विश्वात्मन्! विश्वमेवैतन्नाट्यवेश्म तवाऽत्र का।
भारताभारतीयत्वभेदकुत्सा मनीषिणाम्।। ४६।।

भारतीया मेधा जगत्यस्मिन् औचित्यान्वितं सौन्दर्यम् अन्विष्यति सर्वास्वपि कलासु –

चरन्तो मधु विन्दामो भारतीया इमे वयम्।
यत्र यत् सुन्दरं तस्मात् संजिघृक्षामहे तु तत्।। ४७।।

सनातनमते नाट्यस्य परमप्रयोजनं सहृदयानां करणग्रामतृप्तिरेव नास्ति। नाट्यविधिना तेषु प्रतिष्ठिता स्यात् काऽपि सात्विकी वृत्तिः करणाग्रामतृप्तिपूर्विका। अनेन लोके करणग्रामस्य क्षुधायास्तृप्तये मात्स्यन्यायो वृद्धिं नोपलभते न च प्रमाणीभवति कलायाः कालसर्पिणीत्वम्।

नाट्यस्य यज्ञरूपत्वान्नाट्यप्रयोगेण काऽपि अदृष्टोत्पत्तिर्जायते राष्ट्रे सहृदये नटे च –

नाट्य–प्रयोगो यज्ञश्च विधिमात्रानुवर्त्तनात्।
अदृष्टं किञ्चिदादुग्धे राष्ट्रे सहृदये नटे।। ९७।।

सनातनमते वेदाः महेश्वरस्य निःश्वसनरूपाः नाट्यञ्च तच्चेष्टितम्। अनयोः साहित्यं विश्वरूपेण नाट्ये प्रकाशते — **तव निश्श्वसितं वेदाश्चेष्टितं नटनं तव।**

साहित्यमनयोर्वैश्वरूप्यतः संप्रवर्त्तते॥१००॥

नाट्यविषये मातृत्वं भजते लोक एष अत एव नाट्यं लोकप्रतिष्ठितं भवेदिति द्विवेदिमहाभागानां सिद्धान्तः। नाट्यस्य लोकमूलकता तत्प्रतिष्ठापनाय अभ्यर्हिता —

लतायामप्यपत्रायां बहुमानो मनीषिणाम्।
यदि स्तन्यं भुवो मातुस्तस्या नाडीषु गत्वरम्॥१०३॥
अन्यथा तु सुवर्णेन निर्मितायामपि प्रभो!।
अपि कल्पलतायां मे नास्ति प्रीतिर्मृषात्मनि॥१०४॥

नाट्यप्रयोगे सिद्धिः अभ्याससाध्या। सनातनमते भगवत्कृपानुप्राणितोध्यवसायः नाट्यतपसि सिद्धिप्रदः। भरतमुनेः दृष्टिमिमाम् अनुमोदयति 'साधु साधिवति' उक्त्वा उज्जयिन्यां महाकलेश्वरः। भरतोऽपि नाट्यदर्शनमिदं प्रतिपाद्य तिरोधानं लभते। 'भरतदर्शन'मिति नाम्ना प्रसिद्धे नाट्यानुशासनस्य द्वितीयेऽस्मिन् उन्मेषे द्विवेदिमहाभागैः सम्पूर्णस्यापि नाट्यस्य भरतमुनिप्रणीतं दर्शनं विस्तरेण प्रतिपादितमस्ति।

२.३ नाट्यशारीरकम् —

नाट्यानुशासनस्य **'नाट्यशारीरकम्'** इत्यस्मिन् तृतीय उन्मेषे आचार्यद्विवेदिभिः आरम्भादीनामवस्थानां यत्नावस्थात्वम्, अर्थप्रकृतीनां फलावस्थात्वं सन्धीनाञ्च काव्यावस्थात्वं प्रतिष्ठापितमस्त्येवम्— **यत्नावस्था फलावस्था काव्यावस्था यथाक्रमम्।**

अवस्थेत्युच्यतामर्थप्रकृतिः सन्धिरेव च॥ ८॥

अत्र अर्थप्रकृतिपदस्य नवीनं व्याख्यानम् उपस्थापयन्ति आचार्या एवम्—

अर्थः प्रयोजनं तस्य स्वभावः प्रकृतिः स्मृतः।
प्रयोजनस्वभावस्य ततोऽर्थप्रकृति–श्रुतिः।। ९।।

अर्थपदेनात्र प्रयोजनं गृह्यते प्रकृतिपदेन च स्वभावः। अर्थ–प्रयोजनादयः शब्दा एकार्थकाः प्रकृतिशब्दस्थाने अवस्था–स्वभाव–दशादिशब्दानां प्रयोगवत्। नाट्यमुखेन अभीष्टार्थस्य प्राप्तिः यत्नादेवावसीयते। यत्नोऽपि द्विरूपः – मानसिकः शारीरिकश्च–

ईप्सितार्थस्य यो लाभो नासौ यत्नादृते भवेत्।
यत्नोऽपि मानसत्वेन शारीरत्वेन च द्विधा।।१३।।

मानसिकः यत्नः आरम्भपदवाच्यः। शारीरिकस्य यत्नस्य फलपर्यन्ताः चतस्रः अवस्था भवन्ति। यत्नः त्रिप्रकारकः – शुद्धः, पाकाभिमुखः पक्वश्च। शुद्धो उपाययोजनैकरूपः। पाकाभिमुखः द्विविधः– नैराश्योपबृंहितः आशोपबृंहितश्च। यत्नस्य नैराश्योन्मुखत्वे प्रधानफलस्य प्राप्त्याशा भवति आशोन्मुखत्वे च नियताप्तिस्तस्यैव–

त्रिधा स शुद्धः पाकाभिमुखः पक्व इति क्रमात्
उपाययोजनारूपः शुद्धोऽपायेन मिश्रणात्।
पाकाभिमुख्ये द्वैविध्यं नैराश्याऽऽशाभिबृंहणात्।।१५।।
तत्र नैराश्यमुख्यत्वे प्राप्त्याशात्वमिहेष्यते।
आशायाः प्रमुखत्वे तु नियताप्तित्वमुच्यते।।१६।।
नियताप्तिं निरुद्धाप्तिरिति केचन मन्वते।
तत्तु तर्कविरुद्धं च पारम्पर्येण चाऽमतम्।।१७।।

इत्थं फलोन्मुखिनः यत्नस्य आरम्भः, यत्नः, प्राप्त्याशा, निश्चिताप्तिः फलाप्तिश्च पञ्चावस्थाः भवन्ति प्रधानफलसिद्धिपर्यन्ता –

यत्नस्य पञ्चधाऽऽयामः फलपर्यन्तमीक्ष्यते।
आरम्भ–यत्न–प्राप्त्याशा–निश्चिताप्ति–फलाप्तिभिः।। २३।।

सनातनमते क्रियात्मिकाः भवन्ति नाट्यस्य सर्वा अपि पञ्च यत्नाद्यवस्थाः। तत्र कर्मत्वं भजन्ते बीजादयः पञ्चार्थप्रकृतयः फलावस्थोन्मुख्यः। तद्यथा –

अवस्था नेतृयत्नः, स क्रियेति प्रविभाव्यताम्।
अर्थस्य प्रकृतिः किञ्च कर्मेति न्यायपण्डितैः।। २६।।

नदीनद्यन्तरन्यायेन मुख्यकथायाम् अवान्तरकथायाः मिश्रणं भवति। सनातनमते अवान्तरकथानां स्रोतांसि भिन्नानि भवन्ति मुख्यकथातः। रामायणे रामसुग्रीवयोः कथा अवान्तरकथात्वं भजते –

यस्मिन् कथान्तरं नास्ति काव्ये तस्मिंस्तु केवलः।
बीजाङ्कुरफलन्याय एव मान्यो मनीषिभिः।। ३२।।

सनातनमते अर्थप्रकृतयः वृक्षौपम्येन अस्तित्वं लभन्ते नाट्ये बीजांकुरन्यायेन च ताः फलपर्यन्ततामाप्नुवन्त्येवम् –

बीजं बिन्दुपताकादिक्रमाद् याति फलात्मताम्।
नाट्यशास्त्रेऽपि संज्ञेयं समप्रज्ञैरुपाश्रिता।। ३७।।

पञ्चनाट्यसन्धयः पञ्चयुगात्मिका भवन्ति– बीजारम्भयोः मुखसन्धित्वम्, बिन्दुप्रयत्नयोः प्रतिमुखसन्धित्वम्, पताकाप्राप्तिसम्भवयोः गर्भसन्धित्वम्, प्रकरीनियताप्त्योः विमर्शसन्धित्वम् कार्यफलागमयोश्च निर्वहणसन्धिरूपत्वं नाट्ये भवति। तद्यथा –

बीजारम्भौ बिन्दुयत्नौ पताकाप्राप्तिसम्भवौ।
प्रकरीनियताप्ती च कार्यकार्यागमौ तथा।। ४१।।
निर्मिमाते कथांशं यं स सन्धिरिति कथ्यते।
यथाक्रमं मुखाद्याश्च तस्य भेदाः प्रकीर्त्तिताः।। ४२।।

'सम्बन्धविशेषत्वावच्छिन्नप्रतियोगितानिरूपितवृत्त–खण्ड–त्वावच्छिन्नाऽनुयोगिताकः संसर्गविशेषः सन्धिः, तत्त्वं च सन्धित्वमिति पर्यवसितम्।'

नाट्यस्य मुखप्रतिमुखनिर्वहणात्मिका त्रय एव सन्धयो भवन्तीति आचार्यद्विवेदिनां सिद्धान्तः –

तिस्त्र एव त्ववस्थाः स्युः प्रमुखास्तद्वदेव च।
अर्थप्रकृतयस्तिस्त्रस्त्रय एव च सन्धयः।।

बीजारम्भमुखं बिन्दुयत्नप्रतिमुखं तथा।
सोपसंहृतिकौ सन्धित्रयं कार्यफलागमौ।। ४३—४४।।

नाट्यशास्त्रे वृत्तिशब्दः नायकस्वभाववाचकः। अत एव नाट्यवृत्तयोऽपि नायकस्वभावमवलम्ब्य प्रवर्तमाना दृश्यन्ते एवम्— **नायकस्य स्वभावो यस्तस्य वृत्तिरिति श्रुतिः।**

चतस्रस्ता रसश्चासां नियामकतया स्थितः।। ५४।।
शृंगारे कौशिकी वीरे सात्त्वत्यारभटी तथा।
रौद्रेऽन्यत्र तु विज्ञेया भारतीति पुराविदः।। ५५।।
भारती काकुसाहस्रीसमृद्धा वचनक्रिया।
भाणाद्येकनटे नाट्ये तयैव हि रसोच्छ्रयः।। ५६।।

सनातनमते कलायां कलान्तरस्य प्रवेशः सौन्दर्यातिशयप्रवर्तको भवति। गीतनृत्यादयः कलाः नाट्ये अलंकारत्वं भजन्ते। नाट्यकलायाः सम्पूर्णमपि वितानं तदुपादानभूते सम्पूर्णेऽपि लोके आब्रह्मणः साक्षात्काराय प्रवर्तते। आत्मब्रह्मणः दर्शनाय नाट्यस्य प्रयोक्तारः यदि स्वधर्मनिरता भवन्ति तर्हि नाट्यस्य सदुद्देश्यता प्रमाणीभवति। अत एव बुद्धिशुद्धिरप्येपक्ष्यते नाट्याभ्यासाय तत्प्रयोगसिद्धये च—

यो नास्तिको भवति तस्य मतौ
प्रकाशज्योतिः कदा समुदयं भजते स धृष्टः।
आशावधूनिटिलसीमनि चूर्णकुन्तं
धातुं प्रभुर्भवति हन्त कदा सदार्त्तः।। ६३।।

२.४ कलासमाधिः —

नट—नर्तक—गायनेषु यः प्रयोगः संदृश्यते तत्राभिरूप्यं जन्यते कलामात्रेण यस्याः वासयष्टिर्भवति भावकस्य चेतना। नाट्य—नृत्य—गीतादिषु सर्वास्वपि कलासु तदभिव्यञ्जनाय प्रवृत्तानां नटादीनां चेष्टाश्रितं भवति रसतत्त्वम्। भावकाः सहृदयाः नटादीनां चेष्टामवलोक्य रसपर्यवसायिनीं चमत्कृतिमनुभवन्ति।

सहृदयचेतनायाम् आनुकूल्यजनकं रसतत्त्वं नाट्यादिषु कलासु अपरिहार्यरूपेणोपस्थितं संदृश्यते। कलामात्रजनितमेतदानुकूल्यं सहृदयानां चैतन्यमाच्छादयति। भरताभिनवगुप्तादिभिः प्रवर्तमानायां साहित्यशास्त्रस्य परम्परायां पातञ्जलयोगशास्त्रस्य विधिमपहाय कलाविषयकं चित्तस्यानुकूल्यं प्रातिकूल्यञ्च समाधानं नोपलभते। योगशास्त्रे महर्षिः कलानामाभ्यन्तरभेदाय तासु प्रतिष्ठितम् अन्तःकरणान्वितानामिन्द्रियाणां प्रत्याहरणसामर्थ्यं स्वीकरोति। सनातनमते सहृदयस्य अन्तःकरणावच्छिन्नानाम् इन्द्रियग्रामाणां प्रत्याहरणसमर्थां समाधिपदवाच्यां चैतन्योन्मुखीं प्रवृत्तिं जनयन्ति कलाः। तद्यथा –

विषयानभिधावताममीषां करणानां प्रति या चितिं प्रवृत्तिः।
ननु सा प्रतिपाद्यतेऽभियुक्तैरपरोक्षानुभवात्मनाऽऽत्मभूतेः॥ १०॥
कलया तनुभङ्गिमात्तगात्र्या यदि वा कण्ठरुतिप्रकल्पधात्र्या।
रस–भाव–विभावनातिशीति–प्रतिपत्त्याऽऽह्रियते तु भावकात्मा॥ ११॥
यदिदं हरणं तदेव किञ्चिन्निभृतं हन्त रहस्यमेव बुद्धेः।
प्रतितिष्ठति यत् समासु नित्यं व्यभिचारेण विना कलास्वमूषु॥ १२॥

कलाजनितः समाधिर्योगसूत्रसमर्थित एव समाधिः। कलागतानुकूल्यजनितः स द्रष्टुश्चित्तैकाग्र्यरूपः। तदुच्यते आचार्यवर्यैः यद् भवति नाट्यं मनुजस्य पूर्णतायाः प्रतिबिम्बम् येन सहृदयानां चितिः परमां विश्रान्तिं लभते। तद्यथा –

अत एव हि नाट्यमाहुरार्याः प्रतिबिम्बं मनुजस्य पूर्णतायाः।
अत एव च तत्र हि प्रतिष्ठां भजते चित्तविराम ईक्षकाणाम्॥ १४॥

सनातनमते कलान्तरैः समन्वितेन नाट्यानुवीक्षणेन सामाजिकस्य समाधयवस्थाप्राप्तिः स्वाभाविक्येव। नाट्यप्रयोगे व्यभिचारिभावानां समृद्धिः सर्वातिशयरूपेण संदृश्यते। अत्र विलयं लभन्ते नृत्य–गीत–चित्र– मूर्त्यादयः सर्वाः कलाः। व्यभिचारिभावानां समृद्धिः शब्दात्मकस्य काव्यतत्त्वस्य समुन्मेषेण जायते या खलु नैवोपलभ्यते कलान्तरासु नृत्यादिषु। कविताकलां विहाय प्रवर्तमानाः सर्वा अपि कलाः विच्छित्तिमात्रावसायिन्यः भवन्ति। कवितायाः समावेशात् सातिशयं प्राप्नुवन्ति एताः सहृदयानां चेतसि चमत्कृतिमुत्पादन्त्यः। सनातनमते कविः,

नटः, नर्तकः, गायनको वा सर्वेऽपि कलामाध्यमेन समाधेराधानं कुर्वन्ति वाण्याः अभिनयाङ्गहाररागादीनां कलामात्राश्रितानां समन्वयात्। तत्र –

कविना नटनेन नर्त्तकेन यदिवा गायनकेन शिल्पयोगात्।
वचनाभिनयाङ्गहार–रागैः स समाधिर्हि निधीयते कलाभिः।। २८।।

सर्वासु कलासु आनुकूल्यं प्रातिकूल्यं च जन्यते समाधितत्त्वेन। समाधिरत्र सेतुत्वं भजते एकरूपतां स्थापयितुं नटादिभिः अभिव्यज्यमानासु विविधासु कलासु –

इयमेव हि संगतिः समासामपि नाट्यादिषु दृश्यते कलानाम्।
इयमेव च कापि योगसिद्धिर्यमिनां नृत्यविदां स–सत्कवीनाम्।। ३१ ।।
कविना नटनेन नर्त्तकेन स्वर–विद्या–कृतिना च गायनेन।
उपधाय समाधियोगरूपं करण–प्रत्यवहारमाप्यते स्वम्।। ३२।।

करणानां प्रत्याहारात्मकेन समाधिना कवयः, नाट्यकाराः, नर्तकाः, संगीतविद्याविशारदाश्च आत्मलाभं कुर्वन्ति। इन्द्रियाणां प्रत्याहारात्मकः समाधिः समुत्पद्यते चितितत्त्वे कलानां समाहारेण। अनेन ब्रह्मास्वादसहोदरः आह्लादः समुपद्यते सहृदयानां चित्तेषु। भरतादिभिः मुनिभिः आर्षनेत्राभ्यां उपनिषत्सु प्रतिपादितं रहस्यभूतं तत्त्वं समुपलक्ष्य संयमिनां समाधिरूपोऽसौ मार्गः आविष्कृतः यत्र ''रसो वै सः'' इति सिद्धान्तः कलासृष्ट्यामपि व्याप्रियते–

भरतादिभिरार्षनेत्रपीताऽखिलविद्योपनिषद्भिरप्यणिष्ठा।
न हि न प्रविभाविता यतीनां सृतिरेषा रसमात्मतां नयद्भिः।। ४२।।

समाधितत्त्वं कलामात्रस्य उपेयं भवत्विति कामयन्ते सनातनकवयः एवम् –

सनातनमहाकवेस्तदिदमद्भुतं दर्शनं
कलासु नितरां शुभं बत समाधिमासेचयत्।
धरातल–सुमानुषान्तरिकतोष–संप्रेषणे
भवेद् यदि कृतक्रियं, ननु कृती समो मानुषः।। ४४।।

२.५ रसभोगः —

सामाजिकचिद्रूपः आनन्दांश एवात्र रसपदवाच्यः यत्र संपद्यमाना विभावादीनां योजनैव चित्तद्रुतिकारिका— **रसत्वं किमिति प्रश्ने चित्त्वमुत्तरमुत्तमम्।**

भावानां योजना तत्र शृङ्गारत्वादिसाधिका।। रसभोगः ५

आत्मतत्त्वस्य सच्चिदानन्दात्मकतायाम् आनन्दकलायाः स्वतःस्फुरणत्वात् सत्—चित्—तत्त्वयोरपि आनन्दाश्रितता प्रमाणीभवति —

आनन्दाख्या कला या वै स्वतः स्वस्मिन् प्रकाशते।
सैव मुख्याऽपरे ये द्वे कले ते त्वेतदाश्रिते।। ९।।

चित्तत्त्वस्य रसरूपतां प्रतिपादयन्ति आचार्याः यत्र रत्यादीनां भावानां योजनेन शृङ्गारादयः समुत्पद्यन्ते—

रसत्वं किमिति प्रश्ने चित्त्वमुत्तरमुत्तमम्।
भावानां योजना तत्र शृङ्गारत्वादि—साधिका।। १५।।

रामायणादिषु कथासु रामसीतादयः विभावत्वं भजन्ते। एते भावात्मका एव तत्र, न पुनर्द्रव्यात्मकाः चित्तत्त्वस्य विवर्त्तरूपत्वात्—

विभावो रामसीतादी रामायणकथाश्रिते।
नाटके, भाव एवासौ, न द्रव्यं, चिद्विवर्त्तनात्।। १७।।

कलायां विभावतया प्रतिबिम्बितानां सर्वेषां तत्त्वानां शिवत्वं स्वीकुर्वन्ति आचार्यद्विवेदिनः —

चित्रे शिवस्य नागोऽपि शिव एव विषी न सः।
पीयूषमात्रं सूते स रसरूपं शिवं परम्।। रसभोगः २०।।

कलामात्रैकनिष्ठः शिवस्य नागोऽपि कलायाः प्रभावेण अमृतमेव सूते न कथमपि विषम्। प्रतिक्षणं परिवर्तमानेषु सर्वेष्वपि भावेषु स्थायित्वमापद्यते चितितत्त्वस्य स्पर्शात्। चित्तवृत्त्यात्मकत्वेन सर्वेष्वपि भावेषु भावतत्त्वस्य महाव्याप्तिः समुपलभ्यते।

रसपदेन सामाजिकस्य चित्ते जायमानः आस्वाद इव अस्वाद्या विभावादयोऽपि गृह्यन्ते —

आस्वाद्यास्वादरूपत्वाद् रस एष द्विधा स्थितः।
प्रथमे भावरूपोऽसौ द्वितीये स्वादशब्दभाक्।।
इक्षुश्च्योतद्रवो लोके रस इत्यभिधीयते।
कामशास्त्रे प्रसिद्धास्ति निर्वृते रसदेशना।।
उच्यते रस आयात इत्येवं लौकिके रसे।
सोऽयमाभ्यन्तरो मोदस्तृप्तिमोक्षादिशब्दितः।। रसभोगः ५२,५३,५४।।

इत्येते नवीनाः नाट्यविषयकाः सिद्धान्ताः। सम्यक् स्थापिता इमे आचार्यैः पञ्चपर्वात्मके नाट्यानुशासने ।

३. साहित्यशारीरकम्[६] —

साहित्यशास्त्रे नवीनानां सिद्धान्तानां समुद्भावकैः आचार्यद्विवेदिभिः प्रवर्तितस्तृतीयः ग्रन्थोऽस्ति **साहित्यशारीरक**—मिति यत्रोपलभ्यते सम्पूर्णस्य साहित्यशास्त्रस्य किमपि नवीनं विभाजनम्। तच्चैवम् —

चतुर्धामसिद्धान्तः —

भरतादारभ्येदानीं यावन्निष्पन्ने भारतीये काव्यशास्त्रे भवन्तितरां भारतवर्ष इवैव चत्वारि धामानि। तत्राद्यं —

१. काञ्चीधाम यत्राऽविरभूतां भरतदण्डिनौ।
२. द्वितीयं कश्मीरेषु प्रसिद्धं शारदाधाम अत्राविरासन् भामहवामनोद्भटानन्दवर्धन— रुद्रटाभिनवगुप्तकुन्तकमम्मटादयः शब्दार्थयुग्मस्य काव्यतामुत्प्रेक्षमाणाः,
३. तृतीयं धारानगर्या महाकालेश्वरधाम यस्याचार्या धनञ्जय धनिक भोजराजाः,
४. चतुर्थं च धाम काशीधाम यस्मिन्नभूवन् मधुसूदनसरस्वती—पादाऽप्पय्यदीक्षितपण्डितराजप्रभृतयो महामतयः सन्ति च काव्यालङ्कारकारिकादिप्रबन्धानां रचयितारः सनातनपादाः। एतानि चत्वार्यपि धामान्याश्रित्य सनातन एवोद्गिरति —

वन्देऽहं भारतं वर्षं चतुर्धामप्रतिष्ठितम्।
वन्दे साहित्यशास्त्रं च चतुर्धामप्रतिष्ठितम्।। इति

काव्यम्, नाट्यम् साहित्यञ्चेति त्रयाणामपि पदानां वाच्यं काव्यमेव सत्यप्येतेषां त्रयाणामपि भिन्नप्रवृत्तिनिमित्तकत्वे। तद्यथा –

'ननु वेदवद्, देववद्, गुणवद्वा सुप्रसिद्धैव त्रयी परिभाषाणां साहित्ये काव्यमिति, नाट्यमिति साहित्यमिति चेति। आसु काव्यमित्यस्या प्रवृत्तौ शब्दः, नाट्यमित्यस्या अर्थः साहित्यमित्यस्याश्च सम्बन्धो भवति निमित्तम्। एतान्येव हि त्रीणि पदानि भगवतस्त्रिविक्रमस्य यैराक्रान्तमिदं विश्वं कणशः।'

अथ यः शब्दः स वेदादिरूपः, योऽर्थः स विभावादिरूपः यश्च सम्बन्धः स भाव्यभावकभावादिरूपः। एतत्त्रिकस्यैव कृत उद्गीर्यते– **'शब्दार्थौ सहितौ काव्यमि'**–ति। सनातनमतेन वक्तव्यमत्र **'शब्दार्थौ सहितौ नाट्ये काव्यमित्य–भिधीयते'** इति। प्रत्यपादि तथ्यमिदं तैस्तैः प्रमाणैरन्यत्र –

यदिदं साहित्यपदं तद्धि सम्बन्धं विसिनोति कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनेति। कस्य कयोः केषां वा सहितत्वमिति प्रश्ने काव्यनाट्यपदाभिधेययोरेवेति सुलभमुत्तरम्। एकस्यार्थो वचनव्यापारोऽपरस्य च नटव्यापारोऽवस्पन्दात्मा। ताविमौ वागर्थौ। पितराविमौ विश्वप्रपञ्चस्य। कन्या च कुमारश्चेमावसम्पृक्तौ। सम्पर्कश्च साहित्यमेवैकमुद्वाहरूपम्। सन्ततिस्त्वनयोर्वाङ्मयी भूतमयी चेति प्रतीतमेव पुरावित्सु। (साहित्यशारीरकम् पृष्ठ २४)

४. अलं ब्रह्म[७] –

'अलं ब्रह्म' इत्यनेन नाम्ना प्रसिद्धे चतुर्थग्रन्थरत्ने सङ्कलितानि सन्ति आचार्यद्विवेदिनां सर्वाण्यपि काव्यशास्त्रमधिकृत्य पञ्चदशवर्षेषु विलिखितानि शोधपत्राणि। एतेषु प्रमुखमस्ति **'अलं ब्रह्म'** इति संज्ञकं प्रथमं शोधपत्रं यत्र आचार्यवर्यैः काव्यतत्त्वात्मनि अलङ्कारपदे अलंपदस्य ब्रह्मवाचकत्वं प्रत्यपादि

साहित्यशास्त्रस्यागमे अग्निपुराणे अलपदस्य ब्रह्मणः वाचकेषु पर्यायत्वेन स्वीकृतत्वात्। अलङ्कारपदस्य नवीनामेव सर्ववाङ्मयप्रतिनिधिभूतां व्युत्पत्तिमुपस्थाय आचार्या इमे तत्र विचारयन्ति एवम् –

'अपूर्वमिदं महावाक्यं यदुत **'अलं ब्रह्मे'**–ति। वेदान्तानां प्रसिद्धमेव महावाक्यम् **'अहं ब्रह्मे'**–ति। यस्तावत् तस्यार्थः स एवाऽस्यापि नूत्नस्य महावाक्यस्य **'अलं ब्रह्मे'**–ति स्वरूपस्य। अहमिति वर्णमातृकायाः प्रत्याहारः अकारादारभ्य हकारं यावत् प्रसृतायाः। यथाा चेदं तद अभिनवगुप्तग्रन्थेभ्यः स्पष्टम्। 'अल'मित्यत्रापि प्रत्याहारत्वमेव पश्यामः। स च माहेश्वरस्य वर्णसमाम्नायस्य 'अइउ–ह' इत्येवंरूपेण प्रकाशितस्य। येयं वाङ्मयी सृष्टिः सा खलु वर्णसमाम्नायेऽस्ति समवेता। अर्थात्मिकाऽपि सृष्टिस्तादश्येव। साप्यस्ति 'अल्'–प्रत्याहारसमवेता। य एव हकारान्तो वर्णसमाम्नायप्रत्याहारः स एव 'लकारान्तस्त्रिभुवनप्रत्याहारः'। यथा चेदं तदपि 'आगम'–प्रमाणकम्। साहित्यशास्त्रस्यागमः 'अहङ्कारागम' इत्युदीरितस्तत्रभगवता 'अग्निपुराण'–कर्त्रा वेदव्यासेन। यथा चेदं तद्धि –

अक्षरं परमं ब्रह्म सनातनमलं विभुम्।
वेदान्तेषु वदन्त्येकं चैतन्यज्योतिरीश्वरम्।।'' अग्निपुराणम् ३३९।।

अग्निपुराणस्य सर्वेष्वपि संस्करणेषु नैवोपलभ्यते अलमिति पाठः। १९३६तमे ख्रीष्टाब्दे निर्णयसागरतः प्रकाशितस्य साहित्यदर्पणस्य परिशिष्टे प्रकाशिते अग्निपुराणे पाठान्तरविहीनः पाठ एष प्रकाशितोऽस्ति नान्यत्र। अग्निपुराणस्य अन्येषु संस्करणेषु अलमित्यस्य अजमिति पाठः समुपलभ्यते प्रकाशितः। अलमित्यस्य पाठस्य विषये विचारयन्ति एवमाचार्याः–

'अथ प्रश्नः अजालयोर्मध्ये को वा पाठो बलवत्तर इति। तत्राजपाठमेव प्रसिद्धं दृष्ट्वाऽनुमोदेरन्नार्याः, किन्तु पाठान्तरेऽपि न न विध्येयमेभिः। यदिदम् अलमिति पाठान्तरमिदमपि नितान्तं महत्त्वपूर्णम्। अस्य हि निष्पत्तिर्वैदिकाद् 'अरम्' पदादुत्प्रेक्षामहे। अरमिति अव्ययपदं

> संहितास्विवारण्यकेष्वपि सुलभमेव। तस्यैवास्य विकासः 'अलम्' इति भाषाविज्ञानवित्सु विदित एष पन्थाः। अस्य स एवार्थो यो हि 'अरम्' इत्यस्य। पर्याप्तिरेष्वन्तमोऽर्थः। लौकिके संस्कृतेऽपि अलधातुः प्रसिद्ध एव पर्याप्तये। पर्याप्तौ सम्पन्नायामनुभावो वारणम् 'अलम् अलम्' इति। स चायमर्थोऽमरकोषादिष्वपि प्रसिद्धः।'

अलङ्कारपदस्य व्युत्पत्तिविषये नवीनमेवोद्भावयन्त्यत्र सनातनकवयः। तेषां मते अलङ्कारपदे या प्रकृतिः सा ब्रह्मार्थप्रतिपादिका अलधातुनिष्पन्नाकारान्ता 'अल' इति वाक्। अस्यैव अलमिति द्वितीयान्तो यः निर्देशः सः अव्ययरूपो वा। सनातनकविना विचार्यते अलङ्कारपदे प्रयुक्तस्य **'कार'**—पदस्य विषये किमपि नवीनमेवैवम्—

> 'अथ **'कार'**—पदं किमर्थमिति प्रश्नः। करणार्थकात् कृधातोः करणार्थेऽधिाकरणार्थे वा प्रयुक्तेन घञा, अलङ्क्रियतेऽनेनेति, अलंक्रियतेऽस्मिन्निति वा कारशब्दार्थः। तदुक्तं सौन्दर्यमलङ्कारः, करणव्युत्पत्त्या पुनरलङ्कारशब्दोऽयमुपमादिषु वर्त्तत इति तत्रभवता वामनेन। कुम्भकार इतिवत् कर्मण्युपपदेऽपि शक्यव्युत्पादा परिभाषैषा। सन्ति भिन्नभिन्ना अन्या अप्यत्र प्राप्तप्रसरा व्युत्पत्तयः। किन्तु पृच्छाम **'ओङ्कार'** इत्युक्ते किमर्थकः कारप्रत्यय इति। ननु स्वरूपार्थक एव स इति चेत् किमपराद्धं तर्ह्यलङ्कारेण यदत्र **कारः** स्वरूपार्थाधिकारात् प्रच्याव्यते। ननु ब्रूमः **'अलमित्येवालङ्कार'** इति। एष विपर्यस्तः सर्वोऽपि विपर्यासः भूषणादीनर्थानभिव्याप्य विद्यमानः। प्राप्ताः स्मः 'अलं'—पदार्थम्। यश्चासौ चमत्कारो नासावतिरिच्यते ब्रह्मरूपादानन्दकलापरपर्यायादर्थात् सर्वत्रापि उपमादिभ्यो रसं यावत्।'

सनातनमते काव्यात्मतत्त्वभूतम् 'अलङ्कार'—पदं भगवता अपौरुषेयेण वेदेन ब्रह्मैवार्थतया निर्दिश्यते। रसरूपमर्थं काव्यात्मत्वेन प्रतिष्ठापयद्भिः ध्वनिवादिभिः अलङ्कारस्य कटककुण्डालिदवत् स्थितिं काव्ये प्रतिपाद्य अस्य प्रधान्यं यद्विनाशितं तदनुचितमेव। सनातनकवयः कथयन्ति अत्र – 'आग्रहग्रहिला.

स्तिष्ठन्त्यत्र ध्वनिमार्गिण: अलङ्कारत्वं रसत्वं चान्धकारप्रकाशयोरिव विप्रतिषिद्धमेव सर्वथेति।'

सनातनमते अस्ति साहित्यशास्त्रस्यागम: **'अहङ्कारागम'** इति। एतदपि प्रसाधितमेभिरग्निपुराणमेवाश्रित्य अत्रैव। काव्यशास्त्रस्य कृते क्रियाकल्पमित्यादय: पर्याया: पारम्परिकै: प्रयुक्ता:। काव्यशास्त्रस्य चतुर्दशसु विद्यास्थानेषु गणनापि न भवति। कथयन्ति पूर्वपक्षिण: आगमोऽत्र अन्वेष्टव्य:। सनातनमते अग्निपुराणस्य अन्ते साहित्यशास्त्रस्यागम: 'अहङ्कारागम' इति निर्दिश्यते एवम् —

> **'अहङ्कारो निघण्टुश्च शिक्षाकल्प इहोदित'** इति। इह आग्नेये पुराणे निघण्टु: उदित:, शिक्षाकल्प उक्तस्तद्वदेवाहङ्कार उक्त:। कोऽर्थ:? अहङ्कार: अहं तत्त्वम्। येषु अध्यायेषु काव्यशास्त्रं नाट्यशास्त्रं चोदिते तेषामागम: अहङ्कार इति गृहाण। भावरसादीनां प्रतिपादनं खलु अहं–तत्त्वस्यैव प्रतिपादनम्। साहित्ये स एव विषयो मुख्य इति साहित्यशास्त्रस्याहङ्कारागम इति संज्ञापि पूर्णत: समर्था।'

सनातनमते वाक्यविचरात्मिकाया: विद्याया: प्रसिद्धं नाम मीमांसेति। जैमिनिमुनिरस्या: प्रवर्तक:। अत्र प्राधान्येन भवति वेदवाक्यानां मीमांसा। काव्यं पुनर्लोकवाक्यात्मकम्। तस्य विचाराय प्रवर्तमाना मीमांसा काव्यमीमांसा साहित्यमीमांसा वा वाच्या। साहित्यशास्त्रस्य आचार्यैरपि काव्यशास्त्राय मीमांसापदं प्रयुक्तं संदृश्यते यथा राजशेखरस्य साहित्यमीमांसा अप्पयदीक्षितस्य चित्रमीमांसा चेति। पण्डितराजजगन्नाथेनापि स्वकीये 'रसगङ्गाधर'नाम्ना प्रसिद्धे ग्रन्थरत्ने — **करोति कुतुकेन काव्यमीमासाम्** — इत्येवं काव्यशास्त्राय मीमांसापदं प्रयुक्तमस्ति।

इत्थं सनातनकवय: साहित्यशास्त्रे **'अलं ब्रह्म'** इति महावाक्यस्य प्रवर्तका: सन्ति। अनेन सम्पूर्णमपि साहित्यशास्त्रं कामपि अपूर्वामेव दार्शनिकीं भूमिकां सम्प्राप्य प्रतिष्ठां लभते सर्वशास्त्रवित्सु।

५. साहित्यशास्त्रे पञ्चकल्पसिद्धान्त: —

कालिदाससंस्थानात् प्रकाशिते ***'संस्कृत काव्यशास्त्र का आलोचनात्मक***

इतिहास[८] इति हिन्दीग्रन्थे ***'भोजराजसंस्तवः'***[९] इति शृङ्गारप्रकाशभूमिकाभूते लघुकाव्यकल्पे कारिकाग्रन्थे आचार्यद्विवेदिना भारतीयं सम्पूर्णमपि काव्यशास्त्रं चतुर्भिर्धामभिः, पञ्चभिः कल्पैश्च संगृह्य प्रस्तुतम् । तत्र धामसु प्रथमं काञ्चीधाम, द्वितीयं धाम शारदादेश(कश्मीर)गतं शारदाधाम, तृतीयं धाम धारानगरीगतं महाकालेश्वरधाम, चतुर्थं धाम काशीविश्वेश्वरधाम यत्राचार्याः मधुसूदनसरस्वती–पादा, अप्पय्यदीक्षिताः, जगन्नाथपण्डितराजाः प्रत्नाः नूत्नाश्च करपात्रस्वामिनः स्वयं सनातनपदप्रसिद्धाः आचार्यद्विवेदिनः।

आचार्यद्विवेदिभिः कल्प–वादे **पञ्च कल्पा** उपस्थापिताः, तेषु काव्यनिष्पत्तिप्रक्रिया स्पष्टीकृता । तथाहि –

१. आद्यः कल्पः **'पूर्णताकल्पः'** यत्र दोषाणामभावः, उच्यते च **'अपदोषतैव विगुणस्य गुणः'** इति ।
२. द्वितीयः कल्पो **गुणकल्पो** यत्र वर्णेषु मार्दवादयो गुणा अनुभूयन्ते । एतेन कल्पेन सह भाषायां काव्यत्वं समायाति,
३. तस्य पोषाय तृतीयः कल्पो **लक्षणकल्पः,** स एषः अस्फुटालङ्कारकल्पः, तदुच्यते मम्मटेन 'शब्दार्थौ सर्वत्र सालङ्कारौ क्वचित् पुनः स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः' इति, पितृचरणानामत्र निष्कर्षोऽस्ति यल्लक्षणतत्त्वानामेव कृतेऽत्र मम्मटेनास्फुटालङ्कारशब्दः प्रायोजीति ।
४. चतुर्थः कल्पः **स्फुटालङ्कारकल्पः**। अलङ्कारत्वव्याप्यजातित्वेन रसत्वादयोऽन्ये सर्वेऽपि विशेषा गृह्यन्ते ।
५. पञ्चमश्च पक्ष उपर्युक्तानां सर्वेषां कल्पानां सम्प्लवकल्पः **'साहित्यकल्पः',** एतस्य प्रवर्त्तयिता शृङ्गारप्रकाशनाम्नः साहित्यप्रकाशमहासन्दर्भस्य रचयिता तत्रभवान् भोजराजः। अयमेव हि कल्पश्चरमः कल्पः । समाह्रियन्तेऽत्र सर्वेऽपि काव्यधर्माः वर्णतः प्रबन्धशरीरं यावदुदाह्रियमाणाः।

यदुच्यते 'रसस्य प्रधान्यान्नालङ्कारते'–ति काव्यप्रकाशककृता तत्र आचार्यद्विवेदिनामुत्तरं 'हठ एष ध्वनिवादस्य, अलङ्कारपदेन महासंज्ञाभूतेन सर्वेषामेव काव्यधर्माणां संग्रहस्य सर्वमान्यत्वात्। अत एव भोजेनोक्तित्रये संकलिताः सर्वेऽपि

काव्यधर्माः— **स्वभावोक्तिश्च वक्रोक्ती रसोक्तिश्चेति वाङ्मयम्'** इति सरस्वतीकण्ठाभरणे शृङ्गारप्रकाशे च। युक्तं च तद् आस्वाद्यस्य रसस्य काव्यधर्मत्वेनैवोपलब्धेः, स च विभावादिस्वरूपः, तस्य च निलयः काव्यशरीर एव। यश्चास्वादस्तस्य समाश्रयः सहृदयः। चरमत्वात् तत्र केनापि अप्राधान्यं साधयितुं न शक्यत इति विविक्तविषयता द्वयोरलङ्कारत्वाप्राधान्ययोः। उक्तमिदं काव्यालङ्कारकारिकायामसकृत् —

प्रमेयमात्रदृष्ट्यैतद् दर्शनं नः, प्रमातृगाः ।
आनन्दकोषस्योल्लासा ये तदत्र कथान्तरम् ।। २५२ कारिका।।

आचार्यद्विवेदिनां साम्प्रतिकं प्रस्थानमस्ति प्रत्याहारप्रस्थानं काव्ये । प्रत्याहारपदेनाऽत्र तदेव विवक्षितं यद्धि व्याकरणप्रक्रियायाम् । तथाहि — अलंपदमिव अहंपदमपि प्रत्याहारभूतम् । अलंपदेन संकेत्यते सम्पूर्णोऽपि वर्णसमाम्नाय 'अइउण्' इत्यत आरभ्य 'हल्' इत्यन्तं प्रतिष्ठमानगात्रः । तदिदं वाङ्मयं विश्वम्। व्याप्तमेतेन विश्वमात्रस्य सर्वभाषामयं वाङ्मयम्। 'अहमि'—त्यकारमारभ्य हकारपर्यन्तं प्रसृतो वर्णक्रमः। व्याप्तमेतेन त्रैलोक्यात्मकं विश्वम्, भूतसृष्टेः शब्दमूलत्वस्य सिद्धान्तितत्वात् 'स भूरिति व्याहरत्, भुवमसृजदि'—ति । उच्यते च श्रीहरिणा —

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। इति १.१ वाक्यपदीये।।

तदिदमुक्तं आचार्यद्विवेदिभिः काव्यालङ्कारकारिकाया द्वितीये संस्करणे —

चतुर्दशत्वं सूत्रेषु भुवनेष्विव भावयन् ।
पूर्वमल्त्वं ततोऽलत्वं वाङ्मये भावयेत सः ।। इति २५९ कारिका ।।

सन्त्यन्यान्यपि महत्त्वपूर्णानि वचनरत्नानि सनातनानाम् आचार्यद्विवेदिनां **सौन्दर्यपञ्चाशिकायां क्रमपञ्चाशिकायाञ्च** प्रकाशिताप्रकाशितानि।

००००

---

१. काव्यालंकारकारिका, प्रकाशकम्— कालिदाससंस्थानम्, २८ महामनापुरी, पो०का. हि.वि.वि., वाराणसी—२२१००५, १९७७,२००१

२. काव्यालङ्कारकारिका, प्रकाशकम् – कालिदाससंस्थानम्, २८ महामनापुरी, पो० काहिविवि, वाराणसी –२२१००५, द्वितीयं संस्करणम् २००१।

३. काव्यालङ्कारकारिकाप्रथमसंस्करणवृत्तिः पृ० ९। प्रकाशकम् – चौखम्भासंस्कृतसंस्थानम्, वाराणसी। १९७७

४. नाट्यानुशासनम्, प्रकाशकम् – कालिदाससंस्थानम्, २८ महामनापुरी, पो० काहिविवि, वाराणसी २१ ००५, १९९६ तथा २००८

५. नाट्यशास्त्रम् २५.१२०

६. साहित्यशारीरकम्, प्रकाशकः – प्रकाशनविभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी २२१००१, १९९८

७. अलं ब्रह्म, प्रकाशकम् – कालिदाससंस्थानम्, २८ महामनापुरी, पो० काहिविवि, वाराणसी २१००५, २००५

८. संस्कृत काव्यशास्त्र का आलोचनात्मक इतिहास, प्रकाशकम्– कालिदाससंस्थानम्, ८ महामनापुरी, पो०काहिविवि, वाराणसी २२१००५, २००७

९. शृङ्गारप्रकाशः (भाग १–२) प्रकाशकम्– इन्दिरागांधीराष्ट्रियकलाकेन्द्रम्, नई दिल्ली, कालिदाससंस्थानम्, २८महामनापुरी, पो०काहिविवि, वाराणसी २२१००५, २००७

सनातनकविश्रीरेवाप्रसादद्विवेदिनः कुमारविजयमहाकाव्यम्

प्रो. रमेशकुमारपाण्डेयः

लोकोत्तरवर्णनानिपुणकविकर्म काव्यमिति मम्मटस्य वचनादवसीयते यत् वर्णनगतवैशिष्ट्यमेवासाधारणं तत्त्वं किमपि काव्यस्य भवति। तामेव दृशमङ्गीकृत्य किञ्चिद्विमृशामः कुमारविजयमहाकाव्यम्। एकादश-सर्गात्मकं काव्यमिदं सर्वप्रथमं द्व्यधिकविंशतिशततमे खीष्टाब्दे वाराणसी-स्थकालिदाससंस्थानात् श्रीसदाशिवकुमारद्विवेदिभिः विहितेन हिन्दीभाषा-नुवादेन सहैव प्रकाशितं जातम्।

अनुवादकेन प्रस्तुते प्रास्ताविकेनेदं स्पष्टं भवति यत् सार्धद्विमासाभ्या. मेवास्य काव्यस्य परिपूत्तिर्जाता। – ''अथ कालिदाससंस्थानमिदं सनातन-कवेरस्मत्तातपादस्य काश्यपस्य द्विवेदिनो महामहोपाध्यायस्य रेवाप्रसादस्य तृतीयमपि सद्यो निर्मितं कुमारविजयं नाम महाकाव्यं प्रकाशयति। तदिदं तातपादैरचिरादेव निर्मितम्। खीष्टसंवत्सरस्यास्य फेब्रुअरीमार्चमासाभ्यां निष्पन्नमूलमिदम् अप्रैलमासस्य चतुर्विंशेन दिवसेनासीसदत् परिपूर्त्तिम्।'' इति।

काव्यमिदं नामसंकीर्तनमात्रेणैव स्मारयति महाकवि-कालिदासं तत्प्रणीतं कुमारसम्भवमहाकाव्यमपि। कविकुल-गुरुणा महाकविना कालिदासेन यद्धि कुमारसम्भवनाम्ना महाकाव्य अष्टाभिः सर्गैः संदृब्धं तत्र कुमारस्य अर्थात् भगवतः कार्तिकेयस्य सम्भवमात्रमेव सङ्कल्पितमासीदित्यवसीयते महाकाव्यनाम्नैव। तच्च वस्तु समुपवर्णितं महाकविना चारुत्वातिशयेन। यच्च हरते मनांसि सहृदयानां नितान्तम्।

किन्तु नवमसर्गाद् आरभ्य सप्तदशसर्गं यावद् या सामग्री समुपलभ्यते सा कालिदासकाव्यकलाविरहिता संस्कृतसंस्काररहिता च केनापि पश्चाद् योजितेति समीक्षणविचक्षाणां सम्मतिः।

वस्तुतः तारकासुरस्य उपद्रवं प्रशमयितुमेव देवानामभ्यर्थनया प्रसन्नेन भगवता ब्रह्मणा उदिष्टं यत् नीललोहितांशेन उमायामुत्पन्नः कुमारः सैनापत्यमुपेत्य तारकोपद्रवं प्रशमयिष्यतीति।

तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः।
मोक्ष्यते सुरबन्दीनां वेणीवीर्यविभूतिभिः॥ कुमारसम्भवे 2/61

एतदेव वस्तु मूलत्वेन समुपादाय सनातनकवेः महाकाव्यमिदम् आविर्भूतमिति मामकीनः पक्षः। स्वतः स्फूर्तं यत्काव्यं यच्च यत्नोपपादितं तयोर्मध्ये महत्पार्थक्यम्। महाकाव्येऽस्मिन् न केवलं वस्तुगता अपूर्वता काचित् परिलक्ष्यते अपितु, परिरक्षितं लक्ष्यते काव्यस्वरूपमपि सतातनम्। भगवतो वाल्मीकेः मुखाद् निर्गताया कवितामन्दाकिन व्यास-भास-कालिदासादिभिः परिप्लाविता सा सनातनकविकर्मणि सुताराम् उपालालिता प्रतीयते। काव्यं शब्दगुम्फनमात्रमेव नास्ति नास्ति च पदविन्यासकेवलम्। अपितु विलक्षणं किमपि चारुत्वं यदर्थादवावसीयते इति महाकाव्यस्यास्य अनुशीलनेन सुतरां प्रमाणितं भवति। कवितायाः तादृशं किमप्यसाधारणं स्वरूपं काव्येऽस्मिन् समनुभूयते। कविः स्वयेव पीठिकायाम् उपपादयति यत्-

ये श्लोकसंघटनपाटविनो भवन्ति
तान् मन्महे परमिमान् ननु सूचिकारान्।
ये विस्तृतं पटमितस्तत आनिकृत्य
स्वाभीष्टकञ्चुकमपग्रथितुं क्षमन्ते॥२८॥

पद्यं च काव्यमथ च द्वितयं यदि स्या-
देकं तदा भवतु संस्कृतकोषकर्त्ता।
पद्यैः कविः स च कुमारिलभट्टनामा
मीमांसकोऽपि बत वार्तिकपद्यकारुः॥२९॥

पीठिकायाः अन्तिमं पद्यमस्ति भगवत्प्रार्थनापरम्। तद्यथा-

भवतु भगवान् कामेश्वर्याः प्रियः सकलाधरः
सकलकलया शाब्द्या शक्त्या स्वयं समलङ्कृतः।
य इह परमा अर्थास्तेषां प्रकाशनमिद्धया
भवति कलया नेन्दोः किं वा विना जगति क्वचित्॥

वर्णननैपुणी-

भगवतः कार्तिकेयस्य षण्मुखगतौचित्यं वर्णयता कविना प्रोक्तं यत्-

प्रथमेन मुखेन पार्थिवः स बभूवान्यमुखैश्च शेषभूः।
शिव एव स एष षण्मुखः स हि षष्ठः खलु भूतपञ्चके॥१/८

अर्थात् पञ्चानां भूतानां ज्ञापकानि पञ्चमुखानि षष्ठं पुनः पञ्चसु व्याप्तस्य आत्मतत्त्वस्य ज्ञापकम्।

युद्धेन वारिणा समाजस्य शोधनं भवति। तद्यथा-

रजका ननु सर्व एव नः सुभटा युद्धमयेन वारिणा।
विदधत्यपि शोधनं परं स्वसमाजस्य च राष्ट्रकस्य ॥१/१३

अद्भुतं विद्यते वर्णनम् अणुशास्त्रप्रयोगप्रसङ्गतम् तद्यथा-

अणुनिर्मितमस्त्रमक्षिपद् यदसौ भीषणमद्मरं च तत्।
शतशोऽथ सहस्रशः प्रतिक्षणमापत् परिवृद्धिमात्मनः॥

गगनोदरमस्य धूमजालैस्तमसेव
स्थगितं विभाव्यते स्म।
न दिशो, विदिशो न, भूर्न वा
द्यौर्विशदत्वेन युताऽभ्यलूलुकत्॥ 1/35-36

तारकासुरेण प्रक्षिप्तं अणुनिर्मितं शस्त्रमतिभयानकम् यत् प्रतिक्षणं सहस्रगुणितं जातम्। तदुत्पन्नसधूमज्वालया आकाशगह्वमेवाच्छादितं जातम् इत्यस्य पाठेन जापानदेशे जाता परमाणुशस्त्रजनिता क्षतिः विचित्रं तच्चित्रं सहसा चेतसि समुदेति। युद्धमपि रस्यं भवति। तद्यथा–

प्रधनं कठिनं बभूव दीर्घं
शिशुना सार्धममुष्य तारकस्य।
ऋषिभिर्मुनिभिश्च सिद्धसङ्घैः
रस एतस्य तु रस्यते स्म रस्यम्॥ 1/44

बालककार्तिकेयस्य तारकासुरेण सह जायमानं युद्धं वीक्ष्य प्रसन्नाः देवाः देवाङ्गनाश्च पुष्पवर्षणम् आकाशमार्गात् अकुर्वन्। तैः ताभिश्च प्रक्षिप्तैः कुसुमैः सह सम्पर्कात् असुरैः प्रक्षिप्ताः सायका अपि सुकोमला जाताः। तद्यथा–

अपतन् सुरलोकतः समन्ताद्
गगने यानि सुमानि सायकास्ते।
असुरैः प्रहितास्तु तान्यवाप्य
प्रसभं कोमलतामवाप्नुवन्॥ 1/48

तारकस्य प्रशासने तदनुशासने सर्वा प्रकृतिः व्यवहरति स्म। सर्वं वस्तु कारणं विनाऽपि सुलभं विद्यते स्म। कोकिलोऽपि कवितां करोति स्म। तद्यथा–

कवितां सृजति स्म कोकिलो–
ऽप्यतिमिष्टध्वनिकण्ठबन्धुराम्।
निखिलेऽपि महीतले जगौ
निखिलोऽप्यस्य जनो विरावकम्।। 1/78

जलतत्त्वस्य प्रभावं वर्णयता कविना अद्यतनयुगस्य केन्द्रीभूतस्य सङ्गणकस्यापि चर्चा विहिता। तद्यथा–

एतदेव जलतारकं युगं
विद्युदस्ति यदियं जलात्मजा।
अत्र संगण–कशक्तिबन्धुरा
काऽपि हन्त नियतिः समिन्धते।। 2/10

तपःप्रभावं प्रति जागरूकः कविः ब्रूते–

उषसि नियतमेव ये जपन्ति
मतिपरिशुद्धिकृतो मनून् प्रशान्ताः।
उदयति हृदये सदैव तेषां
सवितुरुदग्रतमं महः प्रशान्ते।। 2/47

तारकासुरस्य उपद्रववर्णनप्रसङ्गः आधुनिकयुगस्य प्रभावमेव सङ्केतयति–

इमाः सुरभयः पयः स्नुतपयोधरा वत्सका-
नतित्वरित विग्रहान् परिपिपासयन्तो हहा।
कृपाणपरिकर्तिता भुवि विचेष्टमानाः प्रभो
ब्रुवन्ति ननु कां कथामकरूणस्य तस्यावनौ।।

यदि प्रचय एषकः प्रतिपलं प्रवर्धिष्णुतां
प्रपात उपजायते विषम हन्त एष क्षणः।
विषोपममिदं जलं विषतुलां दधाना धरा
विषी हि पवनोऽधुना प्रलयकाल आपाद्यते।। ३/३७, ४०

योगे बद्धादरो कविः योगस्य महिमानं बहुधा वर्णयति-

कवित्वशक्तिः प्रगुणास्य यासीत्
तत्रापि योगो हि बभूव हेतुः।
योगानुगन्त्रीं प्रतिभां कवी-
नामाहुर्महाहेतुषु यन्महार्हाम्।।

यत्सुन्दरं किञ्चन सृष्टिचक्रे
कुत्रापि धाम्नि प्रचकास्ति तत् सा।
योगप्रसूता प्रतिभा विधत्ते
प्रत्यक्षपात्रं प्रमुखे स्थितं नु।।

सा विप्रकृष्टानपि सन्निकृष्टान्
विधाय तत्पिण्डगतानशेषान्।
प्रत्यक्षतां प्रापयते विशेषान्
स्वभावभूतानपि दुर्निरीक्ष्यान्।। 4/9,10,12

देवैर्विहिताः कार्तिकेयस्तुतयः विशिष्टं किमपि कार्तिकेयप्रभावं प्रकाशयन्ति। तद्यथा–

माता त्वमेव जगतामसि मानहेतो–
स्त्वं वै पिताऽसि जगतां परिपालकत्वात्।
साहित्यमेतदुभयस्य चमत्कृतान्त–
र्धातु त्वमेव भवसि त्वमु वै रसोऽसि॥ 4/68

तारकविनाशप्रसङ्गोऽपि किमप्यपूर्वं वैशिष्ट्यभाविर्भावयति। तद्यथा–

स तारकः संतमसोत्तमोऽभूद्
गुहश्च स ज्योतिरुदारशक्ति।
साम्मुख्यमेतद्द्वितयस्य मध्ये
युद्धायते स्म क्षणमात्रमेव॥ 6/20/1

साम्मुख्यमाप्ते द्युमणौ प्रभाते या
वान्धकारस्य गतिश्चकास्ति।
तां तारकः प्रापदतीव शैघ्र्या
दनक्षिकोषद्वयलक्ष्यलक्ष्यात्॥ 6/21/1

इतः समाप्तिः प्रधनं विनैव
तादृग्विधा तारकराक्षस्य।
इतश्च दिव्यध्वनित प्रपूर्ति–
र्व्योमाङ्गणे सिद्धजनस्य तस्य॥ 6/22/1

रक्तपातं विना क्षणमात्रेणैव तारकस्य समाप्तिः कवेः असाधारणं प्रतिभां द्योतयति।

सर्वथा नवीनं वर्णनम्

कन्यायाः पितिगृहगमनप्रसङ्गः अभिज्ञानशाकुन्तले सुतरां प्रसिद्धोऽस्ति। किन्तु सुतायाः पतिगृहाद् पितृगृहे आगमनप्रसङ्गः कुत्रापि न प्राप्यते महाकाव्यमिदं विहाय। सुतद्वयेन सह शङ्करेण च सह यदा पार्वती हिमालयस्य गृहे समागच्छति तदा तत्र जायते महोत्सवः कश्चन। तत्र नृत्यादिकं बहुधा विस्तरेण वर्णितमस्ति कविना। तत्र मेनाहिमालयोः आनन्दातिरेकः आस्वाद्यते।

इदं प्रथरमतः सुता पतिगृहादुपेतेति तौ
सुतद्वयसमागतेत्यथ च भर्तृसङ्गेत्यथो।
स्तरान् परपरात्परानन्नु बभूवतुर्वै मुदां
स ईदृगिह सङ्गमो भवति गेहभाजां कदा॥ 11/4/1

अन्ते पुनः उपान्तं पद्यं प्रस्तौमि यस्मिन् कविः भगवतः प्रीतये प्रार्थयते–

भवतु भगवान् प्रीतः सनातनेऽत्र वचःक्रमे
स खलु शिरसा काञ्चिच्चान्द्रीं दधाति कलां तु यः।
सहृदयवरा अत्रादध्युर्दृशं समुदारता–
स्फुरणरुचिरां काव्यं राराज्यते न यया विना॥ 11/73/11

इति शम्॥

विदुषां विचाराः

स्वातन्त्र्यसम्भवं महाकाव्यम्

अथ स्वातन्त्र्यसम्भवं नाम काव्यमधिक्रियते, परम्परा वगाह्याधुनिकभारतेतिहासोपवर्णनपरं सद्विमर्शोपलालितमपेक्षित– सामग्र्यसमुल्लाससन्दानितं सत्तर्कानुसन्धानकरम्बितमिदं क्रमते वर्तमाने समुदितेषु महाकाव्येषु। न वृणक्तीष्टम्, न चिनोत्यणुकम्, न हापयति प्रसक्तम्, स्पृहयति च सतत्त्वायोपपत्तये च। कविः कदाचिदेकतस्तनुते परम्परप्राप्तगौरवं काव्यकामनीयसन्तानञ्च, एकतो वृणुते महापुरुषचरितकदम्बकमाख्याञ्च गह्वरनिलीनम्। स तु वितत्य सर्वमतुलमर्चयति, विमृश्य पुष्कलं पुष्णाति, समूह्य ब्रह्मणालङ्करोति, मननेन नयेन च यथायथं निबध्नात्यैतिह्यम्।

एवं वामायते कविक्रिया सहृदयप्रिया समग्रे विष्टपे।

कवेर्विद्यासामर्थ्ययात्रा मनो हरति। क्वचन स प्राचीनेतिवृत्तमुल्लासितवैभवं सीताचरितं न्यभान्त्सीत्, अन्यत्रावदातानि

राष्ट्रपतिपुरस्कारसम्मानितः, पूर्वसंस्कृतविभागाध्यक्षः, महात्मागाँधिकाशी– विद्यापीठम्, वाराणसी।

अवदानानि निसर्गतोऽरचयत्, क्वचन युगबोधनिबद्धमुद्भावित नानाविच्छित्त्याश्लिष्टं विग्रहमभूषयत्, अन्यत्राध्यात्मरहस्यक्रोडीकृतं शरभङ्गमवरिष्ट; क्वचन रेवाभद्रपीठ–यूथिका–सप्तर्षिकांग्रेस–रचनालेख्यम् अबीभवत, अन्यत्र विविधमतदेशनामबूबुधत्; क्वचन शतपत्रामेरिकादिकृतिभिरनन्दीत् सहृदयान्, अन्यत्र नाटकनव्यशास्त्र–प्रौढग्रन्थभाष्यादिभिरैदिधत् सारस्वतभाण्डागारम्; अपि च कालिदास–साहित्य–नाट्यशास्त्र–शृङ्गारप्रकाशादिसम्पादनकर्मणावभासत रहस्यम्।

एवं सारतः कवेराचार्यरेवाप्रसादद्विवेदिनः संस्कृतवाङ्मये विशदं कर्म। भामहः काव्यालङ्कारं निबबन्ध। अमितभामहस्य (अमितभामहाङ्कितस्य) भामहस्य विलक्षणा दृक्। स तु शास्त्रं निर्माति कवये। शास्त्रस्य पार्यन्तिकं फलं काव्यसृष्टिः एवं द्वयमभीष्टं शास्त्रज्ञानं काव्यनिर्माणञ्च। यदि शास्त्रज्ञानं ज्ञान एव पर्यवस्यति, तदा ज्ञानसामर्थ्यं न फलति। तथा चोक्तं कौटिल्येन– ''**श्रुताद्धि प्राज्ञोपजायते, प्राज्ञया योगः, योगादात्मवत्ता इति विद्यासामर्थ्यम्।**''

राजतरङ्गिणीकारः कह्लणोऽचीकमत गहनार्थम्। उदात्तमतिः कविरेव आशंसामर्हति। तस्य शब्दो न्यायाध्यक्षस्य वाक्यमिव भूतकालवर्णने प्रीतिघृणारहितो भवति। न्यायाधीशस्य निर्णयः केवलं सत्यमाश्लिष्यति, केवलं सत्यम्। तत्र कलुषितशेमुषीकत्वं नाविष्करणीयम्, कह्लणस्येयं दृष्टिः सनातनकविकृतौ बाभास्यते। संस्कृतकाव्यपदव्यमतिरञ्जकः आायः प्रस्तावः। इतिहासदृष्ट्यात्र यथातथामूरीकृतमपास्तोऽवस्करनिकर इत्यहो प्रणेतुर्न्यायनिकषः।

ऐतिहासिकानुशीलनस्य साहित्यविषयकपरीक्षणस्य च परस्परं बाधकत्वमापतति। तत्र द्वयोर्वैरप्रशमनमावश्यकम् —

"Much More than the classic type of textual, bibliographical, biographical and source study, the new reduction of 'Ideas' to approach the contestable border lines where historical study and literary evaluation interact and must be reconciled." - Wimsatt and Brooks, Literary Criticism, p. 545.

प्रकृते तु शोभते संवादोऽतएव नैतादृशी वृत्तिः —

विनयेन विना का श्रीः का निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ।।

(भामहः, काव्यालङ्कारः, १.४)

सत्कवित्वेन रहितं वाग्वैदग्ध्यं न प्रशस्यते। निरातङ्कस्य काव्यमयस्य वपुषो वैभवमुद्घाटितमाचार्येण। अतः शास्त्रज्ञस्य काव्यनिबन्धनं परमं लक्ष्यमाम्नातमिति सौन्दर्यशास्त्रस्य पराकाष्ठाभिव्यक्ता भवति। प्रसक्ते सनातनकवेः काव्ये भामहस्य कविसम्बद्धमचुम्बितं मर्म साधु सङ्गच्छते।

साहित्यव्याकरणादिशास्त्रतत्त्वज्ञानां पण्डितमण्डलमण्डनहीराणां काव्यनिबन्धनक्रियाविस्मापितसत्कवितल्लजानांतर्कयुक्तिखण्डितविपक्ष— मतव्यूहानां कवितार्किकचक्रवर्तिपण्डितमहादेवशास्त्रिचरणानां (सुमेरुपीठाधीश्वरजगद्गुरुशङ्कराचार्यस्वामिमहेश्वरानन्दसरस्वतीचरणानाम्) सन्निधौ कवेरनुभावस्य (Personality) सत्तीर्थपूतचरितच्छायानुगृहीतस्य सद्भावस्य च निर्माणं सम्पन्नमथ चालङ्कारशास्त्रानुशीलनवशाद् दीर्घपरम्पराश्रयवशाच्च निरर्गलधाराकलिता कविताधुनी आवहन्ती

विभातीति विदां प्रत्यक्षम्।

यथा कविताविलासे कालिदासे चापूर्वं चमत्कारं जनयति कवेर्भारती, तथैवालङ्कारशास्त्रे परमां प्रौढिमाश्रयत इति मुदायै सहृदयानां पण्डितानाञ्च। आचार्योऽयमलङ्कारशास्त्रस्य मानदण्डः परमेश्वरानु— गृहीतप्रतिभानोऽविकलं पोषित्वा कविवर्त्म बभ्राज्यते। विशालपरिमाणसाहित्यसर्जनयाऽतुलकीर्तिसमर्चितोऽनवरतं सतां सृतौ जागरूकः शास्त्रे नयमानः पुरतो भवति।

टिप्पणीप्रसङ्गेन परमरमणीयः श्लोकः कामतः समुल्लसति —

पीयूषकुम्भेन समं गरुत्मान् कदाचिदस्यैव जटासु लीनः ।
शुश्राव सीताचरिताभिधानं सनातनं कञ्चन सर्गबन्धम् ।।

(स्वातन्त्र्यसम्भवम्, ४.४)

अत्रोपलम्भ्यया आसक्त्या प्रयुक्तानि पदानि परस्परं स्पर्धमानानि व्यवस्थितविन्यासेन कमपि विच्छित्तिपरिस्पन्दं बिभ्रति।

स्वातन्त्र्यसम्भवं महाकाव्यम्

शुक्लो रमाकान्तः[1]

'सनातन'—कविना आचार्यरेवाप्रसादद्विवेदि—महाभागेन प्रणीतं 'स्वातन्त्र्यसम्भवम्' नाम महाकाव्यम् १८५७ तम वर्षतः २०११ तमस्य वर्षस्य सितम्बरमासं यावत् घटितानां प्रमुखराष्ट्रियघटनानां पद्यबद्ध इतिहासोऽप्यस्ति। पञ्चसप्ततिसर्गेषु षट्सहस्राधिकश्लोकपरिमाणार्थम् अद्यावधि प्रणीतेषु महाकाव्येषु कीर्तिमानमपि प्रस्तौति। अथ च काव्यगुणैः पूर्णेयं रचना सामान्यपाठकान् विशिष्टविदुषश्च समानं प्रीणाति।

सुभाषितानां निधानं, सूक्तीनामाकरः, सत्प्रेरणायाः उद्भवकरः, स्वदेशगौरवस्य आविर्भावनभूमिः, भगवत्या शारदाम्बाया विविधालंकारझंकारसहितः पदचंक्रमणध्वनिः, उदात्तकल्पनानां तथा भव्योत्प्रेक्षाणामाश्रयः अस्ति अपूर्वमिदं महाकाव्यम्। महत्त्वात् भारवत्वाच्च इदानीं यावत् अद्वितीयमेव प्रतीयते।

जवाहरलालनेहरूमुखेन अस्य महाकाव्यस्य विषये कविः यथार्थमेव व्यनक्ति —

इदं न खलु कृत्रिमं किमपि काव्यमस्मिन्, हहा
महाचितिरपि स्वयं नटति चित्तविद्रावणाम् ।

---

१. राष्ट्रपतिपुरस्कारसम्मानितः, सम्मानित आचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, ५६.५७ इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली, संपादकः — अर्वाचीनसंस्कृतम्

इह क्षण उदित्वरो भवति वासरेऽपि स्फुटो
विहस्य विधुरर्चिषां शतशतैः करालः कटुः।। (स्वा० ७.६८)

कविना पीठिकाबन्धनामप्रथमे सर्गे गम्भीरचिन्तनानन्तरं स्वातन्त्र्यस्य महिमा गीत:। झाँसीराज्ञया लक्ष्मीबाईवीरांगनया प्रारब्धस्य स्वातन्त्र्यसंग्रामस्य कथां प्रारभ्य डॉ० मनमोहनसिंहनीतस्य शासनस्य कथां यावत् पाठकेभ्य: स्वातन्त्र्यसम्भवरसं दित्सति कवि: –

लक्ष्मीन्दिराद्यटलमोहनवेष्टितायाः
स्वातन्त्र्यसम्भवकथा–त्रिदशापगायाः ।
अस्या भवन्तु रससेवनया विमुक्त–
क्लेशाश्च हृष्टहृदयाश्च मनीषिमुख्याः।।(स्वा०१.७६)

महाकवि: सनातन: विस्तीर्णं मंगलाचरणमातनोति। स कवीनां प्रतिभां सततलेखनीं (फाउण्टेनपेनं) च सादरं वन्दते –

नमामि तां निर्झरिणीं कवीनामकाशगंगां नु विशुद्धिमुग्धाम् ।
यत्कुक्षिसूताक्षरपद्ममालां वाग्देवता श्रीरिव मूर्ध्नि धत्ते ।।
(स्वा० २.२)

तदनु भारतवर्षं विष्णुरूपेण स्तुवन् कविर्भणति

आदक्षिणाब्धिप्रसरं सुमेरोर्मूर्ध्नो धरां व्याप्य समुल्लसन्तम् ।
अब्धित्रिवेणीप्रणताङ्घ्रिमूलं वन्दामहे भारतवर्षविष्णुम् ।।
(स्वा० २.७)

महाकविना ग्रामटिकावर्णनप्रसङ्गे अनेकेषां शाकानाम् ओषधीनां अन्येषां च ग्रामटिकापरिसरे उत्पन्नानां वस्तूनां वर्णनं विहितम्। (८/१–७४) 'जनान्दोलन'–नाम्नि नवमे सर्गे महात्मगान्धिजवाहरलाल–

नेहरूमहाभागयोर्नेतृत्वे प्रवृत्तस्य स्वातन्त्र्यसंग्रामस्य सजीवं वर्णनं करोति कविः —

गान्धी महात्मा स जवाहरश्च सर्वामपीमामनुवीक्ष्य हेलाम् ।
उत्थापितं भारतभूतलेऽन्यैः स्वातन्त्र्यसंग्राममपूपुषेताम् ।।
स्वातन्त्र्यसङ्ग्राममहाभटानां शब्दैर्नभोमण्डलमप्यपूरि ।
दिशां मुखान्यप्यनुलेपितानि धिक्कार—हुङ्कार—महार्हवर्णैः ।।

(स्वा० ९.४७—४८)

राज्यं तृणं शुष्कमथो जनश्च दावानलस्तत्र जवाहराद्यैः ।
अकारि योगः प्रगुणस्तदानीं द्वयोस्तयोर्योगिभिरार्य्यशीलैः ।।
कारागृहाणामुदराणि हर्षात्प्रपूरितान्यार्यमहीसुपुत्रैः ।
आत्माहुतीर्दातुमपारसंख्या यूनां समूहा उदिता अभूव ।।

(स्वा०९.५२—५३)

कवेर्मानसं हिरोशिमा—नागासाकी—परमाण्वस्त्र—विस्फोटेन दूनमस्ति। भारतविभाजनस्य पीडया कविः व्यथामाप्नोति। नोवाखालीरक्तपातेन तन्मनो दूयते। कविना समकालीना घटनाः यथा रामजन्मभूमिविवादः, अन्नाहजारेकृतमनशनं, बाबारामदेवकृतमनशनं तिरुवनन्तपुरस्थ—पद्मनाभस्वामिमन्दिरस्य कोषोद्घाटनम् प्रामाणिकतया निबद्धाः।

सम्पूर्णेऽपि महाकाव्ये कवित्वं चारुतया प्रतिष्ठितम्।

अस्य महाकाव्यस्याध्यापनं सर्वेषु विश्वविद्यालयेषु पूर्णतोंऽशतो वा यथा भवेत्तथा पाठ्यक्रमसमितिसदस्यैश्चेष्टनीयम्। युगगाथानिबन्ध

ानार्थं किञ्च कवित्वस्य प्रौढ्याः संरक्षणार्थं महाकविः सनातनो भूयो भूयोऽभिनन्द्यते प्रणम्यते च।[१]

१. **स्वातन्त्र्यसम्भवम् (१-७५ सर्गात्मकं महाकाव्यम्) रचयिता— सनातनकविः आचार्य रेवाप्रसादद्विवेदी,** प्रकाशनम्— कालिदाससंस्थानम्, २८ महामनापुरी, पो० का०हि०वि०वि० (बी०एच०यू०), वाराणसी—२२१००५, ०५४२—२५७०६८२; मूल्यम् ५११/—, संस्करणम् २०११। अर्वाचीनसंस्कृतम् (अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्), १३२—१३८ संयुक्तांकः, पञ्चत्रिंशत्तमवर्षपूर्त्यङ्कः।१५ अप्रेल,२०१२—१५ अक्टूबर, २०१३ ई०।